॥ श्रीः ॥

॥ शिवतत्त्वरहस्यम् ॥

श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीकण्ठमतप्रतिष्ठापनाचार्य-
चतुरधिकशतप्रबन्धनिर्वाहकश्रीमन्महाव्रतयाजिश्री-
मदप्पयदीक्षितसोदर्यश्रीमदाच्चान्दीक्षितपौत्रेण
श्रीनारायणदीक्षितात्मजेन श्रीभूमिदेवी-
गर्भसंभवेन **नीलकण्ठदी-**
क्षितेन विरचितम् ॥



श्रीरङ्गम्
श्रीबाणीविलासमुद्रायन्त्रालयः
१९१५.



॥ शिवतत्त्वरहस्यम् ॥

लेभे यत्स्वयमर्धमेव गिरिजा स्तुत्वा पतिं नामभि-
स्तत्तादात्म्यमखण्डमेव सुलभं भक्तिस्पृशां यद्वशात् ।
तां प्रख्यापितभक्तवत्सलसमाख्यारूपजैत्रध्वजां
वन्दध्वं वरदायिनः पशुपतेरव्याजभव्यां दयाम् ॥

विधाय वेदान्विविधाः कलाश्च
भावज्ञमप्राप्य विषीदतोऽन्तः ।
शंभोः प्रियं कर्तुमिवावतीर्णः
श्रीमाञ्जयत्यप्पयदीक्षितेन्द्रः ॥

आम्नायबोधितं शंभोर्नाम्नामष्टोत्तरं शतम् ।
व्याकर्तुं प्रयते देवः स्वीकर्तुं दयतामिदम् ॥

अस्ति स्कान्दं नाम तत्पुरुषकल्पवृत्तान्तप्रतिपादकं शिव-
धर्मानधिकृत्य प्रवृत्तं शतोत्तरैकाशीतिसहस्रग्रन्थसंख्याकं

त्रयोदशं पुराणम्; यथोक्तं मात्स्ये— 'यत्र माहेश्वरान्धर्मा-नधिकृत्य चतुर्मुखः । कल्पे तात्पुरुषे वृत्तैश्चरितैरुपबृंहितम् ॥ स्कान्दं नाम पुराणं तदेकाशीतिर्निगद्यते । सहस्राणि शतं चैकमिति मात्स्येषु पठ्यते' इति । तच्च सनत्कुमारीयादिषट्-संहितात्मकम्; यथोक्तं स्कान्दे— 'तत्र स्कान्दं प्रवक्ष्यामि पुराणेषु त्रयोदशम् । संहिताभिस्तथा षड्भिर्लक्षग्रन्थैर्विराजितम् ॥ आद्या सनत्कुमारीया द्वितीया सूतसंहिता । ब्राह्मी तु संहिता पश्चात्तुरीया वैष्णवी मता ॥ पञ्चमी शांकरी ज्ञेया सौरी षष्ठी तु संहिता' इति । तत्र पञ्चम्यां शंकरसंहितायां शिवरहस्यखण्डे गौरीनारायणसंवादे गौर्यै विष्णुनोपदिष्टं शिवनामाष्टोत्तरशतं व्याख्यायते ॥

अत्र केचिदाहुः—स्कान्दपुराणान्तर्गतानां नाम्नां प्रामाण्यं न संभवति, स्कान्दादीनां तामसपुराणत्वेनाप्रमाणत्वात्; तथा हि— पुराणानां कर्ता चतुर्मुखः केषुचित्कल्पेषु सत्त्वेनोद्रिक्तो भवति, केषुचिद्रजसा, केषुचित्तमसा; स यदा सत्त्वेनोद्रिक्तः, तदा वैष्णवानि पुराणानि प्रणिनाय, यदा रजसोद्रिक्तस्तदा ब्राह्माणि, यदा तमसोद्रिक्तस्तदा शैवानि; एवं च तमोगुणान्धब्रह्मप्रणीतानि शैवपुराणानि भ्रान्तजल्पितानीवाप्रमाणान्येव, वैष्णवपुराणानि तु सत्त्वोद्रिक्तब्रह्मप्रणीतानि प्राज्ञ-

वाक्यानीव प्रमाणानि; यथोक्तं मात्स्ये— 'संकीर्णाः सात्त्विकाश्चैव राजसाश्चैव तामसाः । यस्मिन्कल्पे तु यत्प्रोक्तं पुराणं ब्रह्मणा पुरा । तस्य तस्य तु माहात्म्यं तत्स्वरूपेण वर्ण्यते । अग्नेः शिवस्य माहात्म्यं तामसेषु प्रकीर्तितम् ॥ राजसेषु तु माहात्म्यमधिकं ब्रह्मणो विदुः । संकीर्णेषु सरस्वत्याः पितॄणां च निगद्यते ॥ सात्त्विकेषु च कल्पेषु माहात्म्यमधिकं हरेः । तेष्वेव योगसंसिद्धा गमिष्यन्ति परां गतिम्' इति । यद्यप्युदाहृतश्लोकेषु ब्रह्मणः कल्पभेदात्तत्तद्गुणोद्रिक्तत्वं न स्फुटं प्रतीयते, तथापि तत्तद्गुणाधिकमूर्तिमाहात्म्यस्य तत्तद्गुणोद्रिक्तब्रह्मप्रतिपाद्यतौचित्यात्, 'जायमानं हि पुरुषं यं पश्येन्मधुसूदनः । सात्त्विकः स तु विज्ञेयः स वै मोक्षार्थचिन्तकः ॥ पश्यत्येनं जायमानं ब्रह्मा रुद्रोऽथवा पुनः । रजसा तमसा चास्य मानसं समभिप्लुतम्' इति मोक्षधर्मवचनेन, स्वस्वकटाक्षेण सत्त्वादिगुणप्रवर्तकविष्ण्वादिमाहात्म्यप्रतिपादनस्य सत्त्वादिमूलकत्वौचित्याच्च, ब्रह्मणस्तत्तत्पुराणप्रणयनकाले तत्तद्गुणोद्रेकसिद्धिः । न चोदाहृतवचनजातस्य तामसमात्स्यपुराणान्तर्गततया अप्रमाणत्वे सति नाभिमतार्थसिद्धिः, प्रमाणत्वे तु व्याघात इति वाच्यम्; तामसपुराणान्तर्गतत्वेन हि मानान्तराविरोधे दुर्बलत्वादप्रामाण्यं भवेत्, न तदभावेऽपि

संभवदौत्सर्गिकं प्रामाण्यं हातव्यमिति प्रामाण्यसंभवात्, ब्रह्मशिवादिप्रतिपादनाभिनिविष्टस्य प्रबन्धस्य भगवत्प्रकर्षोक्तौ निग्रहासंभवेनास्य वचनस्य तत्त्वपरत्वोपपत्तेश्च । न चानेकपुराणाप्रामाण्यकल्पनादेकस्यैतस्याप्रामाण्यकल्पनं न्याय्यम्, भूयसां बलीयस्त्वादिति वाच्यम्; ब्रह्मशिवप्रतिपादकपुराणेषु एतद्वचनप्रतिपाद्यस्य स्वकीयरजस्तमोमूलकत्वस्य कण्ठरवेण प्रतिषेधाभावान्न साक्षादस्ति विरोधः, किं तु तेषु स्ववाचोद्घाटितं प्रामाण्यम् एतद्वचनगम्यरजस्तमोमूलकत्वविरोधीति परंपरया विरोधः; तत्रापि नानेन वचनेन प्रागसिद्धं तेषामप्रामाण्यं प्रतिपाद्यते, किं तु परस्परविरुद्धार्थानां सर्वेषां पुराणानां प्रामाण्यानुपपत्तौ क्वचिदप्रामाण्ये पर्यवसाययितव्ये विषयव्यवस्थामात्रतात्पर्येण प्रवृत्ततया विरोधाभावात्; एवं बलवतानेन निश्चितरजस्तमोमूलकानां तेषां बहूनामपि बहुभ्रान्तवचनानामेकप्राज्ञवचनादिव एतद्वचनादुर्बलत्वात् । किं च न केवलमियतैव तेषामप्रामाण्यम्, प्रत्यक्षश्रुतिविरोधादिभ्योऽपि तत्सिद्धेः । तथाहि, श्रुतौ तावत्-- 'नारायणाद्ब्रह्मा जायते नारायणाद्रुद्रो जायते' 'तस्मै विरूपाक्षाय दत्ताञ्जलये सहस्राक्षाय ब्रह्मणः पुत्राय नमः' इत्यादिवाक्यैर्नारायणस्य सर्वजनकत्वं रुद्रस्य

तज्जन्यत्वं तज्जन्यब्रह्मजन्यत्वं च श्रूयते; लैङ्गादिषु तु तद्विरुद्धं रुद्रस्य सर्वजनकत्वं नारायणस्य तज्जन्यत्वं तदुपासकत्वं च प्रतिपाद्यत इति श्रुतिविरोधः । किं च लैङ्गे 'युवां प्रसूतौ गात्रेभ्यो मम पूर्वं सनातनौ । अयं मे दक्षिणे पार्श्वे ब्रह्मा लोकपितामहः । वामपार्श्वे च मे विष्णुर्विश्वात्मा हृदयोद्भवः' इति शिवाद्ब्रह्मनारायणयोरुत्पत्तिमुक्त्वा प्रदेशान्तरे विष्णुं प्रति वचने 'त्वत्कोपसंभवो रुद्रस्तमसा च समावृतः । त्वत्प्रसादाज्जगद्धाता रजसा च पितामहः' इति नारायणाद्ब्रह्मरुद्रयोरुत्पत्तिर्वर्णिता इति स्वव्याघातः; तदेवं वक्तुस्तामसत्वदोषात्, श्रुतिविरोधात्, स्वव्याघातात्, स्वोक्तार्थस्य प्रमाणत्वाभिमतपुराणान्तरानुगृहीतत्वात्, लैङ्गस्यादौ 'तस्माद्भवन्तं पृच्छामः सूत पौराणिकोत्तम । पुराणसंहितां पुण्यां लिङ्गमाहात्म्यसंयुताम्' इति विशेषनिष्ठप्रश्नोपक्रमेण प्रवृत्ततया लिङ्गमाहात्म्यवर्णनाग्रहस्य स्पष्टत्वात्, कौर्मादिषु नष्टकोशत्वप्रसिद्धेः, अतिविस्तृततया च सर्वेषां प्रक्षेपशङ्कासंभवाच्च शिवपुराणानां न प्रामाण्यं संभवति । विष्णुपुराणानां तु सर्वप्रकारेणाप्युक्तवैपरीत्यात्प्रामाण्यमस्ति । तथा हि—विष्णुपुराणस्य वक्ता पराशरः, स च वसिष्ठपुलस्त्यवरप्रसादलब्धदेवतापारमार्थ्यज्ञान इति विष्णुपुराणलैङ्गादिषु प्रसिद्धम् । अत एव लैङ्गे

'पराशरस्यावतारो व्यासस्य च शुकस्य च' इति भगवतीव पराशरेऽप्युत्पत्तिरिति वक्तव्ये अवतार इति प्रयुक्तम् । एवं च वक्तृगुणः, तथा 'विष्णोः सकाशादुद्भूतं जगत्तत्रैव च स्थितम्' इति वचनेन 'न ब्रह्मा नेशानः' इत्यादिश्रुत्यानुगुण्यम्; तथा सर्वत्र विष्णूत्कर्षस्यैव प्रतिपादनात् न कापि स्वव्याघातः । यत्तु तत्र तत्र कैलासयात्रादेवकीगर्भोत्पत्त्यादिपरत्वविरुद्धधर्मोपवर्णनम्, तत्प्रसक्तापकर्षस्य 'सर्वावर्तेषु विष्णोश्च जननं लीलयैव तु' इत्यादिना लीलारूपत्वेन परिहृतत्वान्न कापि स्वव्याघातः; तथा विष्णुपुराणोक्तार्थस्य तद्विरुद्धलैङ्गादिभिरपि 'सर्वे विष्णुमया देवाः सर्वे विष्णुमया गणाः । न हि विष्णुसमा काचिद्गतिरन्या विधीयते ॥ इत्येवं सततं वेदा गायन्ते नात्र संशयः । त्वत्कोपसंभवो रुद्रस्तमसा च समावृतः ॥ सर्वावर्तेषु विष्णोश्च जननं लीलयैव तु' इत्यादिना प्रतिपादितत्वेन सर्वपुराणसंवादित्वम्; तथा 'सोऽहमिच्छामि वै धर्मं श्रोतुं त्वत्तो यथा जगत् । बभूव भूयश्च यथा महाभाग भविष्यति' इति सामान्यतः प्रश्ने 'विष्णोः सकाशादुद्भूतं जगत्तत्रैव च स्थितम्' इति विशेषनिष्ठोत्तररूपेण प्रवृत्ततया क्वचिदप्यस्याग्रहाभावः स्पष्ट इति तत्त्ववेदकत्वं स्फुटम्; तथा षट्साहस्र्या अपि श्रू-

यमाणतया न नष्टकोशत्वशङ्कावकाशः; अत एवानतिविस्तृततया प्रक्षेपशङ्काभावश्चेति वैष्णवान्येव पुराणानि प्रमाणानि; शैवानि तु तदविरुद्धे प्रमाणानि भवन्त्यपि तद्विरुद्धे शिवोत्कर्षे न सर्वथैव प्रमाणानीति ॥

अत्रोच्यते— यद्यपि परैरित्थं शैववैष्णवपुराणानां वैलक्षण्यमुक्तमिति तद्वैपरीत्येन विष्णुपुराणानामप्रामाण्यं प्रतिपादनीयम्, तथापि तत्त्वावेदनप्रवृत्तैरस्माभिर्न तथा कर्तुमुचितम्; न हि परेण भ्रान्तमिति स्वेनापि भ्रमितव्यम्। अतः सर्वपुराणप्रामाण्यव्यवस्थापकः सिद्धान्तः प्रस्तूयते— यत्तावदुक्तं वक्तुस्तामसत्वदोषादिति, तदेवासिद्धम्; तथाहि— पुराणानां को वक्तेत्यभिमानः? चतुर्मुख इत्युक्तमेवेति चेत्, सत्यमुक्तम्; तदेव तु त्वदुक्तं भवद्भ्रान्तिकल्पितम्; सात्त्विकादिदुर्विभागकथनाभिज्ञेन भवतैव प्रमाणतयाभ्युपगते महाभारत एव शान्तिपर्वणि राजधर्मे शिव एव सर्वपुराणानामादिवक्तेत्युक्तत्वात्। तथाहि— 'भूयः स भगवान्ध्यात्वा चिरं शूलवरायुधः। असृजत्सर्वशास्त्राणि महादेवो महेश्वरः॥ विद्याश्चतस्रः कूटस्थास्तासां भेदविकल्पनाः। अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरः॥ पुराणं धर्मशास्त्राणि विद्या ह्येताश्चतुर्दश। आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते

त्रयः ॥ अर्थशास्त्रं चतुर्थं च विद्या ह्यष्टादशैव तु । दश चाष्टौ च विख्याता एता धर्मस्य संहिताः ॥ एतासामेव विद्यानां व्यासमाह महेश्वरः । शतानि त्रीणि शास्त्राणि प्राह तन्त्राणि सप्रतिम्' इति सामान्यत उक्त्वा, 'तन्त्रं पाशुपतं नाम पाञ्चरात्रं च विश्रुतम् । योगशास्त्रं च विख्यातं तन्त्रं लोकायतं तथा' इत्युपक्रम्य 'दश चाष्टौ च विज्ञेयाः पुराणा यज्ञसंहिताः । पुराणस्य प्रणीताश्च तावदेव हि संहिताः ॥ धर्मशास्त्राणि तावच्च एकार्थानीति नान्यथा । एकार्थानि पुराणानि वेदाश्चैकार्थसंश्रयाः' इत्युक्तम् । तथा तत्र तत्र पाञ्चरात्रादिषु विष्ण्वादिकर्तृकत्वस्मरणस्य प्रवक्तृत्वपरत्वं दर्शयितुम् 'कल्पे कल्पे महाभागैर्ऋषिभिस्तत्त्वदर्शिभिः । ऋषिपुत्रैश्च तैस्तैर्हि विष्णुना च विकल्पिताः' इत्यप्युक्तम् । तथा च 'तस्मै वेदान्पुराणानि दत्तवानग्रजन्मने' इति पुराणवचनोपबृंहितया 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै' इत्यनुक्तपुराणसमुच्चयार्थकचकारवत्या श्रुत्या सर्गाद्यकाले शिवालब्धानां पुराणानां प्रवक्ता परं चतुर्मुख इति सिद्धत्वेन तस्य पुराणप्रणेतृत्वासिद्धेः । न च प्रवक्तुस्तमोभिभवो दोषाय ; तस्य प्रणेतृदोषवत् प्रबन्धाप्रामाण्यानापादकत्वात्, अन्यथास्मदादिपठित-

तवेदवाक्यानामपि अप्रामाण्यापत्तेश्च । किं चायं पुराणानां प्रवक्ता वा अस्तु प्रणेता वा, सर्वथापि स यदि पुराणानि युगपदनुक्त्वा क्वचित्कल्पे कानिचित् क्वचित्कल्पेऽपराणि च प्रणयेत्, तदा घटेतापि कथंचिदभिमतलाभप्रत्याशा; तदेवासिद्धम्—यत्पुराणे यत्प्रकरणे विद्यमानं वचनमुदाहृत्य चिन्तयितुमिष्यते, तत्रैव मात्स्ये तस्मिन्नेव पुराणस्वरूपविवेचनप्रकरणे उपक्रम एव 'पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम् । अनन्तरं तु वक्त्रेभ्यो वेदास्तस्य विनिर्गताः ॥ पुराणमेकमेवासीत्तदा कल्पान्तरे नृप । त्रिवर्गसाधनं पुण्यं शतकोटिप्रविस्तरम् ॥ निर्दग्धेषु च लोकेषु वारिपूरेण वै पुरा । अङ्गानि चतुरो वेदान्पुराणं न्यायविस्तरम् ॥ मीमांसां धर्मशास्त्रं च परिगृह्य मया कृतम् । मत्स्यरूपेण तु पुनः कल्पादावुदकार्णवे ॥ अशेषमेतत्कथितमुदकान्तर्गतेन च । श्रुत्वा जगाद च मुनीन्प्रति मत्तश्चतुर्मुखः ॥ प्रवृत्तिः सर्वशास्त्राणां पुराणस्याभवत्ततः । कालेनाग्रहणं दृष्ट्वा पुराणस्य ततो नृप ॥ व्यासरूपमहं कृत्वा संहरामि युगे युगे । चतुर्लक्षप्रमाणेन द्वापरे द्वापरे सदा ॥ तथाष्टादशधा कृत्वा भूलोकेऽस्मिन्प्रकाशये । अद्यापि देवलोके तच्छतकोटिप्रविस्तरम् ॥ तदर्धोऽत्र चतुर्लक्षैः संक्षेपेण निवेशितः' इति सर्गाद्यकल्पे

युगपदेव ब्रह्ममुखादविदितब्राह्मपाद्मादिविभागस्य शतकोटि-ग्रन्थसंख्याकस्य पुराणस्कन्धस्यैकस्यैव निर्गममुक्त्वा ततः कल्पान्ते जगत्येकार्णवे सति नष्टेष्वध्येतृपुरुषेषु चतुर्दशविद्यास्थानान्यपि धारयता भगवता मत्स्यरूपेण 'कल्पे कल्पे महाभागैर्ऋषिभिस्तत्त्वदर्शिभिः । ऋषिपुत्रैश्च तैस्तैर्हि विष्णुना च विकल्पिताः' इति महाभारतोक्तरीत्या प्रवचनमात्रं पुराणानां कृतम्; तन्मुखाच्चतुर्मुखः श्रुत्वा तथैवाखण्डरूपेण तत्पुराणं मुनिभ्य उपदिदेश; ततो बहुतिथे कालेऽतीते द्वापरान्ते प्रसक्ते मनुष्याणामायुर्ह्रासात्तावद्विस्तृतपुराणस्कन्धाध्ययनाध्यापनशक्तिकौण्ठ्यं पर्यालोच्य लोकानुजिघृक्षया भगवतैव व्यासरूपेणाष्टादशधा विभागश्चतुर्लक्ष्या संक्षेपश्च कृत इति प्रतिपादनेन कुत्रापि कल्पे ब्रह्मणा विभज्य कथनस्य कतिपयपुराणकथनस्य चासिद्धेः कथमभिमतलाभ इत्यास्तामेतत् ॥

तत्तत्कल्पेषु ब्रह्मा तत्तद्गुणोद्रिक्त इति यदुक्तम्, तत्र वा किं मानम्? न तावदुदाहृतं वचनम्; तत्रोक्तार्थबोधकशब्दाभावात् । न च 'तत्स्वरूपेण' इत्येतदेव प्रमाणमिति वाच्यम्; 'यस्मिन्कल्पे तु यत्प्रोक्तम्' इति पुराणपरद्वितीययच्छब्दप्रतिनिर्देशात्मकेन तच्छब्देन पुराणस्यैव परामर्शात्

'तत्स्वरूपेण' इत्यस्य तत्पुराणस्वरूपेणेत्यर्थकत्वात् । यच्चोक्तम्— तत्तद्गुणाधिकमहिमवर्णनस्य तत्तद्गुणाधिकप्रवक्तृकत्वौचित्यादिति, तत्तुच्छम्, वर्ण्यवर्णकयोरैकरूप्यनियमासिद्धेः— न ह्यन्धोऽन्धेनैव वर्णनीयः बधिरो बधिरेणेति नियमः, सात्त्विकेनैव व्यासेन तामसानामसुरादीनां वर्णनात् । ननु न सात्त्विकस्तामसस्योत्कर्षं भ्रान्त्वा वर्णयति, तामसस्तु तथा करोतीत्यौचित्यमिति चेत्, तदपि न; एवमपि राजसोत्कर्षवर्णनस्यापि भ्रममूलकतया तत्रापि वक्तुस्तामसत्वे कल्पनीये राजसत्वकल्पनायोगात्, रजसः प्रवृत्तिधर्मकत्वेन तमोवदज्ञानजनकत्वाभावात्; कथंचिद्भावे वा व्यवस्थानुपपत्तेः—राजसतामसोत्कर्षवर्णनयोर्भ्रममूलत्वाविशेषे राजसोत्कर्षवर्णनं राजसेनैव, तामसोत्कर्षवर्णनं तामसेनैव कर्तव्यमिति व्यवस्थायां नियामकाभावात् । यदप्युक्तम्— तत्तद्गुणप्रवर्तकमहिमवर्णनस्य तत्तद्गुणमूलकत्वौचित्यादिति, तदपि न; प्राग्वदेवाप्रयोजकत्वात्, अन्यथा वातप्रकोपजनकपदार्थगुणपाठस्यापि वातमूलकत्वकल्पनापत्तेः । किं च, 'संकीर्णेषु सरस्वत्याः पितृणां च निगद्यते' इति श्रवणात् यस्मिन्कल्पे गुणत्रयसंकीर्णश्चतुर्मुखः तस्मिन्कल्पे पितृसरस्वतीप्रतिपादकपुराणं प्रणिनाय इत्यपि कल्पनापत्तेः; न चेष्टाप-

त्तिः, तादृशपुराणाभावात् । न च तादृशपुराणमेकं प्रणीय भागशस्तेषु तेषु प्रचिक्षेपेति वाच्यम्; पुराणानामादिकाल एव कल्पप्रसंख्याश्रवणस्य तत्तदनुक्रमणिकाध्यायोक्तकथानुक्रमणस्य च विरोधात् । यदप्युक्तम्— कल्पेषु सात्त्विकादिव्यपदेशान्यथानुपपत्त्या तत्प्रवर्तकस्य ब्रह्मणस्तत्तद्गुणोद्रेकभिद्धिरिति, तदपि न; हेमन्तादिषु हिमकालादिव्यपदेशवत्कल्पानां तत्तद्गुणप्राचुर्येण तत्तत्समाख्योपपत्तेरास्तामिदमपि ॥

यच्चोक्तम्— बहूनां पुराणानामप्रामाण्यकल्पनादेकस्यास्य वचनस्याप्रामाण्यकल्पनं युक्तं भूयसां बलीयस्त्वादिति शङ्कामुद्भाव्य तत्परिहारावसरे नानयोः साक्षाद्विरोधोऽस्ति किं तु परंपरया इति, तस्याभिप्रायं न विद्मः; न हि परंपरया विरोधे भूयसां बलीयस्त्वं नास्ति, साक्षाद्विरोधे त्वस्ति इति कल्पयितुं शक्यम् । यदप्युक्तं तत्रैव— नानेन बहूनामप्रामाण्यं प्रतिपाद्यते किं त्वविशेषेण प्रसक्तस्य तस्य विशेषपर्यवसानं क्रियत इति, तदप्यसंगतम्; किमनेन विरोधः परिहृतः? बाढमिति चेत्, अस्तु, केन तर्ह्यप्रामाण्यं शिवपुराणानामापादितम्? परस्परविरोधेनेति ब्रूमः; नैतदस्ति, सर्वसा-

साचिव्येनेति चेत्, हन्तैवमागतो विरोधः; परं तु कश्चिदन्योऽपि हेतुरासीदित्यन्यदेतत् । उभयोर्हेतुत्वेऽपि प्राप्ताप्राप्तविवेकेन परस्परविरोधेन सिद्धस्याप्रामाण्यस्य स्थलविशेषनिर्णयमात्रेऽस्य व्यापार इति चेत्, न; तन्निर्णयार्थमप्यप्रामाण्यव्याप्यतमोमूलत्वप्रतिपादनमुखेन प्रवृत्तस्य अस्य वचनस्य बहुप्रमाणविरोधो दुष्परिहर एव । इदमप्यास्ताम् ॥

यच्चोक्तम्— अस्यैव वचनस्य तामसपुराणान्तर्वर्तितया कथं प्रामाण्यमिति शङ्कायां मानान्तराविरोधात्संभवदौत्सर्गिकं प्रामाण्यं न क्षतमिति, तदप्ययुक्तम्; प्रागुदाहृतभारतवचने 'पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश' इति विद्यापदप्रयोगात्, 'दश चाष्टौ च विख्याता एता धर्मस्य संहिताः' इति धर्मसंहितापदप्रयोगाच्च प्रमाणत्वेन परिगणितासु विद्यासु पुराणं सामान्यत उपादाय 'एतासामेव विद्यानां व्यासमाह महेश्वरः' इत्युपक्रम्य तत्तद्विद्याभेदानुक्रमावसरे 'दश चाष्टौ च विज्ञेयाः पुराणा यज्ञसंहिताः । पुराणस्य प्रणीताश्च तावदेव हि संहिताः ॥ धर्मशास्त्राणि तावच्च एकार्थानीति नान्यथा । एकार्थानि पुराणानि वेदाश्चैकार्थसंहिताः' इत्यष्टादशपुराणानां परिगणनेन तेषु श्लोकमात्रस्याप्यप्रामाण्यानुपपत्तेः । न हि प्रमाणानि चतुर्धा प्र-

त्यक्षादिभेदेन, तत्र प्रत्यक्षं द्विविधं लौकिकालौकिकभेदेन— इत्युक्ते किंचित्प्रत्यक्षमप्रमाणीभवितुमर्हति । अपि च परस्परविरोधादप्रामाण्यमिति भ्रमोऽपि न कर्तव्य इति दृष्टयैव तत्रैव 'एकार्थानि पुराणानि' इति पठितत्वाच्च मानान्तरविरोधो दुष्परिहर एव । का तर्हि तस्य वचनस्य गतिरिति चेच्छृणु— 'संकीर्णाः सात्त्विकाश्चैव राजसाश्चैव तामसाः' इति तत्तद्गुणप्रचुरतया कल्पांस्तथा तथा व्यपदिश्य, 'अग्नेः शिवस्य' इत्यादिना तत्तद्गुणोत्कर्षकाले तत्तद्गुणोपाधिकमूर्तेराधिक्यमुचितमित्यभिप्रायेण ब्रह्माद्युत्कर्षाणां कल्पभेदप्रवृत्तत्वमुपपाद्य, 'यस्मिन्कल्पे' इति श्लोके 'कल्पे' इति विषयसप्तमीं कृत्वा यं कल्पं विषयीकृत्याधिकृत्य यत्पुराणं प्रोक्तं प्रथममुक्तं ब्रह्मणा, प्रशब्दस्य प्राथम्यपरत्वेन 'तेन प्रोक्तम्' इत्यादाविव प्रोक्तशब्दस्य प्रथमवचनमात्रपरत्वात्, तत्स्वरूपेण तत्पुराणस्वरूपेण तस्य तस्य माहात्म्यं तत्तत्कल्पस्य माहात्म्यं वर्ण्यते; घनविद्युद्गर्जितादिवर्णनस्य वर्षाकालवर्णनत्ववत् तत्तत्कल्पवृत्त्यग्न्यादिमाहात्म्यवर्णनस्यैव तत्तत्कल्पवर्णनात्मकत्वादिति प्रतिपादनेन भिन्नभिन्नकल्पविषयाणां पुराणानां नास्ति परस्परविरोध इति; 'एकार्थानि पुराणानि' इति भारतोक्तरीत्या सर्वपुराणप्रामाण्योपपा-

दनतात्पर्यकत्वेन समञ्जसत्वात्; एवं कस्याप्यबाधेनोपपत्तौ कतिपयपुराणप्रामाण्यबाधस्यायुक्तत्वात् । स्पष्टश्चायमर्थः कौर्मशैवादिषु । यथोक्तम्— 'असंख्याताः स्मृताः कल्पा ब्रह्मविष्णुशिवात्मकाः । कथिताश्च पुराणेषु मुनिभिः कालचिन्तकैः ॥ सात्त्विकेष्वथ कल्पेषु माहात्म्यमधिकं हरेः । तामसेषु महेशस्य राजसेषु प्रजापतेः ॥ क्वचिद्ब्रह्मा क्वचिद्विष्णुः क्वचिद्रुद्रः प्रशस्यते । नानेन तेषामाधिक्यं न्यूनत्वं वा कथंचन ॥ तत्तत्कल्पान्तवृत्तान्तमधिगम्य महर्षिभिः । तानि तानि प्रणीतानि विद्वांस्तत्र न मुह्यति' इति; किंच, अष्टादशपुराणानां दानविधिं वक्तुमुपक्रम्य मध्ये, नन्वष्टादशानां प्रामाण्यं न संभवति परस्परविरोधात्, अतो लोकायतादिवदप्रमाणानामेषां दानेन कथं स्वर्गो भवत्विति शङ्कायां तत्परिहारार्थं प्रवृत्तेनानेन वचनेन यावन्ति दातव्यत्वेनाभिमतानि पुराणानि तावतां प्रामाण्यसमर्थनमेव कर्तुं न्याय्यम्; न तु तन्मध्ये कतिपयानाम्; तथा सति अप्रमाणानामेषामुत्तरदानविधिर्विरुध्येत; तस्मात्परिहृतमेतत् यत्तावद्दूक्तदोष इति ।

यदप्युक्तम्— प्रत्यक्षश्रुतिविरोधादिति, तदपि तुच्छम्; शिवाद्ब्रह्मनारायणयोरुत्पत्तिवर्णनं हि प्रत्यक्षश्रुतिविरुद्धमि-

त्यभिमानः ; स एव भ्रममूलः । अथर्वशिखायाम् 'सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्रास्ते संप्रसूयन्ते सर्वाणि चेन्द्रियाणि सह भूतैर्न कारणं कारणानां धाता ध्याता कारणं तु ध्येयः सर्वैश्वर्यसंपन्नः सर्वेश्वरः शंभुराकाशमध्ये' इति ब्रह्मविष्णुरुद्राणां शिवादुत्पत्तिश्रवणादुदाहृतश्रुतिविरोधे विष्णुपुराणानामपि तुल्ये कथमेकत्र तदुद्भावनम् ? न च 'नारायणाद्रुद्रो जायते' इति श्रुत्या कार्यत्वेनावगते रुद्रे श्रुत्यन्तरेण श्रूयमाणमपि ब्रह्मनारायणकारणत्वम्, 'आत्मन आकाशः संभूतः' इति श्रुत्या कार्यत्वेनावगते भूताकाशे 'सर्वाणि ह वा इमानि भूतानि आकाशादेव समुत्पद्यन्ते' इति श्रुत्या प्रतिपादितं जगत्कारणत्वमिवान्वेतुमनर्हत्वात्तदन्तर्यामिणि परमात्मनि पर्यवस्यतीति न विष्णुपुराणस्य श्रुतिविरोध इति वाच्यम् ; वैपरीत्यस्यापि सुवचत्वात्—अथर्वशिखायां कार्यत्वेन श्रुते विष्णौ श्रूयमाणं जगत्कारणत्वं तत्रान्वयमलभमानं सत्तदन्तर्यामिणि परमशिवे पर्यवस्यतीति । वस्तुतस्तु न कस्यापि पुराणस्य श्रुतिविरोधः ; गुणमूर्तीनामन्योन्यस्मादुत्पत्तिमभिप्रेत्य 'नारायणाद्ब्रह्म' इत्यादिश्रुतयः, परमशिवादुत्पत्तिमभिप्रेत्य 'सर्वमिदम्' इत्यादिश्रुतयः इति सविस्तरं व्यवस्थापितमस्माही-

क्षितैः शिवार्कमणिदीपिकादिषु ॥

यच्चोक्तम्— स्वव्याघातादप्रामाण्यमिति, तदप्येतेनैव निराकृतम्, नारायणाद्रुद्रोत्पत्तिः गुणिरुद्रविषया, त्रिमूर्तीनामुत्पत्तिस्तु परमशिवविषयेति व्यवस्थाभिप्रायकतया स्वव्याघातगन्धस्याप्यभावात् । यच्चोक्तम्—स्वोक्तार्थस्य प्रमाणत्वाभिमतपुराणान्तराननुगृहीतत्वादिति, तदपि तुच्छम्; शिवपुराणप्रतिपाद्यस्य शिवे ब्रह्मनारायणजनकत्वस्य तदुपास्यत्वस्य च परैः केवलमसूयितव्यस्य सर्वसंप्रतिपन्ने महाभारत एव 'योऽसृजद्दक्षिणादङ्गाद्ब्रह्माणं लोकसंभवम् । वामपार्श्वात्तथा विष्णुं लोकरक्षार्थमीश्वरः' इति 'यस्य ब्रह्मा च विष्णुश्च त्वं च शक्र सहामरैः । अर्चयध्वं सदा लिङ्गं तस्मात्पूज्यतरो हि कः' इत्यादिना प्रपञ्चितत्वात् । अपि च भवदभिमते पाद्मे शिवराघवसंवादे गारुडे शिवरहस्यादौ च शिवपुराणोक्तार्थानां सविस्तरतया प्रतिपादनाच्च ॥

यच्चोक्तम्— 'पुराणसंहितां दिव्यां लिङ्गमाहात्म्यसंयुताम्' इति विशेषनिष्ठप्रश्नोपक्रमेण प्रवृत्ततया लिङ्गमाहात्म्ये आग्रहवत्त्वादप्रामाण्यं लैङ्गस्येति, तदपि न युक्तम्; न हि शब्दानां तात्पर्यादन्य आग्रहो नामास्ति, तात्पर्यं च मूर्धाभिषिक्तं प्रामाण्यनिदानमिति कथमप्रामाण्ये विरुद्धो

को भागः स नष्ट इति चेत्, अस्तु, को नेत्याह; न हि वयं तत्रत्यानि वचनान्युदाहरामः । श्रूयमाणा तु या संहिता न तस्यां तदितरनाशप्रयुक्त किंचिदतिशङ्कबीजमस्ति । तदितरभागस्य नष्टतया अनयापि संहितया तद्वदेव नष्टया भवितव्यम्, कस्यचिल्लोपे कस्यचिदलोपे च नियामकाभावात्; श्रूयमाणा तु केनचित्कल्पितेति स्यादनाश्वास इति चेत्, न; अप्रयोजकत्वात्— न हि केनचिल्लुप्तमिति सर्वेण लोप्तव्यम्, केनचिद्वा स्थितमिति सर्वेण स्थातव्यम्; न खलु ऐन्द्रादिव्याकरणनाशनिमित्तस्तिलमात्रोऽप्यनाश्वासः पाणिनीये तव वा मम वास्ति । किं च, एवं सति विष्णुपुराणेऽपि मात्स्यवचनावगतत्रयोविंशतिसहस्रीमध्ये सप्तदशसहस्रीनाशप्रयुक्तो विद्यमानषट्सहस्र्यामनाश्वासो दुष्परिहर एवापतेत् ॥

यच्चोक्तम्— अतिविस्तृततया प्रक्षेपशङ्कास्पदत्वादिति, तद्धि न विविच्य प्रश्नमपि क्षमते; तथाहि— किमतिविस्तृतत्वं नाम, किं स्वत एवाधिकग्रन्थत्वम्? किं वा कल्पग्रन्थसंख्यापेक्षयाधिकसंख्यावत्त्वेनोपलभ्यमानत्वम्? आद्ये सर्वपुराणसाधारण्यान्नेष्टसिद्धिः, द्वितीये त्वसिद्धः; यो हि कल्पग्रन्थसंख्या पुष्कला न लभ्यत इति नष्टकोशोऽभ-

क्षितैः शिवार्कमणिदीपिकादिषु ॥

यच्चोक्तम्— स्वव्याघातादप्रामाण्यमिति, तदप्येतेनैव निराकृतम्, नारायणाद्रुद्रोत्पत्तिः गुणिरुद्रविषया, त्रिमूर्तीनामुत्पत्तिस्तु परमशिवविषयेति व्यवस्थाभिप्रायकतया स्वव्याघातगन्धस्याप्यभावात् । यच्चोक्तम्—स्वोक्तार्थस्य प्रमाणत्वाभिमतपुराणान्तराननुगृहीतत्वादिति, तदपि तुच्छम्; शिवपुराणप्रतिपाद्यस्य शिवे ब्रह्मनारायणजनकत्वस्य तदुपास्यत्वस्य च परैः केवलमसूयितव्यस्य सर्वसंप्रतिपन्ने महाभारत एव 'योऽसृजद्दक्षिणादङ्गाद्ब्रह्माणं लोकसंभवम् । वामपार्श्वात्तथा विष्णुं लोकरक्षार्थमीश्वरः' इति 'यस्य ब्रह्मा च विष्णुश्च त्वं च शक्र सहामरैः । अर्चयध्वं सदा लिङ्गं तस्मात्पूज्यतरो हि कः' इत्यादिना प्रपञ्चितत्वात् । अपि च भवदभिमते पाद्मे शिवराघवसंवादे गारुडे शिवरहस्यादौ च शिवपुराणोक्तार्थानां सविस्तरतया प्रतिपादनाच्च ॥

यच्चोक्तम्— 'पुराणसंहितां दिव्यां लिङ्गमाहात्म्यसंयुताम्' इति विशेषनिष्ठप्रश्नोपक्रमेण प्रवृत्ततया लिङ्गमाहात्म्ये आग्रहवत्त्वादप्रामाण्यं लैङ्गस्येति, तदपि न युक्तम्; न हि शब्दानां तात्पर्यादन्य आग्रहो नामास्ति, तात्पर्यं च मूर्धाभिषिक्तं प्रामाण्यनिदानमिति कथमप्रामाण्ये विरुद्धो

को भागः स नष्ट इति चेत्, अस्तु, को नेत्याह; न हि वयं तत्रत्यानि वचनान्युदाहरामः । श्रूयमाणा तु या संहिता न तस्यां तदितरनाशप्रयुक्तं किंचिदतिशङ्कावीजमस्ति । तदितरभागत्य नष्टतया अनयापि संहितया तद्वदेव नष्टया भवितव्यम्, कस्यचिल्लोपे कस्यचिदलोपे च नियामकाभावात्; श्रूयमाणा तु केनचित्कल्पितेति स्यादनाश्वास इति चेत्, न; अप्रयोजकत्वात्— न हि केनचिल्लुप्तमिति सर्वेण लोप्तव्यम्, केनचिद्वा स्थितमिति सर्वेण स्थातव्यम्; न खलु ऐन्द्रादिव्याकरणनाशनिमित्तस्तिलमात्रोऽप्यनाश्वासः पाणिनीये तव वा मम वास्ति । किं च, एवं सति विष्णुपुराणेऽपि मात्स्यवचनावगतत्रयोविंशतिसहस्रीमध्ये सप्तदशीसहस्रीनाशप्रयुक्तो विद्यमानषट्सहस्रयामनाश्वासो दुष्परिहर एवापतेत् ॥

यच्चोक्तम्— अतिविस्तृततया प्रक्षेपशङ्कास्पदत्वादिति, तद्धि न विविच्य प्रभ्रमपि क्षमते; तथाहि— किमतिविस्तृतत्वं नाम, किं स्वत एवाधिकग्रन्थत्वम्? किं वा कल्पसंख्यापेक्षयाधिकसंख्यावत्त्वेनोपलभ्यमानत्वम् ? आद्ये सर्वपुराणसाधारण्यान्नेष्टसिद्धिः, द्वितीये त्वसिद्धिः; यो हि कल्पग्रन्थसंख्या पुष्कला न लभ्यत इति नष्टकोशोऽभ-

बद्धन्थ इत्युपालभ्यते, तं प्रत्येव कथमुक्तलक्षणमतिविस्तृतत्वमापादनीयम्; इदमन्यद्वा किंचिदस्त्वतिविस्तृतत्वम्, सर्वथापि तत्तत्किं वैष्णवपुराणेषु नास्ति? तत्किं व्यर्थैः पक्षम्यन्तैः परान्भ्रमयसि? आस्तां तावदिदम् ॥

यदप्युक्तम्— विष्णुपुराणं प्रति शिवपुराणोक्तदोषसमकराहित्यात् तत्प्रमाणमिति, तत्र प्रतिज्ञांश एकः साधुः, हेत्वंशस्तु न परीक्षाक्षमः; तथाहि— यत्तावदुक्तं वक्तृगुणरूपमाद्यवैलक्षण्यमुपपादयितुं पुलस्त्यवसिष्ठवरलब्धदेवतापारमार्थ्यज्ञानशालितया शैवपुराणेष्वपि स्वोत्पत्तौ अवतारपदप्रयोगसूचितमहिमशालितया च शिवपुराणवक्तृतामसचतुर्मुखापेक्षया पराशर उत्कृष्ट इति, तद्विचारयामः— वक्ता अत्र किं प्रबन्धप्रणेता कविरभिमतः, उत कविना स्वग्रन्थे स्वप्रतिपाद्यार्थवक्तृत्वेन निबद्धः? आद्ये वैष्णवपुराणानां मत्स्योद्रिक्तचतुर्मुखप्रणीतत्वस्य भवतैवोद्घोषितत्वेन पराशरोत्कर्षवर्णनस्य प्रकृतानुपयोगात्; द्वितीये शिवपुराणवक्तुस्तामसत्वदोष इति वादस्यासंगतिः स्पष्टैव; तत्र हि मत्स्यकूर्मशिवादयो वक्तृत्वेन निबद्धा इति । तथा च पराशरानुग्राहकपुलस्त्यानुपास्यमत्स्यकूर्मादिवक्तृकेभ्यः शिवपुराणेभ्यस्तदुपासकोपासकपराशरवक्तृकत्वमेव विष्णुपुराणस्य म-

भेदपटले— 'त्रयोदशी हरेरर्धमर्धनारी चतुर्दशम्' इति । **स्तोत्रमिति** । गुणिनिष्ठगुणाभिधानं स्तुतिः, तत्साधनीभूतशब्दमात्रं वा । 'दाम्नीशस—' इत्यादिना करणे ष्ट्रन्प्रत्ययः । **तदाचक्ष्वेति** । अधीष्टे लोट् ॥

नारायण उवाच—

अस्ति गुह्यतमं गौरि नाम्नामष्टोत्तरं शतम् ।
शंभोरहं प्रवक्ष्यामि पठतां शीघ्रकामदम् ॥

अस्तीति । वर्तमानव्यपदेशेनेदं द्योतयति— नेमानि नामानि मयेतः परं कल्पनीयानि, किं तु प्रागेव सिद्धान्यधुनापि वर्तन्त इति । गुह्यतमं संवरणीयतमम् । 'शंसिदुहिगुहिभ्यो वेति वक्तव्यम्' इति क्यप् । गुह्यतमत्वं च श्रुतिस्मृतिरहस्यार्थनिबन्धनरूपत्वात् । **नाम्नामिति** । ननु स्तोत्रमाचक्ष्वेति स्तुतिसाधनकथनाध्येषणे नाम्नां कीर्तनमयुक्तम्, नाम्नां यदृच्छाशब्दत्वेन मतभेदेन वाच्यवाचकोभयस्वरूपान्यतरप्रवृत्तिनिमित्तकत्वादिति चेत्, सत्यं नामानि तादृशान्येव; शिवादिपदानि तु योगार्थप्रधानानि; नामव्यपदेशस्तु तत्प्रतिपाद्ययोगार्थानां संज्ञाशब्दप्रवृत्तिनिमित्तभूतसंज्ञिस्वरूपवदसाधारणत्वाभिप्रायः । यद्यपि शिवादिश-

वद्ग्रन्थ इत्युपालभ्यते, तं प्रत्येव कथमुक्तलक्षणमतिविस्तृतत्वमापादनीयम्; इदमन्यद्वा किंचिदस्त्वतिविस्तृतत्वम्, सर्वथापि तत्तत्किं वैष्णवपुराणेषु नास्ति? तत्किं व्यर्थैः पञ्चम्यन्तैः परान्भ्रमयसि? आस्तां तावदिदम् ॥

यदप्युक्तम्— विष्णुपुराणं प्रति शिवपुराणोक्तदोषसप्रकराहित्यात् तत्प्रमाणमिति, तत्र प्रतिज्ञांश एकः साधुः, हेत्वंशस्तु न परीक्षाक्षमः; तथाहि— यत्तावदुक्तं वक्तृगुणरूपमाद्यवैलक्षण्यमुपपादयितुं पुलस्त्यवसिष्ठवरलब्धदेवतापारमार्थ्यज्ञानशालितया शैवपुराणेष्वपि स्वोत्पत्तौ अवतारपदप्रयोगसूचितमहिमशालितया च शिवपुराणवक्तृतामसचतुर्मुखापेक्षया पराशर उत्कृष्ट इति, तद्विचारयामः— वक्ता अत्र किं प्रबन्धप्रणेता कविरभिमतः, उत कविना स्वग्रन्थे स्वप्रतिपाद्यार्थवक्तृत्वेन निबद्धः? आद्ये वैष्णवपुराणानां सत्त्वोद्रिक्तचतुर्मुखप्रणीतत्वस्य भवतैवोद्घोषितत्वेन पराशरोत्कर्षवर्णनस्य प्रकृतानुपयोगात्; द्वितीये शिवपुराणवक्तुस्तामसत्वदोष इति वादस्यासंगतिः स्पष्टैव; तत्र हि मत्स्यकूर्मशिवादयो वक्तृत्वेन निबद्धा इति । तथा च पराशरानुग्राहकपुलस्त्याद्युपास्यमत्स्यकूर्मादिवक्तृकेभ्यः शिवपुराणेभ्यस्तदुपासकोपासकपराशरवक्तृकत्वमेव विष्णुपुराणस्य म-

भेदपटले— 'त्रयोदशी हरेरर्धमर्धनारी चतुर्दशम्' इति । **स्तोत्रमिति** । गुणिनिष्ठगुणाभिधानं स्तुतिः, तत्साधनीभूतशब्दमात्रं वा । 'दाम्नीशस—' इत्यादिना करणे ष्ट्रन्प्रत्ययः । **तदाचक्ष्वेति** । अधीष्टे लोट् ॥

नारायण उवाच—

अस्ति गुह्यतमं गौरि नाम्नामष्टोत्तरं शतम् ।
शंभोरहं प्रवक्ष्यामि पठतां शीघ्रकामदम् ॥

अस्तीति । वर्तमानव्यपदेशेनेदं द्योतयति— नेमानि नामानि मयेतः परं कल्पनीयानि, किं तु प्रागेव सिद्धान्यधुनापि वर्तन्त इति । गुह्यतमं संवरणीयतमम् । 'शंसिदुहिगुहिभ्यो वेति वक्तव्यम्' इति क्यप् । गुह्यतमत्वं च श्रुतिस्मृतिरहस्यार्थनिबन्धनरूपत्वात् । **नाम्नामिति** । ननु स्तोत्रमाचक्ष्वेति स्तुतिसाधनकथनाध्येषणे नाम्नां कीर्तनमयुक्तम्, नाम्नां यदृच्छाशब्दत्वेन मतभेदेन वाच्यवाचकोभयस्वरूपान्यतरप्रवृत्तिनिमित्तकत्वादिति चेत्, सत्यं नामानि तादृशान्येव; शिवादिपदानि तु योगार्थप्रधानानि; नामव्यपदेशस्तु तत्प्रतिपाद्ययोगार्थानां संज्ञाशब्दप्रवृत्तिनिमित्तभूतसंज्ञिस्वरूपवदसाधारणत्वाभिप्रायः । यद्यपि शिवादिश-

न्देषु कानिचिन्नामान्यपि भवन्ति, तथापि तेषु विद्यमानो रूढ्यंशो न विवक्षितः, तेन स्तुतेरभावात्; न हि वाचकशब्दबाहुल्यमात्रमुत्कर्षः, घटादिसाधारण्यात्; परं तु स्तुतिपरेषु वाक्येषु विशदेषु सत्सु नामपदैरेव स्तुतिसाधनं रूढ्यर्थवद्योगार्थस्याप्यसाधारण्यख्यापनाय । प्रवक्ष्यामि प्रथमं वक्ष्यामि । पठतामिति लिङ्गमविवक्षितम् । इत्युक्त्वोपदिदेशेति शेषः । यद्यपि चिच्छक्तिरूपाया अम्बायाः किमप्यविदितं नास्ति, नापि नित्यसिद्धमेकशरीरत्वं कर्मलभ्यम्, तथापि श्रोतॄणां विश्वासजननायाख्यायिकेयं निबद्धा ॥

'ऋषिच्छन्दोदेवताभिः परित्यक्तो भुजंगमः' इति मन्त्रशास्त्रवचनात्तत्रयं दर्शयति—

नारायण ऋषिः । अनुष्टुप्छन्दः । सदाशिवो देवता ।

नारायण ऋषिरिति । मन्त्रद्रष्टेत्यर्थः । अत एव प्रवक्ष्यामीति प्रथमवक्तृत्वमाविष्कृतम् । **अनुष्टुप्छन्द इति** । अष्टाक्षरपादघटितत्वात् । **सदाशिवो देवतेति** । मन्त्रप्रतिपाद्य इत्यर्थः । यद्यपि शिवपदेनोपक्रमात् सदाशिवादुत्तीर्णः षट्त्रिंशत्तमतत्त्वरूपः परमशिव एव प्रतिपाद्यः; यद्वा महेश्वर

चनात् । भुजगवलय इत्यनेन हाररूपमालायाः, भस्मदिग्धाङ्गमित्यनेन गन्धपदप्रतिपाद्याङ्गरागस्य, इन्दोर्मण्डले इत्यनेनासनस्य, चारुचन्द्रार्ध इत्यनेन भूषणस्य च निबद्धत्वात् ॥

शिवो महेश्वरः शंभुः पिनाकी शशिशेखरः ।
वामदेवो विरूपाक्षः कपर्दी नीललोहितः ॥

एवं स्तोत्रप्रतिपाद्यं सदाशिवं मूलभूतपरमशिवाभेदेन स्तोतुं शिवनाम्नोपक्रमते— **शिव इति** । शिवशब्दः शोभनवचनः, 'स्वश्रेयसं शिवं भद्रम्' इत्यमरकोशात् । शिवाः शोभनाः सर्वज्ञत्वादयो गुणा अस्य सन्तीति शिवः । अर्श आदेराकृतिगणत्वादच्प्रत्ययः । हेत्वलंकारविधया अभेदोपचाराद्वा । सर्वज्ञतादयश्चाङ्गाव्ययभेदेन द्विविधाः शिवपुराणागमप्रसिद्धाः । यथोक्तम्— 'सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः । अनन्तशक्तिश्च विभोर्विधिज्ञाः षडाहुरङ्गानि महेश्वरस्य ॥ ज्ञानं विरागतैश्वर्यं तपः सत्यं क्षमा धृतिः । स्रष्टृत्वमात्मसंबोधो ह्यधिष्ठातृत्वमेव च ॥ अव्ययानि दशैतानि नित्यं तिष्ठन्ति शंकरे' इति । यद्यपि परमशिवस्य निष्कलत्वाद्गुणा न भवन्ति 'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्' इति श्रुतेः, वातूलशुद्धे च 'शिवतत्त्वं महासेन नि-

ब्देषु कानिचिन्नामान्यपि भवन्ति, तथापि तेषु विद्यमानो रूढ्यंशो न विवक्षितः, तेन स्तुतेरभावात्; न हि वाचकशब्दबाहुल्यमात्रमुत्कर्षः, घटादिसाधारण्यात्; परं तु स्तुतिपरेषु वाक्येषु विशदेषु सत्सु नामपदैरेव स्तुतिसाधनं रूढ्यर्थवद्योगार्थस्याप्यसाधारण्यख्यापनाय । प्रवक्ष्यामि प्रथमं वक्ष्यामि । पठतामिति लिङ्गमविवक्षितम् । इत्युक्त्वोपदिदेशेति शेषः । यद्यपि चिच्छक्तिरूपाया अम्बायाः किमप्यविदितं नास्ति, नापि नित्यसिद्धमेकशरीरत्वं कर्मलभ्यम्, तथापि श्रोतॄणां विश्वासजननायाख्यायिकेयं निबद्धा ॥

'ऋषिच्छन्दोदेवताभिः परित्यक्तो भुजंगमः' इति मन्त्रशास्त्रवचनात्तत्रयं दर्शयति—

नारायण ऋषिः । अनुष्टुप्छन्दः । सदाशिवो देवता ।

नारायण ऋषिरिति । मन्त्रद्रष्टेत्यर्थः । अत एव प्रवक्ष्यामीति प्रथमवक्तृत्वमाविष्कृतम् । **अनुष्टुप्छन्द इति** । अष्टाक्षरपादघटितत्वात् । **सदाशिवो देवतेति** । मन्त्रप्रतिपाद्य इत्यर्थः । यद्यपि शिवपदेनोपक्रमात् सदाशिवादुत्तीर्णः षट्त्रिंशत्तमतत्त्वरूपः परमशिव एव प्रतिपाद्यः; यद्वा महेश्वर

चनात् । भुजगवलय इत्यनेन हाररूपमालायाः, भस्मदिग्धाङ्गमित्यनेन गन्धपदप्रतिपाद्याङ्गरागस्य, इन्दोर्मण्डले इत्यनेनासनस्य, चारुचन्द्रार्ध इत्यनेन भूषणस्य च निबद्धत्वात् ॥

शिवो महेश्वरः शंभुः पिनाकी शशिशेखरः ।
वामदेवो विरूपाक्षः कपर्दी नीललोहितः ॥

एवं स्तोत्रप्रतिपाद्यं सदाशिवं मूलभूतपरमशिवाभेदेन स्तोतुं शिवनाम्नोपक्रमते— **शिव इति** । शिवशब्दः शोभनवचनः, 'स्वश्रेयसं शिवं भद्रम्' इत्यमरकोशात् । शिवाः शोभनाः सर्वज्ञत्वादयो गुणा अस्य सन्तीति शिवः । अर्श आदेराकृतिगणत्वादच्प्रत्ययः । हेत्वलंकारविधया अभेदोपचाराद्वा । सर्वज्ञतादयश्चाङ्गाव्ययभेदेन द्विविधाः शिवपुराणागमप्रसिद्धाः । यथोक्तम्— 'सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः । अनन्तशक्तिश्च विभोर्विधिज्ञाः षडाहुरङ्गानि महेश्वरस्य ॥ ज्ञानं विरागतैश्वर्यं तपः सत्यं क्षमा धृतिः । स्रष्टृत्वमात्मसंबोधो ह्यधिष्ठातृत्वमेव च ॥ अव्ययानि दशैतानि नित्यं तिष्ठन्ति शंकरे' इति । यद्यपि परमशिवस्य निष्कलत्वाद्गुणा न भवन्ति 'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्' इति श्रुतेः, वातूलशुद्धे च 'शिवतत्त्वं महासेन नि-

ष्कलं त्विति कीर्तितम्' इति वचनाच्च; तथापि 'सृष्ट्यर्थं सर्वतत्त्वानां लोकस्योत्पत्तिकारणात् । योगिनामुपकाराय स्वेच्छया गृह्यते तनूम्' इति, 'तथैव योगिनां चापि ज्ञानिनां मन्त्रिणामपि । जपपूजानिमित्ताय निष्कलं सकलं भवेत्' इति च तत्रैव वातूलशुद्धे वचनात्, तदाश्रितपराशक्तिकल्पितान्गुणानादाय तथा व्यपदेशः । अथवा शिवः स्वयमेव शिवः शोभनत्वात्; शोभनत्वं च सर्वजीववृत्त्याणवकार्मणमायेयाख्यानादिमलत्रयाभावरूपनैर्मल्यलक्षणं शुद्धत्वम् । अणुर्जीवः तस्यानादिजीवतापादकोऽविद्यासंबन्धः आणवं मलम्, अनादिकर्मफलवासनारूपं कार्मणं मलम्, अस्ति प्रकाशते इति व्यवहारसामग्र्यां सत्यां नास्ति न प्रकाशते इति व्यवहारयोग्यत्वरूपमावरणं मायेयं मलमिति सकलशिवागमप्रसिद्धम्; तादृशमलत्रयाभावश्च परमात्मन्यकर्मवश्ये सर्वज्ञे संभवति इति निर्मलता । यथोक्तं वायुसंहितायाम्— 'अथवाशेषकल्याणगुणैकघन ईश्वरः । शिव इत्युच्यते सद्भिः शिवतत्त्वार्थवेदिभिः' इति । तथा 'अनादिमलसंश्लेषप्रागभावात्स्वभावतः । अत्यन्तपरिशुद्धात्मेत्यतोऽयं शिव उच्यते' इति च । तथा तत्रैव प्रदेशान्तरेऽपि 'विशुद्धिः शिवता स्वतः' इति । वातूलशुद्धेऽप्युक्तम्

चाद्याचि रूपम् ; तथा च श्रुतिः—"सर्वमन्यत्परित्यज्य शिव एको ध्येयः शिवंकरः" इति । महाभारतेऽपि 'समा भवन्ति मे सर्वे दानवाश्चामराश्च ये । शिवोऽस्मि सर्वभूतानां शिवत्वं तेन मे सुराः' इति । तदयमत्र संग्रहश्लोकः— शेतेऽस्मिञ्जगदीहते दिशति च श्रेयः प्रजानामसौ शान्तिं याति समस्तमङ्गलगुणग्रामैकसीमायते । इच्छाशक्तिमुपैति निर्मलतरश्चास्ते प्रकृत्येति च व्याचष्टे शिवनाम यस्य विभवं तस्मै परस्मै नमः इति । एवं चात्र यावन्तोऽर्था दर्शितास्तावत्स्वपि तात्पर्यं शिवपदस्यास्ति; स्तुत्यर्थं प्रवृत्ते तस्मिन्बहुप्रकारस्तुतिक्रोडीकारस्य नानाकथाश्लेषकाव्यस्यपदेषु तत्तत्कथोचितार्थक्रोडीकारस्येव गुणत्वात् । एवमेतेषां योगार्थानां रूढिमच्छब्देन प्रतिपादनं रूढिवद्योगार्थानामसाधारण्यख्यापनाभिप्रायकमित्युक्तमेव । केवलयौगिकानां भक्तवत्सलादिपदानामपि रूढनामसंवलितपाठबलादेव तद्वद्योगार्थासाधारण्याभिप्रायकत्वं स्फुटमेव । तथा चात्र साधारणयोगार्थपराणां भक्तवत्सलादिपदानामसाधारण्याभिप्रायस्य यद्यप्यन्येऽपि भक्तवत्सलाः सन्ति, तथापि ते न शिववद्भक्तवत्सलाः, अस्य हि वात्सल्यमन्यादृशमिति दृष्ट्या समर्थने 'भेदकातिशयोक्तिः स्यात्तस्यैवान्यत्ववर्णनम्' इत्युक्तलक्षणा भेदकातिशयो-

ष्कलं त्विति कीर्तितम्' इति वचनाच्च; तथापि 'सृष्ट्यर्थं सर्वतत्त्वानां लोकस्योत्पत्तिकारणात् । योगिनामुपकाराय स्वेच्छया गृह्णते तनूम्' इति, 'तथैव योगिनां चापि ज्ञानिनां मन्त्रिणामपि । जपपूजानिमित्ताय निष्कलं सकलं भवेत्' इति च तत्रैव वातूलशुद्धे वचनात्, तदाश्रितपराशक्तिकल्पितान्गुणानादाय तथा व्यपदेशः । अथवा शिवः स्वयमेव शिवः शोभनत्वात्; शोभनत्वं च सर्वजीववृत्त्याणवकार्मणमायेयाख्यानादिमलत्रयाभावरूपनैर्मल्यलक्षणं शुद्धत्वम् । अणुर्जीवः तस्यानादिजीवतापादकोऽविद्यासंबन्धः आणवं मलम्, अनादिकर्मफलवासनारूपं कार्मणं मलम्, अस्ति प्रकाशते इति व्यवहारसामग्र्यां सत्यां नास्ति न प्रकाशते इति व्यवहारयोग्यत्वरूपमावरणं मायेयं मलमिति सकलशिवागमप्रसिद्धम्; तादृशमलत्रयाभावश्च परमात्मन्यकर्मवश्ये सर्वज्ञे संभवति इति निर्मलता । यथोक्तं वायुसंहितायाम्— 'अथवाशेषकल्याणगुणैकघन ईश्वरः । शिव इत्युच्यते साद्भिः शिवतत्त्वार्थवेदिभिः' इति । तथा 'अनादिमलसंश्लेषप्रागभावात्स्वभावतः । अत्यन्तपरिशुद्धात्मेत्यतोऽयं शिव उच्यते' इति च । तथा तत्रैव प्रदेशान्तरेऽपि 'विशुद्धिः शिवता स्वतः' इति । वातूलशुद्धेऽप्युक्तम्

चाद्याचि रूपम् ; तथा च श्रुतिः—' सर्वमन्यत्परित्यज्य शिव एको ध्येयः शिवंकरः ' इति । महाभारतेऽपि ' समा भवन्ति मे सर्वे दानवाश्चामराश्च ये । शिवोऽस्मि सर्वभूतानां शिवत्वं तेन मे सुराः ' इति । तदयमत्र संग्रहश्लोकः— शेतेऽस्मिञ्जगदीहते दिशति च श्रेयः प्रजानामसौ शान्तिं याति समस्तमङ्गलगुणग्रामैकसीमायते । इच्छाशक्तिमुपैति निर्मलतरश्चास्ते प्रकृत्येति च व्याचष्टे शिवनाम यस्य विभवं तस्मै परस्मै नमः इति । एवं चात्र यावन्तोऽर्था दर्शितास्तावत्स्वपि तात्पर्यं शिवपदस्यास्ति; स्तुत्यर्थं प्रवृत्ते तस्मिन्बहुप्रकारस्तुतिक्रोडीकारस्य नानाकथाश्लेषकाव्यस्थपदेषु तत्तत्कथोचितार्थक्रोडीकारस्येव गुणत्वात् । एवमेतेषां योगार्थानां रूढिमच्छब्देन प्रतिपादनं रूढिवद्योगार्थानामसाधारण्यस्थापनाभिप्रायकमित्युक्तमेव । केवलयौगिकानां भक्तवत्सलादिपदानामपि रूढनामसंवलितपाठबलादेव तद्योगार्थासाधारण्याभिप्रायकत्वं स्फुटमेव । तथा चात्र साधारणयोगार्थपराणां भक्तवत्सलादिपदानामसाधारण्याभिप्रायस्य यद्यप्यन्येऽपि भक्तवत्सलाः सन्ति, तथापि ते न शिववद्भक्तवत्सलाः, अस्य हि वात्सल्यमन्यादृशमिति दृष्ट्या समर्थने ' भेदकातिशयोक्तिः स्यात्तस्यैवान्यत्ववर्णनम् ' इत्युक्तलक्षणा भेदकातिशयो-

क्तिः; भक्तवात्सल्यं शिवस्यैवास्ति अन्यस्य तु कस्यापि नास्ति इत्यपलापदृष्ट्या समर्थने 'योगेऽप्ययोगः संबन्धातिशयोक्तिरितीर्यते' इत्युक्तलक्षणा संबन्धातिशयोक्तिश्च व्यज्यत इति दिक्। सर्वेष्वपि नामसु तत्तद्रम्याद्भुतादिरसस्य परमेश्वरविषयरतिभावाङ्गतया रसवदलंकारो वेदितव्यः। तथास्मिन्नामनि श्लेषालंकार एकः, 'नानार्थसंश्रयः श्लेषो वर्ण्यावर्ण्योभयास्पदः' इति तल्लक्षणात्; स च प्रथमः; वर्ण्यैकविषयत्वात्। तथा शेते अस्मिञ्जगदिति शिवः इति व्युत्पत्तौ प्रसिद्धं यज्जगदतिविस्तृतं तदप्यस्मिञ्शेते असंबाधेन वर्तते इत्यर्थादधिकालंकारः, 'पृथ्वाधेयाद्यदाधाराधिक्यं तदपि तन्मतम्' इति तल्लक्षणात्। अत एव तादृशव्यापकताशालित्वनिबन्धनाद्भुतरसस्य परमेश्वरविषयरतिभावाङ्गतया रसवदलंकारः, 'रसस्य पराङ्गत्वे रसवदलंकारः' इति तल्लक्षणात्। शिवंकर इत्यर्थे कल्याणवाचिनः शिवशब्दस्य तज्जनके लक्षणया प्रयोग इति समर्थने हेत्वलंकारः, 'हेतुहेतुमतोरैक्यं हेतुं केचित्प्रचक्षते' इति तल्लक्षणात्। न च शिवशब्दस्य मङ्गलवाचिनो लक्षणया तद्धेतौ प्रयोगे नपुंसकतैव स्यात् न तु पुंलिङ्गतेति वाच्यम्; लाक्षणिकानां शक्यलिङ्गनियमासिद्धेः, गङ्गायां घोष इत्यादिषु क्वचित्तत्सद्भावेऽपि गुणवचनानां म-

त्वर्थलक्षणायां सर्वेषां पुंयोगलक्षणायां च तादृशनियमाभावस्य सर्वसंप्रतिपन्नत्वात् । न च पुंयोगस्थले न प्रकृतौ लक्षणा, किं तु स्त्रीप्रत्यय एव प्रकृत्यर्थसंबन्धिनीं स्त्रियमाहेति वाच्यम् ; तथा सति 'तस्येदम्' इति तद्धिते नाप्राप्ते आरभ्यमाणेन ङीषा तस्य बाधात्कदापि षाष्ठीति तद्धितान्तरूपासिद्धिप्रसङ्गात् । अतः प्रकृतिरेव यदा तत्साहचर्यात्तत्संबन्धिन्यां स्त्रियां लक्षणया प्रवर्तते, तदा स्त्रीलिङ्गायास्तस्याः स्त्र्यधिकारविहितस्वार्थिको ङीषिति सिद्धान्तः । स्पष्टं चैतत्प्रतिपादितं पुंयोगसूत्रे महाभाष्ये— अतस्मिंस्तच्छब्दश्चतुर्धा भवति, तात्स्थ्यात्ताद्धर्म्यात्तत्सामीप्यात्तत्साहचर्याच्चेत्यादिना । एतच्च पदमञ्जर्यादावपि स्पष्टम् । त्रयाणां चैतेषां संसृष्टिः । यद्वा एकवाचकानुप्रवेशलक्षणः संकरः । यद्यप्येकस्मिन्नेव संसर्गे लक्षणद्वययोगात् यत्रालंकारद्वयम् तत्रैव तयोरेकवाचकानुप्रवेशः संकरः । यथा 'विधुकरपरिरम्भादात्तनिष्यन्दपूर्णैः शशिदृषदुपकल्पैरालवालैस्तरूणाम् । विफलितजलसेकप्रक्रियागौरवेण व्यरचि स हृतचित्तस्तत्र भैमीवनेन' इति । अत्र हि स्फटिकालवालानां चन्द्रिकासंबन्धप्रयुक्तनिष्यन्दवर्णने समृद्धिमद्वस्तुवर्णनरूपोदात्तालंकारस्य असंबन्धे संबन्धरूपाया अतिशयोक्तेश्च सत्त्वात् तयोरेकवाचकानुप्रवेशलक्षणः

संकर इति । इह तु शेतेऽस्मिञ्शिव इति संसर्गे रसवदलंकारः, अस्मिन्संसर्गे संसर्गान्तरे च व्यासज्य वर्तते श्लेषः, संसर्गान्तर एव वर्तते हेत्वलंकार इति वैषम्यम् । तथाप्येकवाचकानुप्रवेशसंकरोऽव्याहत एव । तथाहि— उदाहृतश्लोकेऽपि संकीर्यमाणालंकारयोरधिकरणीभूतसंसर्गैक्यं नोक्तसंकरप्रयोजकम्, तथाहि सति एकवाच्यानुप्रवेशसंकरः सामानाधिकरण्यसंकर इत्यादिरेव व्यपदेशः स्यात्, न तु वाचकैक्यघटितोऽपि । किं तु संकीर्यमाणालंकारयोरधिकरणीभूतसंसर्गोपस्थापकैक्यमेवोक्तसंकरप्रयोजकम्, तस्यैव एकवाचकानुप्रवेशशब्दार्थानुगमात् । तच्च क्वचित्संसर्गैक्ये भवति क्वचित्तद्भेद इत्यन्यदेतत् । प्रकृते एकस्मिंञ्शिवशब्दरूपे वाचके तदुपस्थाप्यसंसर्गद्वयाश्रयतया श्लेषः तदुपस्थाप्यैकसंसर्गनिष्ठतया रसवदलंकारश्चानुप्रविष्टाविति युक्त एव तयोरेकवाचकानुप्रवेशः । असांशयिकस्तु रसवदलंकाराधिकालंकारयोरेकवाचकानुप्रवेशसंकर इत्यलं प्रसक्तानुप्रसक्त्या । इदं च श्रुतिसिद्धं नाम, 'नमः शिवाय च शिवतराय च' 'तस्मात्सर्गगतः शिवः' 'न सन्न चासच्छिव एव केवलः' इत्यादिबहुश्रुतिप्रसिद्धेः । माहात्म्यं चास्य श्रुतिस्मृतिप्रसिद्धम्, 'अपि वा यश्चण्डालः शिव इति

वाचं वदेत्तेन सह संवसेत्तेन सह संवदेत्तेन सह भुञ्जीत' इति श्रुतेः 'यद्द्व्यक्षरं नाम गिरेरितं नृणां सकृत्प्रसङ्गादघमाशु हन्ति तत् । पवित्रकीर्तिं तमलङ्घ्यशासनं भवानहो द्वेष्टि शिवं शिवेतरः' 'महापातकविच्छित्यै शिव इत्यक्षरद्वयम् । अलं नमस्क्रियायुक्तो मुक्तये कल्पते मनुः' इत्यादिस्मृतेश्च । अत एव शिवनाम्नि शिवनामघटिते श्रीमत्पञ्चाक्षरे च जीवरत्नव्यवहारः शिवागमवेदिनाम् । 'तस्मात्सह तया शक्त्या हृदि पश्यन्ति ये शिवम् । तेषां शाश्वतिकी सिद्धिर्नेतरेषामिति श्रुतिः' इति शिवपुराणोक्तरीत्या सकलश्रेयःकारणभूतसर्वतत्त्वोत्तीर्णश्रीसाम्बशिवप्रतिपादकतया च अस्य नाम्नः सर्वातिशायित्वमित्यभियुक्ताः ॥ १ ॥

एवं स्तोत्रप्रतिपाद्यं सदाशिवं कारणभूतपरमशिवाभेदेन स्तुत्वा कार्यभूतमहेश्वराभेदेनापि स्तौति— **महेश्वर इति** । 'ईश ऐश्वर्ये' इति धातोः 'स्थेशभासपिसकसो वरच्' इति कर्तरि वरच्प्रत्यये ईश्वरः महांश्चासावीश्वर इति विग्रहे 'सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः' इति समासः । महत्त्वं चेश्वरे समभिव्याहृतधातूपात्तेशितृत्वद्वारकमसंकुचितविषयत्वरूपम् ; स्वर्गादियत्किंचिदीशितृत्वयोगादीश्वरत्वं हि इन्द्रादीनामप्यस्ति ; यदादाय षड्विंशब्राह्मणे उत्पातशान्तिप्रकरणे इन्द्र-

यमादिषु 'ईश्वराय स्वाहा' इति मन्त्रः प्रवृत्तः; शिवस्तु महेश्वरः तेषामपीश्वरत्वात्, 'ध्येयः सर्वैश्वर्यसंपन्नः सर्वेश्वरः शंभुराकाशमध्ये' इति श्रुतेः; 'सेन्द्रादिषु च देवेषु तस्य त्वैश्वर्यमुच्यते' इति भारतवचनाच्च। एतदभिप्रायमेव च 'महेश्वरश्च भूतानां महतामीश्वरश्च सः' इति भारतवचनम्। महतः प्राणिन इन्द्रादीन्प्रत्यपि यदस्येशितृत्वं वर्तते, इदमेव एतदीयेशितृत्वस्य महत्त्वमिति; न तु महतामीश्वरो महेश्वर इति षष्ठीतत्पुरुषव्युत्पत्त्यन्तरप्रदर्शनपरम्, तथा सति व्यधिकरणत्वादुत्तरपदस्य 'आन्महतः समानाधिकरणजातीययोः' इत्यात्वाभावप्रसङ्गात्। यद्वा ईशितृत्वे महत्त्वम् इतरजनाज्ञया अप्रवर्तनीयेष्वपि कार्येषु प्रवर्तकत्वम्, अङ्गेषु जघन्यस्य गुह्यस्य पूजने केनापि प्रवर्तयितुमशक्ये सर्वलोकप्रवर्तनात्। यथोक्तं भारते—'सत्येन ब्रह्मचर्येण लिङ्गमस्य यथास्थितम्। समर्चयन्ति लोकाश्च महेश्वर इति स्मृतः' इति; अयमर्थः— यथास्थितं लिङ्गरूपेणैव स्थितम्, न तु रूपान्तरेण तिरोहितमपि; एवंभूतं लिङ्गं लोकाः समर्चयन्ति, तच्च न यथाकथंचिदवज्ञया, किं तु सत्येन ब्रह्मचर्येण सत्यब्रह्मचर्यादिसकलनियमोपेतया महत्या भक्त्या पूजयन्ति यतः, अतः इतरदेवतासाध्यकार्यप्रवर्तकतया सर्वत्राप्रति-

हतत्वात् महदीशितृत्वमस्येति महेश्वर इति स्मृतः इति । एतदृष्ट्यैव आनुशासनिकेऽप्यभिहितम्— 'यस्य ब्रह्मा च विष्णुश्च त्वं च शक्र सहामरैः । अर्चयध्वे सदा लिङ्गं तस्माच्छ्रेष्ठतरो हि कः' इति । अयं च महेश्वरः सांख्यानामेव मतभेदेन पुरुषपदवाच्यं पञ्चविंशतितमं तत्त्वम् , ततोऽप्युत्तीर्णं षड्विंशतितमं तत्त्वं वा; उभयथापि श्रुतेः स्मृतेश्च । तत्र प्रथमे तावत् 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' इति श्रुतिः; स्मृतिश्च शिवपुराणे वायवीयसंहितायाम्— 'अथवा त्रिगुणं तत्त्वं मायेयमिदमव्ययम् । मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ॥ मायाविक्षोभकोऽनन्तो महेश्वरसमन्वयात्' इति । योगपातञ्जलेऽपि—'क्लेशकर्मविपाकाशयैरपरामृष्टपुरुषविशेष ईश्वरः' इति पुरुषे ईश्वरपदप्रयोगाच्च । द्वितीयेऽपि वाजसनेयके श्रूयते— 'यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः । तस्य प्रकृतिलीनस्य यः परः स महेश्वरः' इति; अस्यार्थः— यः ईश्वरः वेदादौ स्वरः प्रोक्तः वेदादौ विद्यमानः स्वरः प्रणवः 'प्रणवाद्या मुने वेदाः प्रणवे पर्यवस्थिताः' इति स्मरणात्, स प्रोक्तः 'वाच्यवाचकयोर्भेदो नात्यन्तं विद्यते क्वचित्' इति वचनात् । अत एवाथर्वशिरसि शिवनाम्नां प्रणववाच-

कत्वेन निर्वचनम्, 'तस्य वाचकः प्रणवः' इति योगसूत्रं च प्रणवस्य शिववाचकत्वे प्रमाणम् । वेदान्ते च प्रतिष्ठितः तात्पर्यविश्रान्तिभूमितया स्थितः, वेदान्तसमधिगम्य इति यावत् ; 'तं त्वौपनिषदं पुरुषं पृच्छामि' 'ऋचोऽक्षरे परमे व्योमन्यस्मिन्देवा अधिविश्वे निषेदुः' इति श्रुतेः । तस्य प्रकृतिलीनस्य लीनवल्लीनः भोक्तेत्यर्थः । यो हि यां भुङ्क्ते स तदेकरसत्वात्तस्यामेव लीन इति व्यवह्रियते, एवंभूतस्य पुरुषस्यापि यः परः प्रेरकतयोत्कृष्टः, संबन्धसामान्यविवक्षया षष्ठी, स महेश्वर इति । तथा च वायुसंहितायाम्— 'त्रयोविंशतितत्त्वेभ्यः परा प्रकृतिरुच्यते । प्रकृतेस्तु परं प्राहुः पुरुषं पञ्चविंशकम् ॥ यं वेदादौ स्वरं प्राहुर्वाच्यवाचकभावतः । वेदैकवेद्ययाथार्थ्याद्वेदान्ते च प्रतिष्ठितः ॥ स एव प्रकृतौ लीनो भोक्तायं प्रकृतेर्यतः । तस्य प्रकृतिलीनस्य यः परः स महेश्वरः ॥ तदधीनप्रवृत्तित्वात्प्रकृतेः पुरुषस्य च' इति । यद्वा, त्रिमूर्तितिरोधायकत्वान्महेश्वरः ; सन्ति हि पञ्च कृत्यानि सृष्टिस्थित्युपसंहारतिरोधानानुग्रहरूपाणि सकलतन्त्रपुराणप्रसिद्धानि ; तान्येव ब्रह्मादिपदप्रवृत्तिनिमित्तानीति व्यक्तं शिवपुराणे ; यथोक्तम्— 'शिवो महेश्वरश्चैव रुद्रो विष्णुः पितामहः । संसारवैद्यः सर्वज्ञः

परमात्मेति मुख्यतः ॥ नामाष्टकमिदं तस्य प्रतिपादकमीशितुः । आद्यं तु पञ्चकं तत्र शान्त्यतीताद्यनुक्रमात् ॥ संज्ञा सदाशिवादीनां पञ्चोपाधिपरिग्रहात्' इति । तदर्थलाभप्रकारस्तु 'अशू-व्याप्तौ' इति धातोरन्तर्भावितण्यर्थादाशुत्वोपाधिकादाशु व्यापयति स्वस्मिन्नन्तर्भावयति त्रिमूर्तीरित्यर्थे 'अश्नोतेराशुकर्मणि वरट्च' इत्युणादिसूत्रेण चकारादुपधाया ईत्वविधायिना वरट्प्रत्ययेन ईश्वर इति रूपम् । महत्पदं च सकलजगदुपसंहारकसंहाररुद्राद्विशेषं ख्यापयितुम् । व्याप्तिश्च मरणमित्यागमेषु प्रसिद्धम् , 'गुरोर्व्याप्तिदिनं चैव' इत्यादिना तन्त्रराजादिषु प्रयोगात् । तन्मूलं च व्याप्तस्यात्मनः परिच्छेदधीहेतुशरीराद्यवच्छेदकनाशो मरणम् , तस्मिन्सत्यात्मनो व्याप्तिरप्रतिबद्धा परमात्मनि घटाद्यवच्छेदकनाशे तदवच्छिन्नाकाशस्येव महाकाश इति । एवं च त्रिमूर्त्युपसंहाररूपतुरीयकृत्यसाधक इति फलितम् । अस्य च महेश्वरस्य व्यूहः पञ्चविंशतिमूर्त्यात्मक इति प्रागेव वातूलशुद्धवचनमुदाहृतम् । अस्य च समष्टयभिमानिनो मूर्तिरायुधान्याभरणानि च तत्रैव दर्शितानि । यथा— 'नानारूपधरो देवो नानाभेदसमन्वितः । नानाचिह्नसमोपेतो नानालीलापरो हरः ॥ जटामकुटसंयुक्तमेकवक्त्रं त्रिणेत्रकम् ।

सर्वाभरणसंयुक्तमेवं पद्मासने स्थितम् ॥ वरदाभयहस्तं च मृगीपरशुधारकम् । इदं रूपं महेशस्य रूपभेदमथो शृणु' इति । अत्रेदं तत्त्वम्— अस्ति त्रिमूर्तिजनिका तुरीया ब्रह्मणो मूर्तिः; 'ध्यायीतेशानं प्रध्यायितव्यम्' 'सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्रास्ते संप्रसूयन्ते' इति श्रुतेः । स एव परमशिव इति पुराणागमेषु प्रसिद्धः । स च त्रिधा भिन्नः, परमशिवसदाशिवमहेश्वरभेदात् । तत्र परमशिव एकः, सदाशिवः पञ्चभेदः, शिवसादाख्यामूर्तसादाख्यमूर्तसादाख्यकर्तृसादाख्यकर्मसादाख्यभेदात्; महेश्वरः पञ्चविंशतिभेदः चन्द्रशेखरादिभेदात्— इत्याहत्य परमशिवतत्त्वं त्रिव्यूहमेकत्रिंशद्भेदं च; सर्वं चैतद्वातूलशुद्धे तत्त्वभेदपटले प्रथमे प्रपञ्चितम् । तत्रायं संग्रहश्लोकः— 'शिवमेकं विजानीयात्सादाख्यं पञ्चधा भवेत् । महेशस्तु महासेन पञ्चविंशतिभेदकः ॥ एतद्वै तत्त्वसंयुक्तमेकत्रिंशदिति स्मृतम्' इति; 'एवं तत्त्वं त्रिभेदं तु समासात्परिकीर्तितम्' इति च । तत्र महेश्वरस्य साक्षादेव त्रिमूर्तिजनकत्वं शिवागमेषु शिवपुराणेषु च प्रसिद्धम् । यथोक्तं वातूलशुद्धे— 'महेश्वरसहस्रांशाद्रुद्रदेवसमुद्भवः । महेश्वरस्य कोट्यंशाद्ब्रह्मविष्णुसमुद्भवः' इति । तथा पाद्मे शिवराघवसंवादे— 'य एकः

शाश्वतो देवो ब्रह्मवन्द्यः सदाशिवः । त्रिलोचनो गुणाधारो गुणातीतोऽक्षरोऽव्ययः ॥ जाता सिसृक्षा तस्याथ वीक्ष्यात्मस्थं गुणत्रयम् । दक्षिणादसृजत्पुत्रं ब्रह्माणं वामतो हरिम् ॥ पृष्ठदेशे महेशानं त्रीन्पुत्रानसृजत्प्रभुः' इति । योगाचार्यस्तु भगवान्पतञ्जलिः व्यालाचार्यशब्दितः स्वप्रणीते वैद्यग्रन्थे जगत्सृष्टिकथनावसरे महेश्वराद्रुद्रस्य रुद्राद्विष्णोस्ततो ब्रह्मणश्चोत्पत्तिमाह; तदपि साक्षात्परंपरासाधारण्यात् 'सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्रास्ते संप्रसूयन्ते' इति श्रुत्या न विरुध्यत एव । यथोक्तम्— 'पराच्छिवः शिवाच्छक्तिः शक्तेर्नादसमुद्भवः । नादाद्बिन्दूदयस्तस्मात्सदाशिवसमुद्भवः ॥ सदाशिवान्महेशस्य ततो रुद्रसमुद्भवः । रुद्राद्विष्णुस्ततो ब्रह्मा ततः सर्वमिदं जगत्' इति । परमशिवस्य तु वातूलशुद्धे एकत्वेन कीर्तितस्यापि 'अनुग्रहाय भक्तानां स्वेच्छया गृह्णते तनुम्' इति तत्रैव सूचिततया महाकामेश्वरादयो मूर्तयः काश्चिदतिरहस्याः सन्ति ताश्चोपदेशैकसमधिगम्या इति ग्रन्थे न लिख्यन्ते । संहाररुद्रव्यूहास्तु हरमृडभवाख्या वायुसंहितादिप्रसिद्धाः । अन्याश्च विशालाक्षस्थाणुरुद्रनीललोहितादयः तत्तत्पुराणप्रसिद्धाः; ताश्च यथायथमग्रे दर्शयिष्यन्ते । इदं च श्रुतिप्रसिद्धं नाम, 'मायिनं तु महेश्वरम्'

'तमीश्वराणां परमं महेश्वरम्' 'यः परः स महेश्वरः' इत्यादिश्रुतेः ॥ २ ॥

एवं स्तोत्रप्रतिपाद्यं सदाशिवं तिरोधायकमहेश्वरमूर्त्यात्मनानुसंधाय क्रमप्राप्तसंहारकरुद्रमूर्त्यात्मनानुसंधत्ते— **शंभुरिति** । शमित्यव्ययं सुखवाचि, भवतिश्चान्तर्भावितण्यर्थः, शं सुखं भावयति उत्पादयतीति शंभुः; डुप्रकरणे 'मितद्वादिभ्य उपसंख्यानम्' इति कर्तरि डुप्रत्ययः, शिवंकर इत्यर्थः; 'शिव एको ध्येयः शिवंकरः' इति श्रुतेः । यद्वा, भवतिरयं प्राप्त्यर्थः, शं भवति प्राप्नोति इति शंभुः, प्राग्वदेव डुप्रत्ययः, आनन्दवानित्यर्थः, 'आनन्दं ब्रह्मणो रूपम्' इति श्रुतेः । यद्वा, शं सन् सुखस्वरूपः सन् भवति सत्ताश्रय इति शंभुः, 'सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रुतेः । इदं च नाम सत्त्वप्राधान्यज्ञापकम् ; यथा चेदं तथा सात्त्विक इति नामव्याख्यानावसरे वक्ष्यते । अत एवात्रत्यप्रथमव्याख्यानस्य शिवयतेः पचाद्यचि शिव इति शिवनामव्याख्यानभेदेन गतार्थतायामपि सत्त्वप्रधानतायां बहुसमाख्याप्रमाणोपन्यासपरतया न पौनरुक्त्यम् । यद्वा तत्तन्नामसु संभवदर्थवर्णनस्य ये पुनरुक्ता अर्थास्ते तत्र वात्र वा क्वचिद्विवक्षितव्या इत्यभिप्रायकत्वादपौनरुक्त्यम् । अत्र प्रथमव्या-

ख्यानस्य संहाररुद्रपरत्वम्; अनादौ संसारचक्रे नानायोनिषु परिभ्रमतां जीवानां कतिपयकालविश्रान्तिरूपोपसंहारसुखप्रवर्तकत्वप्रदर्शनादुपपन्नम्, भिषक्कृतव्रणच्छेदो व्रणार्तानामिव शिवकृतोपसंहारः प्रजानां सुखावहत्वाद्दयाकृत्यमिति शिवपुराणवचनात् । यथोक्तं वायवीयसंहितायाम्— 'निदानज्ञस्य भिषजो रुग्णे हिंसां प्रयुञ्जतः । न किंचिदस्ति नैर्घृण्यं घृणैवात्र प्रयोजिका' इति । तथा च महाभारते शान्तिपर्वणि त्रिमूर्त्यन्तर्गते रुद्रे शंभुपदप्रयोगः— 'यं विष्णुरिन्द्रः शंभुश्च ब्रह्मा लोकपितामहः । स्तुवन्ति विविधैः स्तोत्रैर्देवदेवं महेश्वरम् ॥ तमर्चयन्ति ये शश्वदुर्गाण्यतितरन्ति ते' इति । इदं च श्रुतिप्रसिद्धं नाम; 'सर्वेश्वरः शंभुराकाशमध्ये' इति ॥ ३ ॥

अथ क्रमप्राप्तविष्णुमूर्त्यात्मकतां सूचयितुं तत्कृत्यभूतजगद्रक्षाकर्तृत्वेनानुसंधत्ते— **पिनाकीति** । त्रिपुरदहनसमये शरानलज्वालया पिहितवान् नाकं पिनाक इति टीकासर्वस्वे; अपेः पिधानार्थस्यापि निपातानामनेकार्थतया प्रकृते पिधानकर्तृपरस्य 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इति समासे 'वष्टि वागुरिः' इत्यकारलोपे च रूपम् । यद्यपि कटाक्षमात्रेण त्रिपुरं दग्धम्, तथापि शर-

स्थकालाग्न्यादिप्रार्थनया मुक्तेन शरेण दग्धमेव त्रिपुरं पुनर्दग्धमिति पौराणिकोक्तिरुक्तयोगार्थनिर्वाहः । यथोक्तं लिङ्गपुराणे— सोमश्च भगवान्विष्णुः कालाग्निर्वायुरेव च । शरे व्यवस्थिताः सर्वे देवमूचुः प्रणम्य तम् ॥ दग्धमप्यथ देवेश वीक्षणेन पुरत्रयम् । अस्मद्धितार्थं देवेश शरं मोक्तुमिहार्हसि ॥ अथ संसृज्य धनुषा ज्यां हसंस्त्रिपुरार्दनः । मुमोच बाणं विप्रेन्द्रा विकृष्याकर्णमीश्वरः ॥ तत्क्षणात्तत्पुनर्दग्धं त्रिपुरं तच्छरार्चिषा' इति । महाभारते उपमन्यूपाख्यानेऽप्युक्तम्— 'इन्द्रायुधसहस्राभं धनुस्तस्य महात्मनः । पिनाकमिति विख्यातं स च वै पन्नगो महान् ॥ सप्तशीर्षो महाकायस्तीक्ष्णदंष्ट्रो विषोल्बणः । ज्यावेष्टितमहाग्रीवः स्थितः पुरुषविग्रहः ॥ शरश्च सूर्यसंकाशो दृष्टः पाशुपताह्वयः । येन च त्रिपुरं दग्धं सर्वदेवमयः शरः' इति । स च तपस्यतः कण्वस्य शिरःप्रदेशोद्भूताद्वल्मीकादुत्पन्नेन वेणुना शिवविष्णुसोमानुद्दिश्य ब्रह्मणा प्रणीतेषु त्रिषु चापेषु प्रथमः ; यथोक्तमुमामहेश्वरसंवादे— 'युगान्तरे महादेवि कण्वो नाम महामुनिः । स हि दिव्यां तपश्चर्यां कर्तुमेवोपचक्रमे' इत्यारभ्य, 'पिनाकं नाम मे चापं शार्ङ्गं नाम हरेर्धनुः । तृतीयमवशेषेण गाण्डीवमभवद्धनुः । तच्च सोमाय निर्दिश्य ब्रह्मा

लोकं गतः पुनः' इत्यन्तेन । तद्वान्पिनाकीति प्रशंसायां मत्वर्थीय इनिः । प्रशंसा च— 'नमस्ते अस्तु धन्वने' 'अवतत्य धनुस्त्वꣳ सहस्राक्ष शतेषुधे' 'या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः' 'अहंन्बिभर्षि सायकानि धन्वा' इत्यादिश्रुतिप्रसिद्धवैभववत्त्वात् । अथवा, पाति रक्षति जगदिति पिनाकः, 'या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः । तयास्मान्विश्वतस्त्वमयक्ष्मया परिब्भुज' इति श्रुतेः ; 'पिनाकादयश्च' इत्यौणादिकनिपातनेन पातेरौणादिकाकप्रत्ययस्य नुगागमस्य इकारान्तादेशश्च निपातनात्साधुः । तद्वान्पिनाकीति प्राग्वत् । इदं च श्रुतिप्रसिद्धं नाम, 'प्राणेश्वरः कृत्तिवासाः पिनाकी' इति ॥ ४ ॥

शशिशेखर इति । शशाकारो लाञ्छनविशेषः शशः, सोऽस्यास्तीति शशी, स शेखरो यस्येति तथोक्तः । अयं चन्द्रः परमेश्वरस्य ज्ञानरूप इति शिवागमे दर्शितम् । यथोक्तम्— 'ज्ञानचन्द्रकलाचूडं दशदिग्बाहुमण्डलम्' इति । तथा वराहपुराणेऽपि सेनान्यर्थं स्तुवतां देवानां वचनम्— 'जटास्वरूपेण समस्तसागराः कुलाचलाः सिंधुवहाश्च सर्वतः । शशी परिज्ञानमिदं तव स्थितं न देव पश्यन्ति कुदृष्टयो जनाः' इति । चन्द्रस्य च ज्ञानरूपत्वकीर्तनम्, 'सोमो

गौरी अधिश्रितः' इति श्रुत्या 'अहमग्निशिरोनिष्ठस्त्वं सोमशिरसि स्थिता । अग्नीषोमात्मकं विश्वमावाभ्यां समधिष्ठितम्' इति शिवपुराणवचनेन च चिच्छक्तिरूपगौरीशरीरतयावगमितत्वात्तत्तादात्म्याभिप्रायम् ; एवंभूतचन्द्रशेखरत्वोक्त्या स्रष्टव्यजगदुपादानगोचरापरोक्षज्ञानसूचनेन सृष्ट्याख्यं प्रथमं कृत्यं सूचितम् । अथवा सर्वजीवसमष्टिभूतसोमधारकत्वकीर्तनेन वा स्रष्टृत्वसूचनम् । तथात्वं च सोमस्य सर्वशरीरेषु विद्यमानः क्षेत्रज्ञ एव मूर्तामूर्ते द्वे रूपे बभार तस्यामूर्तं रूपं क्षेत्रज्ञः मूर्तं तु रूपं क्षीरोदमथनोद्भूतः सोम इति वराहपुराणे प्रजापालसत्यतपःसंवादे प्रपञ्चितम् । यथोक्तं तत्रैव— 'तस्मिंस्तु मथिते जातः पुनः सोमो महीपते । योऽसौ क्षेत्रज्ञसंज्ञो वै देहेऽस्मिन्पुरुषः परः ॥ स एव सोमो मन्तव्यो देहिनां जीवसंज्ञितः' इति । यद्वा अनेन मृदुहृदयता सूच्यते ; तथाहि— दक्षाध्वरेऽनपराधोऽपि चन्द्रः संभ्रमवशात्क्रुद्धेन वीरभद्रेण इतरैरपराधिभिः सह शिक्षितः ; पश्चात्स्वानपराधितावेदनहृष्टेन परमेश्वरेणादण्ड्यदण्डनदोषशान्तये शिरसा धारित इत्यानुशासनिके उमामहेश्वरसंवादे दर्शितम् । यथोक्तम्— 'सोमस्तत्र मया देवि कुपितेन भयार्दितः । पश्यंश्चानपराधी सन्पादाङ्गुष्ठेन

ताडितः ॥ तथा विनिकृतेनाहं सामपूर्वं प्रसादितः । तन्मे चिन्तयतश्चासीत्पश्चात्तापः पुरा प्रिये । तदा प्रभृति सोमं हि शिरसा धारयाम्यहम् । एवं मे पापहानिस्तु भवेदिति मतिर्मम' इति । इयं च महेश्वरमूर्तिषु प्रथमा मूर्तिः कर्मसादाख्यादुत्पन्ना, 'प्रथमं सोमधारी च' इति, तथा 'इन्दुधार्यादि षण्णां तु कर्मसादाख्यसंभवः' इति वातूलशुद्धवचनात् । इदं च सकलपुराणेतिहासप्रसिद्धं नाम ॥ ५ ॥

वामदेव इति । वामः सुन्दरः, 'मङ्गलायतनं देवं युवानमतिसुन्दरम् । ध्यायेत्कल्पतरोर्मूले सुखासीनं सहोमया' इत्यागमवचनात्; स चासौ देव इति कर्मधारयः । यद्वा वामो वक्रः लोकविलक्षणकपालधारणाद्याचारशाली, स चासौ देव इति प्राग्वत् । अथवा वामं लोकविलक्षणं यथा भवति तथा देवः क्रीडाशाली विस्पष्टपटुवद्वा कर्मधारयः । अथवा वामेन वामार्धेन वामार्धाभिमानिन्या चिच्छक्त्येति यावत्, देवः क्रीडाशाली इति; 'तृतीया तत्कृतार्थेन गुणवचनेन' इति तत्पुरुषः; 'न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च' इति श्रुत्या शिवे औदासीन्यस्य शक्तेः सकलकार्यनिर्वाहकत्वस्य शिवापृथग्भावस्य च

दर्शितत्वेन शिवे जगत्स्रष्टृत्वादिव्यपदेशस्य शक्तिसंबलन-प्रयुक्तत्वौचित्यात् । यथोक्तमभियुक्तैः— 'शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि' इति । अत्र वामो मनोहर इति प्रथम-व्याख्याने 'आत्मनस्तु कामाय सर्वं प्रियं भवति' इति श्रुत्यवगमिताकृत्रिमप्रेमास्पदतालक्षणं सर्वेषामात्मत्वम् 'यो रुद्रो अग्नौ' इत्यादिश्रुतिप्रसिद्धं सूचितम् । वामो लोकविलक्षण इति व्याख्याने तु विश्वोत्तीर्णता सूचिता; लोके हि इष्टलिप्सया अनिष्टपरिजिहीर्षया वा मङ्गलाचारा अनुष्ठीयन्ते; 'विपत्प्रतीकारपरेण मङ्गलं निषेव्यते भूतिसमुत्सुकेन वा । जगच्छरण्यस्य निराशिषः सतः किमेभिराशोपहतात्मवृत्तिभिः' इत्यभियुक्तोक्तरीत्या परमेश्वरस्य स्वच्छन्दाचारे बाधकाभावादिति । वामेन देव इति व्याख्याने तु जगत्सृष्ट्यादिरूपा या क्रीडा वर्तते, तत्रापि न कात्स्न्येन व्यापारः परमेश्वरस्य, किं तु स्वैकदेशीभूतचिच्छक्तिमुखेनेत्यचिन्त्यापरिमितमहिमाधारत्वं सूचितम् । इदं च श्रुतिप्रसिद्धं नाम; 'वामदेवाय नमो ज्येष्ठाय नमः' इति । इदं च सदाशिवव्यूहान्तर्गतायास्तदीयोत्तरवक्त्राभिमानिन्या मूर्तेर्नाम; 'कुङ्कुमक्षोदसंकाशं वामाख्यं वरवेषभृत् । वक्त्रमुत्तरमीशस्य प्र-

तिमायां प्रतिष्ठितम्' इति शिवपुराणवचनात् । एवं चास्या मूर्तेरम्बिकासमानरूपतया शिवपुराणागमेषु श्रवणात्प्राग्व्याख्यातं सौन्दर्यं लोकविलक्षणत्वं चानयापि दिशा समर्थितं भवति ॥ ६ ॥

विरुपाक्ष इति । विरूपाणि विरुद्धस्वरूपाणि लोकविरुद्धत्रित्वसंख्याविशिष्टानीति यावत्; एवंभूतान्यक्षीणि अस्येति बहुव्रीहिः; 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच्' इति षच्प्रत्ययः। त्रिलोचन इत्यर्थः। तथा च श्रुतिः—'त्रिलोचनं नीलकण्ठं प्रशान्तम्' इति। यद्वा, विरूपाणि लोकविलक्षणान्यक्षाणि इन्द्रियाणि चक्षुरादीनि वागादीनि च यस्य, स तथोक्तः। इन्द्रियाणीत्युपलक्षणं धातूनामपि, लोके हि आहंकारिकाणि भौतिकानि वा इन्द्रियाणि, भौतिकाश्च त्वगाद्या धातवः; नैवं परमेश्वरस्य, 'निष्कलं निष्क्रियं शान्तम्' 'अपाणिपादम्— अश्रोत्रम्' इत्यादिश्रुतेः, 'अप्राकृतशरीरं तमतिमन्मथरूपिणम्। घृतरीतिघनीभूतसच्चिदानन्दविग्रहम्' इति शिवपुराणवचनात्, 'नास्य देहेऽस्ति रुधिरं न मांसं नास्थि किंचन। प्रतिबिम्बमिवाकाशे शक्रचापमिवाम्बरे ॥ ज्योतिर्मयतया सिद्धमिदं सादाशिवं वपुः' इति शिवागमवचनाच्च। किं तु अन्यदेव हस्तपादादिरूपेण चिन्तनीयमुपा-

सकैर्यथागमम् । यथोक्तं कामिके— 'चतुर्विंशत्युत्तरं यद्भु-
वनानां शतद्वयम् । भुवनाध्वा स सांचिन्त्यो रोमबृन्दात्मना
विभोः ॥ पञ्चाशद्रुद्ररूपैस्तु वर्णैर्वर्णाध्वकल्पना । असौ त्व-
गात्मना चिन्त्यो देवदेवस्य शूलिनः ॥ सप्तकोटिमहामन्त्रै-
र्मूलविद्यासमुद्भवैः । मन्त्राध्वा रुधिरात्मासौ विचिन्त्यः पा-
र्वतीपतेः ॥ अनेकभेदसंभिन्ना मन्त्राणां पदसंहतिः । पदा-
ध्वासौ पशुपतेः सिरामांसतया स्थितः ॥ पृथिव्यादीनि
षट्त्रिंशत्तत्त्वान्यागमवेदिभिः । उक्तान्यमीभिस्तत्त्वाध्वा शुक्र-
मज्जास्थिरूपधृक्' इति । पुनस्तत्रैव प्रदेशान्तरे 'कामिकं पा-
दकमलं योगजं गुल्फयोर्युगम् । चिन्त्यं पादाङ्गुलीरूपं कारणं
प्रसृतिद्वयं ॥ अजितं जानुनोर्युग्मं दीप्तमूरुद्वयं विभोः । गु-
ह्यबीजात्मकं सूक्ष्मं सहस्रं तु कटीतटम् ॥ पृष्ठभागोंशुमानस्य
नाभिः श्रीसुप्रभेदकम् । विजयं जठरं प्राहुर्निःश्वासं हृदया-
त्मकम् ॥ स्वायंभुवं स्तनद्वन्द्वमनलं लोचनत्रयम् । वीरागमः
कण्ठदेशो रौरवं श्रवणद्वयम् ॥ मकुटं मकुटं तन्त्रं बाहवो
विमलागमाः । चन्द्रज्ञानमुरः शंभोर्विम्बं वदनपङ्कजम् ॥
जिह्वा प्रोद्गीतमीशस्य ललितं गण्डयोर्युगम् । सिद्धं ललाटफ-
लकं संतानं कुण्डलद्वयम् ॥ यज्ञोपवीतं सर्वोक्तं हारस्रक्पा-
रमेश्वरम् । किरणं रत्नभूषाढ्यं वातूलं वसनात्मकम् ॥

एवं तन्त्रात्मकं रूपमीश्वरस्य विचिन्तयेत्' इति । अत्र त्रिलोचन इति प्रथमव्याख्याने 'इच्छाज्ञानक्रियारूपविलसल्लोचनत्रयम्' इति शिवागमवचनाच्छक्तित्रयात्मकत्वं सूचितम् । द्वितीयव्याख्याने तु अप्राकृतविग्रहत्वं स्पष्टमेव । यस्त्वर्थः विरूपाणि सोमसूर्याग्निरूपतया विविधरूपाणि अक्षीणि यस्येति, स उत्तरत्र 'सोमसूर्याग्निलोचनः' इति नाम्ना वक्ष्यत इति नेह लिखितः । इदं च श्रुतिप्रसिद्धं नाम; 'ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमः' 'विरूपाक्षोऽसि दन्ताञ्जिः तस्मै विरूपाक्षाय दन्ताञ्जये' इति ॥ ७ ॥

कपर्दीति । 'पर्व पूर्तौ' इति धातोः संपदादित्वाद्भावे क्विपि 'राल्लोपः' इति वलोपे पर्शब्दः पूर्तिवाची; अन्तर्भावितण्यर्थात्तत एव धातोः कर्तरि वा क्विपि पूरपर्यायः पर्शब्दः; कशब्दो जलवाची, 'मारुते वेधसि ब्रह्मे पुंसि कः कं शिरोम्बुनोः' इत्यमरकोशात् । कस्य पः जलप्रवाहः, स च गाङ्गो विवक्षितः, तेन दायति शुध्यति इत्यर्थे 'दैप् शोधने' इति धातोः 'सुपि स्थः' इत्यत्र सुपीति योगविभागात्सुप्युपपदे आतो धातोः कप्रत्ययो भवतीति कर्तरि कप्रत्यये कपर्द इति रूपम् । शुद्धिश्चात्र नैर्मल्यं न तु पावित्र्यम्; स्वतः पावित्र्यस्य तत्कृतपावित्र्यानपेक्षणात् । यथोक्तं रामायणे—

'पपात जाह्नवी पुण्या पुण्ये रुद्रस्य मूर्धनि' इति । यद्वा, कपः गङ्गाप्रवाह एव, तं दायति शोधयति, 'भवाङ्गपतितं तोयं पवित्रमिति पस्पृशुः' इति रामायणोक्तरीत्या पवित्रीकरोतीत्यर्थे अन्तर्भावितण्यर्थाद्दैपः कर्मण्युपपदे 'आतोऽनुपसर्गे कः' इति कः । अथ वा कपरं गङ्गाप्रवाहं ददाति भगीरथायेति वा कपर्दः, जटानां ग्रन्थिविशेषः, सोऽस्यास्तीति कपर्दी । अत्र प्रथमव्याख्याने गङ्गाधरत्वमात्रपर्यवसाने वक्ष्यमाणगङ्गाधरनाम्ना पौनरुक्त्यात्, तावानपि जलप्रवाहो मार्जनवस्त्रस्थवारिवच्छुद्धिमात्रफलकोऽभूत्, न तु भूमौ निपपातेति पर्यवसानाद्गङ्गातिरोभावलक्षणो महिमा सूचितः । द्वितीये तु 'श्रुताभिलषिता दृष्टा स्पृष्टा पीतावगाहिता । गङ्गा तारयते नृणामुभौ वंशौ विशेषतः' इत्यानुशासनिकवचनप्रतिपन्नस्य तावतोऽपि गङ्गापावित्र्यस्य भगवज्जटास्पर्शः कारणमित्युक्त्या 'एवंविधे कलियुगे दोषाणामेकशोधनम् । महादेवनमस्कारो ध्यानं दानमिति श्रुतिः' इति कौर्मे, 'अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा । यः स्मरेद्देवमीशानं स बाह्याभ्यन्तरः शुचिः' इति शिवधर्मे च प्रसिद्धं शिवस्य सर्वातिशायि पावनत्वं सूचितम् । तृतीयव्याख्याने कानां प्रवाहमेव पुनर्ददातीत्युक्त्या दूर्वाग्रलग्नजलबिन्दुकणिकामात्र-

रूपतया तिरोभावितस्य जलस्य पुनस्तावत्प्रवाहरूपेणाविर्भावनं कृतमित्यप्रतिहतस्वाच्छन्द्यलक्षणमैश्वर्यं सूचितम् । इदं च श्रुतिप्रसिद्धं नाम; 'नमः कपर्दिने च व्युप्तकेशाय च' इति, तथा 'अयं सोमः कपर्दिने' इति च ॥ ८ ॥

नीललोहित इति । नीलश्चासौ लोहितश्चेति 'विशेषणं विशेष्येण बहुलम्' इति समासः । यद्यप्युभे अपि विशेषणे एव, तथापि विशेषणविशेष्यभावे कामचारान्नीलस्य विशेषणताविवक्षया समासः कृतः; 'न हि भवति कृष्णातिला इति प्रयोक्तव्ये तिलकृष्णाः इति' इति महाभाष्योक्तेः द्रव्यगुणसंनिपाते द्रव्यस्य विशेष्यतानियमेऽपि गुणद्वयसंनिपाते विशेषणविशेष्यभावे कामचारस्य सर्वसंप्रतिपत्तेः । पुराकल्पे शिवो मे पुत्रो भूयादिति अभिसंधाय तपस्यन्ब्रह्मा अग्नौ जुहाव, तस्य जुह्वतो ललाटादुद्गतः स्वेदबिन्दुरग्नौ पतित्वा लोहितो भूत्वा पुनर्झटित्येव नीलः सन्नुदतिष्ठत्, ततो भगवान्प्रादुर्बभूवेति शिवपुराणे प्रपञ्चितम् । तदन्ते चायं श्लोकः— 'भूत्वा लोहितमाश्वेव पुनर्नीलमभूत्ततः । नीललोहित इत्येव तेनासावभवत्प्रभुः' इति । यद्वा, नीलः कण्ठावच्छेदेन, लोहितः सर्वाङ्गावच्छेदेनेति नीललोहितः । इदं च सूर्यमण्डलान्तर्वर्तिनो रूपम् 'य एषोऽन्तरादित्ये हिरण्मयः

पुरुषा दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आ प्रणखात्सर्व एव सुवर्णः' इति, 'असौ योऽवसर्पति नीलग्रीवो विलोहितः। उतैनं गोपा अदृशन्नदृशन्नुदहार्यः' इति च श्रुतेः । यद्वा, नीलो वामार्धेन, लोहितो दक्षिणार्धेन च इति स तथा । 'ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्' इति श्रुतेः, 'अर्धपुंलक्ष्णं वन्दे पुरुषं कृष्णपिङ्गलम्' इति च श्रुतेः, अस्याः श्रुतेः भविष्यत्पुराणे वेदपादस्तवे अर्धनारीश्वरपरतया विवरणात् । अथ वा नीला प्रकृतिः, अविद्याया आवारिकायास्तमःप्रधानतया नीलत्वौचित्यात्; लोहितः पुरुषः, तस्य प्रवर्तकतया रजःप्रधानतया लोहितत्वौचित्यात्; उभयात्मकत्वान्नीललोहितः । यथोक्तं लिङ्गपुराणे— 'नीलश्च लोहितश्चैव प्रधानपुरुषान्वयात्' इति । अत्र ब्रह्मललाटजन्यस्वेदादाविर्भूत इति प्रथमव्याख्याने, अयं नीललोहितः संहाररुद्रव्यूहान्तर्गतः ब्रह्मजन्यत्वालिङ्गात्; त्रिमूर्तीनां हि अन्योन्यस्या उत्पत्तिः शिवपुराणप्रसिद्धा । यथोक्तं वायुसंहितायाम्— 'त्रयस्ते कारणात्मानो जाताः साक्षान्महेश्वरात्' इत्युपक्रम्य 'तपसा तोषयित्वा तं पितरं परमेश्वरम् । ब्रह्मनारायणौ पूर्वं रुद्रः कल्पान्तरेऽसृजत् ॥ कल्पान्तरे पुनर्ब्रह्मा रुद्रविष्णू जगन्मयम् । विष्णुश्च भगवांस्तत्र ब्रह्माणमसृजत्पुनः ॥ नारायणं

पुनर्ब्रह्मा ब्रह्माणं च पुनर्भवः । एवं कल्पेषु कल्पेषु ब्रह्मविष्णुमहेश्वराः ॥ परस्परस्माज्जायन्ते परस्परजयैषिणः ' इति । अस्य च रूपं द्रोणपर्वणि कृष्णार्जुनयोः कैलासयात्रायां दर्शितम् । यथा— ' ततः पार्श्वे वृषाङ्कस्य ब्रह्मचारी व्यवर्तत । पिङ्गाक्षस्तपसा श्रेष्ठो बलवान्नीललोहितः ' इति । सूर्यमण्डलान्तर्वर्तीति व्याख्याने, प्रधानपुरुषोभयाधिष्ठातेति व्याख्याने चायं नीललोहितः सदाशिव एव प्रथमोक्तः, यथोक्तं लिङ्गपुराणे—' तेषां भावं समालोक्य मुनीनां नीललोहितः । प्राह गम्भीरया वाचा मण्डलस्थः सदाशिवः ' इति । तथा तत्रैव— ' मण्डले चाग्रतोऽपश्यं देवदेवं सहोमया ' इत्युपक्रम्य, तस्य पूर्वमुखं पीतं प्रसन्नं पुरुषात्मकम् । अघोरं दक्षिणं वक्त्रं नीलाञ्जनचयोपमम् ' इत्यादिना पञ्चब्रह्मात्मकत्वकीर्तनाच्च । अर्धनारीश्वर इति व्याख्याने तु महेश्वरव्यूहान्तर्गतोऽयम् , ' त्रयोदशं हरेरर्धमर्धनारी चतुर्दशम् ' इति वातूलशुद्धवचनात् । इदं च श्रुतिप्रसिद्धं नाम, ' द्रापे अन्धसस्पते दरिद्रन्नीललोहित ' इति ॥ ९ ॥

शंकरः शूलपाणिश्च खट्वाङ्गी विष्णुवल्लभः ।
शिपिविष्टोम्बिकनाथः श्रीकण्ठो भक्तवत्सलः ॥

शंकर इति । शं कल्याणं करोतीति शंकरः, ' शमि धा-

तोः संज्ञायाम्' इत्यच् प्रत्ययः ; अत्र यद्वक्तव्यम्, तत्सर्वम् 'शंभुः' इत्यत्रोक्तम् । इदं च श्रुतिप्रसिद्धं नाम; 'नमः शंकराय च मयस्कराय च' इति ॥ १० ॥

शूलपाणिरिति । शूलं पाणौ यस्य सः शूलपाणिः, 'प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ' इति पाणिशब्दस्य परनिपातः । अस्य च शूलस्य त्रिगुणाद्यात्मकत्वं पाद्मपुराणे दर्शितम् ; यथोक्तम्— 'अथ यज्ञात्मको विष्णुस्त्रिशूलं मनसाकरोत् । गुणावस्थाग्निकालात्मलोकशक्तित्रयात्मकम्' इति । अत एव शिवागमेषु 'त्रैगुण्यं शूलमेतस्य परशुः सत्यनिष्ठता' इति, 'इच्छाज्ञानक्रियारूपास्त्रिशूलं शक्तयो मताः' इति च तदेकदेशोऽनूदितः । एवं चैवंभूतस्य शूलस्य करस्थत्वोक्त्या त्रिगुणात्मिकाया मायाया स्वाधीनत्वमुक्तं भवति । इदं च श्रुतिप्रसिद्धं नाम ; 'ललाटात्त्र्यक्षः शूलपाणिः पुरुषोऽजायत' इति श्रुतेः ॥ ११ ॥

खट्वाङ्गीति । खट्वाया मञ्चस्य अङ्गं पादः सोऽस्यास्त्यायुधत्वेनेति खट्वाङ्गी । खट्वाङ्गायुधत्वं च सदाशिवस्य प्रसिद्धम् ; यथोक्तं कामिके सदाशिवप्रतिष्ठापटले— 'सदेशस्थापनं वक्ष्ये तल्लक्षणपुरःसरम्' इत्युपक्रम्य, 'पिङ्गलाभजटाजूटं दशदोर्दण्डमण्डितम् । अभयं च प्रसादं च

तथा शक्तिं त्रिशूलकम् ॥ खट्वाङ्गं दक्षभागस्थैर्वहन्तं कर-पल्लवैः । भुजङ्गं चाक्षमालां च डमरुं नीलपङ्कजम् ॥ बीज-पूरं च वामस्थैर्वहन्तं सुप्रसन्नम्' इति । 'इच्छाज्ञानक्रिया-रूपास्त्रिशूलं शक्तयो मताः । उक्तास्ता एव खट्वाङ्गं शुद्ध-सत्त्वप्रवर्तिकाः' इति शिवागमवचनेन खट्वाङ्गस्य सत्त्व-प्रवर्तकेच्छादिशक्तित्रयात्मकतया 'महान्प्रभुर्वै पुरुषः सत्त्व-स्यैष प्रवर्तकः' इति श्रुतिसिद्धं सत्त्वप्रवर्तकत्वं सूचितम् । अथ वा ब्रह्मशिरोलवनप्रयुक्तब्रह्महत्याव्रताङ्गतया खट्वाङ्गधा-रीत्यर्थः । ब्रह्महत्याव्रताङ्गखट्वाङ्गधारणं च स्मृतिप्रसिद्धम्, 'खट्वाङ्गं दण्डार्थम्' इत्यापस्तम्बोक्तेः 'कपालपाणिः खट्वाङ्गी ब्रह्मचारी सदोत्थितः । पूर्णैर्द्वादशभिर्वर्षैर्ब्रह्महा प्रतिमुच्यते' इति शान्तिपर्ववचनाच्च । एतेन स्वयमकर्मवश्योऽपि लोक-शिक्षार्थं व्रतमाचरितवानिति सूचनेन लोकानुग्रहैकरसिक इत्युक्तं भवति । एवं च 'शूलपाणिश्च' इति चकारः अप्य-र्थको विरोधं द्योतयति— शूलपाणिरपि खट्वाङ्गीति । 'त्रैगु-ण्यं शूलमेतस्य' इति प्रागुक्तरीत्या शूलपाणिरित्यस्य त्रिगुणातीत-तत्वपर्यवसानेन 'त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन' इति स्मृतेः त्रिगुणातीतया स्वस्य विधिनिषेधागोचरत्वेऽपि लोकशिक्षार्थं खट्वाङ्गधारणरूपव्रतचारीत्यन्वयात् । ननु ब्रह्म-

ण: शिरोलवनमात्रात्कथं ब्रह्महत्याया: प्रसक्ति:? तस्या: ब्राह्मणप्राणवियोजनप्रयोज्यत्वादिति चेत्, भ्रान्तोऽसि, भवन्तमेव पृच्छाम:— अस्तु ब्रह्मण: प्राणवियोजनम्; तथापि कथं तस्या: प्रसक्ति:, ब्राह्मणत्वस्य मनुष्यत्वव्याप्यतया ब्रह्मणो ब्राह्मणत्वाभावात्; अस्तु वा सोऽपि ब्राह्मण:, तथापि तच्छिरोलवितु: शिवस्य कथं प्रत्यवाय:? मनुष्याधिकारत्वात् 'न ब्राह्मणं हन्यात्' इति शास्त्रस्येति । यदि ब्रूषे, प्रत्यवायप्रसक्तिरहितेनापि परमेश्वरेण एवं प्रायश्चित्तमाचरितं यदि, किमु वक्तव्यं मादृशामिति लोकस्य प्रायश्चित्ते प्रवृत्तिसिद्धये तदाचरितमिति, इदमपि तथेति गृहाण— प्राणवियोजनाभावेऽपि शिरोलवनमात्रेण चेद्ब्रह्महत्याव्रतमाचरितम्, किमु वक्तव्यं सर्वथैव वधे इति लोकानां बोधार्थमेवमाचरितमिति । उक्तं चैवं ब्रह्माण्डपुराणे— यद्यप्यमुक्तप्राणोऽसि तथाप्येषोऽनघोऽपि सन् । भिक्षाचरणमात्रेण प्रायश्चित्ती भविष्यति ॥ एवं कृते न केनापि ब्रह्मद्रोह: कृतो भवेत् । इत्युक्त्वा तौ गणेशानौ देवदेवोऽभ्यभाषत ॥ ब्राह्मणा नावमन्तव्या इति लोकस्य कल्पतये । युवां भिक्षाटनं कर्तुं नियुक्तावनघौ मया' इति ॥ १२ ॥

विष्णुवल्लभ इति । विष्णुर्वल्लभ: प्रियो यस्य उपासक-

त्वेनेति वा, विष्णोर्वल्लभः प्रियः स्वयमुपास्यत्वेनेति वा विष्णुवल्लभः । इदं च सौम्रिके पर्वणि अश्वत्थामानं प्रति शिववचनेन दर्शितम्— 'सत्यशौचार्जवत्यागैस्तपसा नियमेन च । क्षान्त्या धृत्या च भक्त्या च कर्मणा मनसा गिरा ॥ यथावदहमाराध्यः कृष्णेनाक्लिष्टकर्मणा । तस्मादिष्टतमः कृष्णादन्यो मम न विद्यते' इति । जलंधरवधार्थं स्वपादाङ्गुष्ठरेखया जनितं सुदर्शनं बहुकालमुपासीनाय विष्णवे शूलं गृहीत्वा शिवो दत्तवानिति चक्रप्रदानानुग्रहमुखेन च विष्णुप्रियत्वं सर्वपुराणप्रसिद्धम् 'चरणाङ्गुष्ठरेखोत्थं जलमध्ये सुदर्शनम् । प्रदाय विष्णवे शूलं स्वयं जग्राह वैष्णवम्' इत्यादिना । अथ वा, विष्णुर्वल्लभः प्रियः स्वात्मत्वेनेति तथा । 'उमासहायं परमेश्वरं प्रभुम्' इत्युपक्रम्य 'स एव विष्णुः स प्राणः' इति श्रुतेः, 'आवयोरन्तरं नास्ति शब्दैरर्थैरुमापते' इत्यादिस्मृतेश्च । अत्र प्रथमव्याख्याने— 'चक्रदानस्वरूपं तु स्मृतमेकोनविंशकम्' इति वातूलशुद्धोक्ता एकोनविंशतितममूर्तिः, द्वितीयव्याख्याने तु विष्णवभेदकीर्तनेन 'त्रयोदशं हरेरर्धम्' इति वातूलशुद्धोक्ता शंकरनारायणात्मिका महेश्वरस्य त्रयोदशीमूर्तिरप्यनुसंहिता ॥ १३ ॥

शिपिविष्ट इति । शिपयः पशवः 'यज्ञो वै विष्णुः पशवः शिपिः' इति श्रुतेः । तेषु विष्टः प्रविष्टः स्वामिभावेन स्थित इति यावत् , 'एषामीशे पशुपतिः पशूनां चतुष्पदामुत च द्विपदाम्' 'इमं पशुं पशुपते ते अद्य बध्नाम्यग्ने सुकृतस्य मध्ये' इति च श्रुतेः । इदं च श्रुतिप्रसिद्धं नाम; 'नमो गिरिशाय च शिपिविष्टाय च' इति ॥ १४ ॥

अम्बिकानाथ इति । अम्बिकाया नाथः पतिरिति वा, अम्बिकां नाथते याचते इति वा, अम्बिकां नाथते आशास्ते इति वा अम्बिकानाथः, अम्बिकाप्रार्थनं शिवस्य तद्वरणार्थं सप्तर्षिप्रेषणेन, तदाशासनं तदर्थतपश्चरणेन च शिवपुराणे गौरीकल्याणप्रकरणे प्रपञ्चितम् । एतेन च 'वैवाह्यं पञ्चमं प्रोक्तम्' इति वातूलशुद्धोक्ता पञ्चमी महेश्वरस्य कल्याणसुन्दरमूर्तिरनुसंहिता । इदं चार्थतः श्रुतिप्रसिद्धं नाम; 'नमो हिरण्यबाहवे हिरण्यवर्णाय हिरण्यरूपाय हिरण्यपतयेऽम्बिकापतय उमापतये पशुपतये नमो नमः' इति ॥ १५ ॥

श्रीकण्ठ इति । श्रीः कालकूटजनिता शोभा, तद्वान्कण्ठो यस्य स तथा; कालकूटजनितमालिन्यमपि शोभैव परमेश्वरस्य, 'विकारोऽपि श्लाघ्यो भुवनभयभङ्गव्यसनिनः' इति न्यायादिति भावः । अथ वा श्रीर्विषमेव, 'श्रीर्वेषरचना-

शोभासंपत्सरलशाखिषु । वाणीलक्ष्मीलवङ्गेषु विषे बिल्वे-ऽप्यथ त्रिषु' इति नानार्थरत्नमालावचनात् । तद्वान्कण्ठो-ऽस्येति प्राग्वत् । अनेन इतरासाध्यकर्मकरत्वं सूचितम् । एतेन 'विषापहरणं रूपमष्टादशमिति स्मृतम्' इति वातूल-शुद्धवचनावगमिता महेश्वरस्याष्टादशी मूर्तिरनुसंहिता ॥

भक्तवत्सल इति । वत्सः कामः इच्छा, तद्वान्वत्सलः; 'वत्सांसाभ्यां कामबले' इति मत्वर्थे लच्प्रत्ययसमवधाने च वत्सशब्दः कामवचनः, भक्तेषु वत्सलः प्रेमशाली भक्त-वत्सलः; तथात्वं चास्य 'मल्लाभान्नापरो लाभस्तेषामस्ति यथा तथा । ममापि लाभस्तल्लाभान्नापरः परमेश्वरि' इत्या-दिशिवपुराणवचनैरावेदितम् । एतेन 'चण्डेशानुग्रहं चैव ततः सप्तदशं स्मृतम्' इति वातूलशुद्धवचनावगमिता चण्डे-श्वरानुग्राहिका सप्तदशी महेश्वरमूर्तिरनुसंहिता ॥ १७ ॥

भवः शर्वस्त्रिलोकेशः शितिकण्ठः शिवाप्रियः ।
उग्रः कपाली कामारिरन्धकासुरसूदनः ॥ ३ ॥

भव इति । भूधातोः सत्तार्थात्कर्तरि पचाद्यच्, भव-त्यस्तीति भवः, सन्नित्यर्थः, 'सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रुतेः । यद्वा अस्तेरिदं रूपम्, अस्त्यस्माद्विश्वमित्यपादाने वा,

अस्त्यस्मिन्विश्वमित्यधिकरणे वा, 'ऋदोरप्' इत्यप्प्रत्यये चिकीर्षिते एव 'अस्तेर्भूः' इति भ्वादेशे भव इति रूपम्; कुसूलात्पचतीत्यादावादानाङ्गपाके पचेरिव आविर्भावाङ्गसत्तायामस्तेर्वर्तनादपादानोपपत्तिः; न च 'श्रिणीभुवोऽनुपसर्गे' इति घञा भाव्यमिति वाच्यम्, तत्र श्रीणीभ्यां साहचर्याद्भौवादिकस्यैव भवतेर्ग्रहणेन अस्तेरप्प्रत्ययस्याप्रतिबन्धात्। एवं च द्वितीयव्याख्याने जगदुपादानत्वम्, तृतीयव्याख्याने जगदाधारत्वं चोक्तं भवति; तथा च श्रुतिः—'यो योनिं योनिमधितिष्ठत्येको यस्मिन्निदं सं च विचैति सर्वम्' 'तमीशानं वरदं देवमीड्यं निचाय्येमां शान्तिमत्यन्तमेति' इति। इदं च जलाधिष्ठात्र्या मूर्तेर्नाम; यथोक्तं शिवपुराणे—'संजीवनं समस्तस्य जगतः सलिलात्मिका। भव इत्युच्यते मूर्तिर्भवस्य परमात्मनः' इति। 'आपो वा इदं सर्वं विश्वाभूतान्यापः' इत्यादिश्रुत्या सर्वात्मत्वेन श्रुतानामपामधिष्ठात्र्या मूर्तेरपि सर्वात्मकतानिर्वाहकजगदुपादानत्वप्रतिपादकभवनामौचित्यात्। यद्यपि 'इयमेव सा या प्रथमा व्यौच्छत्' इति देवीसूक्ते चिच्छक्त्यंशभूतानां देवीनां कृत्यविशेषप्रपञ्चनपरे 'अपामेका महिमानं बिभर्ति' इति श्रुत्या एका चिच्छक्त्यंशभूतानां मध्ये काचिद्देवी अपां महिमानम् 'आपो वा

इदं सर्वम्' इत्यादिश्रुतिप्रतिपन्नजगदुपादानत्वलक्षणं माहात्म्यं बिभर्ति पोषयति स्वसंनिधानेन संपादयति शरीरशरीरिणोरभेदोपचारेण शरीरिधर्मेण शरीरव्यपदेशौचित्यादित्यर्थतात्पर्यकया चिच्छक्तेरेव जलाधिष्ठातृत्वं श्रूयते, तथापि शक्त्यभेदाच्छिवस्यापि तत्पुराणागमेषु वर्णितमित्यविरोधः । लिङ्गपुराणे तु अष्टमूर्तिसमष्ट्यभिमानिन्या मूर्तेर्भव इति नामेत्युक्तम् , यथा— 'अष्टमूर्तिर्जगद्व्याप्य स्थितोऽयं परमेश्वरः । चराचराणां भूतानां धाता विश्वंभरात्मकः ॥ भवश्चेत्युच्यते देवैर्भगवान्वेदवादिभिः' इति । अत एव शर्वादिवदेकतत्त्वाभिमानित्वाविशेषेऽपि पृथिवीमूर्त्यनन्तरभावित्वेऽपि समष्ट्यभिमानित्वमपि भवमूर्तेरस्तीति गौरवादेव आपस्तम्बाश्वलायनबोधायनादिसूत्रेषु शैवादिपुराणेषु कामिकाद्यागमेषु च शूलगवेशानबलिनित्यार्चनादिकर्मसु अष्टनाम्नां मध्ये भवनाम्न एव प्राथम्येन पाठः— 'भवाय देवाय नमः शर्वाय देवाय नमः' इत्यादिना । इदं च श्रुतिप्रसिद्धं नाम ; 'नमो भवाय च रुद्राय च' इति ॥ १८ ॥

शर्व इति । शृणाति हिनस्ति अन्तकाले सर्वमिति शर्वः, 'गृशृभ्यां वः' इत्यौणादिको वप्रत्ययः । इदं च पृथिव्यधिष्ठातृमूर्तेर्नाम । यथोक्तं शिवपुराणे— 'उर्वीशर्वात्मिका मू-

तिरिति शास्त्रस्य निश्चयः' इति । जगदुपसंहारकतया निवर्तकस्वभावस्य निवृत्तिकलात्मकपृथिव्यधिष्ठातृत्वौचित्यात् । इदं च श्रुतिप्रसिद्धं नाम; 'सर्वतः शर्वसर्वेभ्यः' इति ॥

त्रिलोकेश इति । त्रयो लोकाः त्रिलोकाः त्रिलोकानामीशः त्रिलोकेशः । यद्यपि त्रयो लोकाः त्रिलोका इति न लभ्यते, 'दिक्संख्ये संज्ञायाम्' इति नियमात्; नापि त्रित्वयुक्ता लोकाः त्रिलोकाः इति उत्तरपदलोपी शाकपार्थिवादिवत्समासः; स हि विचार्यमाणः पूर्वपदलक्षणामात्राधिकः कर्मधारय एव पर्यवस्यतीति आकरे स्फुटमिति 'दिक्संख्ये' इति नियमादेव तस्यापि व्यावृत्तिसिद्धेः; तथापि त्रिषु लोकेषु ईशः ईशनमस्येति त्रिपदो बहुव्रीहिः व्यधिकरणपूर्वपद इति समाधेयम्; यद्यपि त्रयाणां लोकानां समाहारः त्रिलोकम् इति समाहाराद्विगुनापि एतदर्थलाभः, तथापि पात्रादित्वं परिकल्प्य ङीब्वारणे नियामकाभाव इत्युपेक्षितम् । त्रिलोकीश इति सुगमः पाठः; तथा च श्रुतिः— 'य एको जालवानीशत ईशिनीभिः सर्वान् लोकानीशत ईशिनीभिः एको हि रुद्रो न द्वितीयाय तस्थे य इमाँल्लोकानीशत ईशिनीभिः प्रत्यङ्जनाः संचुकोचान्तकाले संसृज्य विश्वा भुवनानि गोप्ता' इति । एवं च अस्य ईशनं सृष्टिस्थितिसंहारकर्तृत्व-

रूपमिति फलितम् । नियामकत्वलक्षणमपीशितृत्वं भारते शान्तिपर्वणि प्रसिद्धम्-- 'भूयः स भगवान्ध्यात्वा चिरं शूलवरायुधः । तस्य तस्य निकायस्य चकारैकैकमीश्वरम् । देवानामधिपं चक्रे देवं दशशतेक्षणम्' इत्यादिना ॥ २० ॥

शितिकण्ठ इति । शितिर्नीलः कण्ठोऽस्येति शितिकण्ठः; कण्ठनैल्यमत्र न हालाहलप्रयुक्तं विवक्षितम्, येन श्रीकण्ठ इति नाम्ना गतार्थता स्यात् । किं तु क्वचित्कल्पे इन्द्रकृतवज्रप्रहारजनितम् । यथोक्तं हरिवंशे पारिजातहरणावसरे कृष्णकृतबिल्वोदकेश्वरस्तवे— 'दत्तः प्रहारः कुलिशेन पूर्वं तवेशानामरराज्ञातिवीर्य । कण्ठे नैल्यं तेन ते यत्प्रवृत्तं तस्मात्ख्यातस्त्वं नीलकण्ठोऽतिकायः' इति । अतएव श्रुतावपि— 'नमो नीलग्रीवाय च शितिकण्ठाय च' इति । निमित्तभेदसूचनाय एकमेव कण्ठनैल्यं शब्दद्वयेनोपात्तम् । एतेनामोघं वज्रमपि नैल्यमात्रहेतुरासीदिति बलशालिता भक्तवत्सलता वा सूचिता ॥ २१ ॥

शिवाप्रिय इति । शिवा चिच्छक्तिः भगवत्युक्तैः शिवहेतुत्वादिनिमित्तैः; सा प्रिया यस्य स्वात्मभूततयेति शिवाप्रियः; शिवान्तरात्मत्वं च देव्याः 'परास्य शक्तिर्विविधैव

श्रूयते' इति श्रुत्या शुद्धचिदानन्दात्मकस्य शिवस्य शिवागमप्रसिद्धतनुकरणभुवनभोगप्राणक्षेत्रज्ञादिसकलप्रपञ्चनिर्मातृत्वस्य प्रतिपादनात् । यथोक्तमभियुक्तैः— 'शक्तिः शरीरमधिदैवतमन्तरात्मा ज्ञानं क्रिया करणमासनजालमिच्छा । ऐश्वर्यमावरणमायतनानि च त्वं किं तन्न यद्भवसि देवि शशाङ्कमौलेः' इति । यथा चोक्तमस्मद्दीक्षितचरणैः शिवानन्दलहर्याम्— 'शंभोर्ज्ञानक्रियेच्छाबलकरणमनःशान्तितेजःशरीरस्वर्लोकागारदिव्यासनवरमहिषी भोग्यवर्गस्वरूपा । सर्वैरेतैः स्वरूपैः स्वयमपि च परब्रह्मणस्तस्य शक्तिः सर्वाश्चर्यैकभूमिर्मुनिभिरभिनुता वेदतन्त्राभियुक्तैः' इति । अनेन च शरीरिशरीरभावप्रतिपादनेन नित्याविनाभावः सूचितः, तेन च अम्बिकानाथ इत्यनेन गतार्थता परिहृता । तथा हि— अम्बिकानाथ इत्यनेन गौरीविवाहसूचकेन 'वैवाह्यं पञ्चमं विद्यात्' इति वातूलशुद्धोक्ता महेश्वरव्यूहगता पञ्चमी मूर्तिरनुसंहिता । शिवाप्रिय इत्यनेन तु शिवाविनाभावपर्यवसन्नेन 'प्रथमं सोमधारी च द्वितीयमुमया सह' इति वातूलशुद्धोक्ता उमासहायाख्या महेश्वरस्य द्वितीया मूर्तिरनुसंहितेति भेदात् । इदं चार्थतः श्रुतिप्रसिद्धं नाम ; 'उमासहायं परमेश्वरं प्रभुम्' इति ॥ २२ ॥

उग्र इति। 'उच समवाये' इति धातोः संबन्धमात्रार्थात् उच्यति सर्वेषामुपरि वर्तत इति वा, उत्पूर्वाद्वृच्छतेः उद्वृच्छति विश्वस्मादूर्ध्वं वर्तते विश्वोत्तरो भवतीति वा उग्रः, 'ऋज्रेन्द्राग्रवज्रविप्रकुब्रचुब्रक्षुरखुरभद्रोग्रभेरभेलशुक्रशुक्लगौरवन्रेरामालाः' इत्यौणादिकनिपातनात्साधुः; उग्रशब्दश्चोत्कृष्टवाची श्रुतौ प्रसिद्धः 'उग्रोऽस्युग्रोऽहं सजातेषु भूयासम्' इत्यादौ। एवं च विश्वाधिक इति पर्यवसितोऽर्थः। तथा च श्रुतिः— 'विश्वाधिको रुद्रो महर्षिः' इति। उग्र इति च वायोरधिष्ठात्री मूर्तिरुच्यते। यथोक्तं शिवपुराणे—'स्पन्दयन्पवनो विश्वं बिभर्ति स्पन्दते च यत्। उग्र इत्युच्यते सद्भिर्मूर्ती रुद्रस्य वेधसः' इति। अस्यार्थः— प्रायेण संबन्धस्य कर्मजन्यतया संबन्धहेतुभूतस्पन्दकारकतया तादृशस्पन्दाश्रयतया च वायोस्तदधिष्ठातृमूर्तेरपि संबन्धार्थकधातूत्पन्नोग्रपदवाच्यतौचित्यादिति। इदं च श्रुतिप्रसिद्धं नाम; 'नम उग्राय च भीमाय च' इति ॥ २३ ॥

कपालीति। कपालं ब्रह्मकपालमस्यास्तीति कपाली, एतेनानेकब्रह्मात्ययदर्शित्वलक्षणं सनातनत्वमुक्तं भवति। यद्वा, ब्रह्मशिरोलवनसूचनेन ब्रह्मापेक्षया बलाधिकत्वं सूचितम्। यथोक्तमस्मदीक्षितैर्ब्रह्मतर्कस्तवे— 'कल्पान्तरद्रुहिण-

कोटिकरोटिमालाभस्माङ्गरागकमठाङ्गवराहशृङ्गैः । आकल्प एव तव मङ्गलविग्रहस्य सर्वोत्तरं किमु बलं शिव न व्यनक्ति' इति । एतेन कङ्कालनाथाख्या 'कङ्कालं षोडशं भवेत्' इति वातूलशुद्धवचनावगता षोडशी महेश्वरमूर्तिरनुसंहिता ॥ २४ ॥

कामारिरिति । कामस्य मन्मथस्य अरिः कामारिः, मदननिग्राहकत्वं च शिवस्य सर्वपुराणप्रसिद्धम् ; तेन च 'ज्ञानं विरागतैश्वर्यम्' इति श्लोकोक्तं वैराग्याख्यं द्वितीयमव्ययं सूचितम् । यद्वा, कामः कामना अरिर्यस्य, यत्प्राप्तौ विरोधिनी कामना स कामारिरित्यर्थः । यथोक्तं शिवपुराणे— 'फलोद्देशेन देवेशि लघुर्मयि समाश्रयः । फलार्थी तदभावे मां परित्यक्तुं क्षमो यतः' इति । कौर्मेऽपि ईश्वरगीतायाम्— 'त्यक्त्वा पुत्रादिषु स्नेहं विशोको निष्परिग्रहः । यावज्जीवं विरक्तः सँल्लिङ्ग एवार्चयेच्छिवम् । एकेन जन्मना तस्य ददाम्यन्ते परं पदम्' इति । शिवधर्मेऽपि अष्टविधभक्तिनिरूपणावसरे— 'मद्भक्तजनवात्सल्यं पूजायाश्चानुमोदनम् । स्वयमभ्यर्चनं भक्त्या मदर्थे चाङ्गचेष्टनम् ॥ मत्कथाश्रवणे सक्तिः स्वरनेत्राङ्गविक्रिया । ममानुस्मरणं नित्यं यश्च मां चोपजीवति ॥ योगी वाप्यथवायोगी विरक्तः कामुकोऽथवा'

इत्यादि । तत्सर्वं क्रमेण वैराग्यसंपादनद्वारा मोक्षफलकत्वाभिप्रायम् । अनेन च 'कामारिं सप्तमं विद्यात्' इति वातूलशुद्धोक्ता महेश्वरस्य सप्तमी मूर्तिरनुसंहिता ॥ २५ ॥

अन्धकासुरसूदन इति । कदाचिल्लीलार्थं देव्या शिवस्य नयनपिधाने कृते सर्वतः प्रवृत्तात्तमसः उद्भूतोऽसुरः कश्चिदन्धको नाम ; स च देवीकृतनेत्रपिधानप्रयुक्ततमःसमुद्भूतत्वाद्देव्या पुत्रत्वेन परिगृहीतः ; एवंभूतस्यापि तस्य तामसत्वस्वाभाव्याद्रोग्धुमेव बुद्धिरासीत् ; ततश्च त्रैलोक्यं तेनापहृतम् ; अम्बायाश्च द्रोहः कृतः ; ततो भगवता भैरवेण महता युद्धेन निगृह्य शूलाग्रे प्रोतो ललाटाग्निना चिरं तापितः ; कृतप्रायश्चित्तोऽभूदिति दृष्ट्वा देव्या प्रथमं पुत्रत्वेन परिगृहीत इति दयया गणाधिपत्ये स्थापितः इति कृत्स्नेन वामनपुराणेन प्रपञ्चितम् । तदिदमुच्यते— अन्धकासुरसूदन इति । नन्द्यादित्वाल्ल्युः ; न तु 'अनुदात्तेतश्च हलादेः' इति युच्, 'सूददीपदीक्षश्च' इति प्रतिषेधात् । यद्वा युजेव ; न च प्रतिषेधो बाधकः, 'न यः' इति योगविभागेन तस्यानित्यत्वज्ञापनात् । एतेन प्रपञ्चद्रोग्धर्यपि देवी पुत्राभिसंधिमकरोत् इति गुणमेव पुरस्कृत्य दया कृतेति गुणैकपक्षपातित्वं सूचितम् ॥ २६ ॥

गङ्गाधरो ललाटाक्षः कालकालः कृपानिधिः ।
भीमः परशुहस्तश्च मृगपाणिर्जटाधरः ॥ ४ ॥

गङ्गाधर इति । धरतीति धरः, गङ्गायाः धरः गङ्गाधरः । गङ्गा चात्र हैमवती कुटिलापरनामधेया ब्रह्मशापासादितजलभावा वामनपुराणप्रसिद्धा, यद्धारणाय भगीरथेन शिवः प्रसादितः । एतेन भक्तवश्यत्वम्, इतरासाध्यकर्मकरत्वं च सूचितम् । गङ्गाधारणस्येतरासाध्यत्वं च आरण्यपर्वणि भगीरथं प्रति गङ्गावचनेन दर्शितम्— 'करिष्यामि महाराज वचस्ते नात्र संशयः । वेगं तु मम दुर्धर्षं पतन्त्या गगनात्क्षितौ ॥ न शक्तस्त्रिषु लोकेषु कश्चिद्धारयितुं नृप । अन्यत्र विबुधश्रेष्ठान्नीलकण्ठान्महेश्वरात्' इति । यथोक्तमस्मदीक्षितैश्च ब्रह्मतर्कस्तवे— 'गङ्गा धृता न भवता शिव पावनीति नास्वादितो मधुर इत्यपि कालकूटः । संरक्षणाय जगतां करुणातिरेकात्कर्मद्वयं कलितमेतदनन्यसाध्यम्' इति ॥ २७ ॥

ललाटाक्ष इति । ललाटे अक्षि यस्य स ललाटाक्षः । लोकप्रसिद्धस्थानापेक्षया उन्नतस्थानवर्तिलोचनशालित्वकीर्तनेन विश्वोत्तरज्ञानशालित्वं सूचितम् ॥ २८ ॥

कालकाल इति । कालयति नाशयतीति व्युत्पत्त्या कालो यमः, तस्यापि कालः, कालयिता उपसंहारक इति द्वितीयः कालशब्दः केवलयौगिकः; प्रथमस्तु योगरूढः । अथवा द्वावपि यौगिकावेव, तत्र प्रथमः कालशब्दः उपसंहारप्रवृत्तिनिमित्तकतया अन्तककालरुद्रादिपरः द्वितीयस्तु प्राग्वदेव । यद्वा पक्षद्वयेऽपि द्वितीयकालशब्दोऽन्तकपर एव उपसंहारके गौणः । अत्र प्रथमव्याख्याने मार्कण्डेयार्थकालनिग्रहकथासूचनेन भक्तरक्षकत्वम्, द्वितीयव्याख्याने 'विश्वस्यैकं परिवेष्टितारम्' इति श्रुतिसिद्धं सर्वोपसंहारकत्वलक्षणं सर्वेश्वरत्वं सूचितम् । एतेन च 'कालकालमथाष्टमम्' इति वातूलशुद्धवचनावगता महेश्वरस्याष्टमी मूर्तिरनुसंहिता भवति । इदं च श्रुतिप्रसिद्धं नाम; 'ज्ञः कालकालो गुणी सर्वविद्यः' इति ॥ २९ ॥

कृपानिधिरिति । कृपा परदुःखप्रहाणेच्छा, तस्या निधिरित्यनेन सदा वर्तमानत्वमुक्तं भवति; तच्छिवस्य श्रुतिप्रसिद्धम् 'अर्हन्निदं दयसे विश्वमभ्वुवम्। न वा ओजीयो रुद्र त्वदस्ति' इति ॥ ३० ॥

भीम इति । बिभेत्यस्मादिति भीमः, 'भीमादयोऽपादाने' इति निपातनात्साधुः । सर्वनियन्तुः शिवाद्भीत्यैव

सर्वेषां स्वस्वमर्यादायां वर्तनात् । तथा च श्रुतिः— 'यदिदं किं च जगत्सर्वं प्राण एजति निःसृतम् । महद्भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवन्ति' इति । लैङ्गेऽपि 'निर्देशेन शिवस्यैव भेदैः प्राणादिभिर्निजैः । बिभर्ति सर्वभूतानां शरीराणि प्रभञ्जनः ॥ हव्यं वहति देवानां कव्यं कव्याशिनामपि । पाकं च कुरुते वह्निः शंकरस्यैव शासनात्' इत्यादि । इदं च गगनाधिष्ठात्र्या मूर्तेर्नाम; यथोक्तं शिवपुराणे— 'सर्वावकाशदा सर्वव्यापिका गगनात्मिका । मूर्तिर्भीमस्य भीमाख्या भूतबृन्दस्य भेदिका' इति । अस्यार्थः— सर्वावकाशदा सर्वेषां प्रवेशनिर्गमोचितावकाशप्रदा, सर्वव्यापिका विभुत्वात्, भूतबृन्दस्य पृथिव्यादिचतुष्कस्य भेदिका पञ्चीकरणप्रक्रियया स्वानुप्रवेशेन व्यावर्तिका इति । सर्वभयहेतुत्वे सर्वान्तर्यामित्वं मूलम्, तच्च सर्वव्यापकतानिबन्धनम्, इति सर्वव्यापकगगनाधिष्ठातृमूर्तेर्भीमपदवाच्यत्वमुचितमिति । इदं च श्रुतिप्रसिद्धं नाम; 'नम उग्राय च भीमाय च' इति ॥ ३१ ॥

परशुहस्त इति । परशुरायुधविशेषः, स हस्तेऽस्येति बहुव्रीहिः, 'प्रहरणार्थेभ्यः' इति हस्तशब्दस्य परनिपातः । 'त्रैगुण्यं शूलमेतस्य परशुः सत्यनिष्ठता' इति प्रागुदाहृत-

शिवागमवचनेन 'सत्यकामः सत्यसंकल्पः' इति श्रुतिसिद्धममोघचरितत्वलक्षणं सत्यनिष्ठत्वम्, सत्ये निष्ठा निश्चलावस्थानं स्थैर्यं यस्येति विग्रहे सत्यानतिलङ्घित्वलक्षणम्, 'सत्येनैनं तपसा योऽनुपश्यति' 'सत्यशौचार्जवत्यागैस्तपसा नियमेन च । क्षान्त्या धृत्या च भक्त्या च कर्मणा मनसा गिरा ॥ यथावदहमाराध्यः कृष्णेनाक्लिष्टकर्मणा । तस्मादिष्टतमः कृष्णादन्यो मम न विद्यते' इत्यादिश्रुतिस्मृतिसिद्धसत्यप्रियताव्याप्यं वा सत्यनिष्ठत्वं सूचितम् ॥ ३२ ॥

मृगपाणिरिति । मृगवान्मृगः, एवंभूतः पाणिरस्येति मृगपाणिः; स च मृगो दारुकावने मुनिकृताभिचारप्रवृत्त इति स्कान्दे । यथोक्तम्— 'ततो मृगः समुत्थाय शिग्रमागच्छदम्बरात् । सर्वाञ्ज्ञानविहीनांस्तान्मृगतुल्यानिव ब्रुवन् ॥ आदाय वामहस्तेन दधारेशश्च निश्चलम्' इति । मन्त्रशास्त्रे तु वेदरूप इति प्रसिद्धम् । यथोक्तं मृत्युंजयध्याने— 'स्वकरकलितमुद्रापाशवेदाक्षमालम्' इति । अत्र वेदो मृगः, ग्रन्थान्तरे 'मुद्रापाशमृगाक्षसूत्रविलसत्पाणिं हिमांशुप्रभम्' इति समानप्रकरणे स्पष्टतयाभिधानात् । यद्वा मृगयतेरदन्ताद्धञ् मृगः, मार्गणं याचनम् । तथा चामरः— 'मार्गणं मृगया मृगः' इति । तत्प्रधानः पाणिरस्येति मृगपाणिः । एतेन

वैराग्यं सूच्यते । यद्वा भिक्षाटनकथासूचनेन मुनिजनानुग्राहकत्वं सूच्यते ॥ ३३ ॥

जटाधर इति । जट संघाते, ततः पचाद्यच् , जटाः संहतकेशाः तासां धरो जटाधरः, एतेन जटाधरणस्य तपोऽङ्गतया तपोरूपं चतुर्थमव्ययं सूच्यते । यद्वा तीर्थेषूत्तमा महानद्यः सागराश्च ; यथोक्तमानुशासनिके उमामहेश्वरसंवादे— 'यास्तु लोके महानद्यस्ताः सर्वास्तीर्थसंज्ञिताः । समुद्राश्च महातीर्थं पावनं परमं शुभम्' इति । ताश्च महानद्यः प्रायेण कुलाचलोद्भवाः ; तथा च तादृशकुलाचलसमस्तसागरात्मकजटाधारितया सर्वतीर्थाधार इति सूचितम् । जटानां च तथात्वं वराहपुराणे दर्शितम् । 'जटाम्बरूपेण समस्तसागराः कुलाचलाः सिंधुवहाश्च सर्वशः । शशी परिज्ञानमिदं तव स्थितं न देव पश्यन्ति कुदृष्टयो जनाः' इति । एवं शिवस्य सर्वतीर्थाधारत्वाच्छिवानुस्मरणपूर्वकमेव कृता तीर्थयात्रा फलतीत्यभिप्रेत्योक्तमानुशासनिके उमामहेश्वरसंवादे तीर्थयात्राविधिप्रकरणे— 'बहिरेव शुचिर्भूत्वा तत्तीर्थं मन्मना विशेत्' इति । इदं च दक्षाध्वरे क्रतुमृगानुसारिमूर्तेरर्धभूतायाः यज्ञवाटस्थमूर्तेर्नाम ; यथोक्तं वामनपुराणे— 'तमेवानुससारेशश्चापमायम्य वेगवान् । शरं पाशुपतं

कृत्वा कालरूपो महेश्वरः । अर्धेन यज्ञवाटान्ते जटाधर इति श्रुतः' इति ॥ ३४ ॥

कैलासवासी कवची कठोरस्त्रिपुरान्तकः ।
वृषाङ्को वृषभारूढो भस्मोद्धूलितविग्रहः ॥

कैलासवासीति । अस्यतेऽस्मिन्नित्यासः, अधिकरणे घञ्, आवासस्थानमित्यर्थः; केलीनां विलासानां समूहः कैलम्, भिक्षादित्वादण्प्रत्ययः, कैलस्यासः कैलासः शिवालयः । स च हिमवन्मेरुमन्दरादिषु वैकुण्ठादुपरिभागे च विद्यमानः कर्मनिष्ठाभिगम्यः पुनरावृत्त्यपादानभूत इति सकलपुराणप्रसिद्धः । तत्र हिमवति विद्यमान आरण्यपर्वण्युत्तररामायणे च प्रसिद्धः, मेरुमन्दरादिवर्ती कूर्मपुराणप्रसिद्धः, वैकुण्ठादूर्ध्ववर्ती तु स्कान्दे काशीखण्डे दर्शितः । यथा— 'उपरिष्टात्क्षितेरष्टौ कोटयः सत्यमीरितम् । सत्यादुपरि वैकुण्ठो योजनानां प्रमाणतः ॥ द्युलोकात्परिसंख्यातः कोटिषोडशसंमितः । यत्रास्ते श्रीपतिः साक्षात्सर्वेषामभयप्रदः ॥ ततस्तु षोडशगुणः कैलासोऽस्ति शिवालयः । पार्वत्या सहितः शंभुर्गजास्यस्कन्दनन्दिभिः ॥ यत्र तिष्ठति विश्वेशः सकलः स परः स्मृतः' इति ।

वायवीये तु तस्य कैलासपदप्रवृत्तिनिमित्तभूतसकलभोगास्पदत्वमपि सूचितम्। यथा—'ज्ञेयं विष्णुपदादूर्ध्वं दिव्यं शिवपुरं महत् । भोगसंस्थानमतुलं कर्मयोगरतात्मनाम् ॥ अप्रमेयगुणैः सर्वैर्विमानैः सर्वगामिकैः । असंख्यैस्तत्पुरं व्याप्तं सर्वप्राण्युपकारकैः' इत्यादिना 'सर्वेषां शिवभक्तानां तत्पुरं परिकीर्तितम्' इत्यन्तेन । अन्यश्च ततोऽप्यूर्ध्ववर्ती ध्यानयोगनिष्ठैकगम्यः पुनरावृत्तिरहितो नित्यः शिवधर्मोत्तरे दर्शितः परमशिवलोकाख्यः । यथा— 'ऊर्ध्वं शिवपुरात्तस्मात्स्थानत्रयमनुत्तमम् । नित्यं परमशुद्धं च स्कन्दोमाशंकरास्पदम्' इत्युपक्रम्य, 'ये संप्राप्ताः परं स्थानं ध्यानयोगरता नराः । न तेषां पुनरावृत्तिर्घोरे संसारसागरे । सर्वज्ञाः सर्वदा शुद्धा परिपूर्णा महेश्वराः ॥ शिवतुल्यबलोपेता परं शिवपुरं गताः' इत्यन्तेन । तेषु कैलासेषु वस्तुं शीलमस्यास्तीति कैलासवासी ॥ ३५ ॥

कवचीति । कवचवान्कवची, कवचवत्त्वं च न प्राकृतं कवचमादाय, 'नास्य देहेऽस्थि रुधिरं न मांसम्' इत्यादिप्रागुदाहृतवचनात्; किं तु स्वातन्त्र्यमादाय, 'सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः । अनन्तशक्तिश्च विभोर्विधिज्ञाः षडाहुरङ्गानि महेश्वरस्य' इति शिव-

पुराणवचनेन चतुर्थस्थानगतस्य स्वातन्त्र्यस्य चतुर्थाङ्गभूतकवचत्वोपपादनात् । युक्तं च स्वातन्त्र्यस्य कवचत्वम् ; कवचस्य हि द्वे प्रयोजने—परैरदृश्यत्वं परप्रयुक्तबाणाद्यस्पृश्यत्वं चेति । अत एवागमेषु आवाहितस्य देवस्य विघ्नैरस्पृश्यत्वं पाषण्डादिभिरदृश्यत्वं च साधयितुं कवचेनावकुण्ठनं विधीयते । एवं च परमेश्वरस्य सर्वादृश्यत्वं सर्वदुष्प्रापत्वं च स्वातन्त्र्यैकमूलम् 'लोकवत्तु लीलाकैवल्यम्' इति सूत्रप्रतिपन्नलीलारूपस्य स्वस्वरूपदर्शनस्पर्शनासमर्थजगत्सर्गस्य तथाविधपरमेश्वरेच्छां विना कारणान्तराभावेन कवचफलके स्वातन्त्र्ये कवचव्यपदेशौचित्यात् । तस्मादप्रतिहतस्वातन्त्र्यशालीत्युक्तं भवति । इदं च श्रुतिप्रसिद्धं नाम ; 'नमो बिल्मिने च कवचिने च' इति ॥ ३६ ॥

कठोर इति । क्रूर इत्यर्थः । घोरा शिवा चेति द्वे तनू शिवस्य श्रुतिसिद्धे— 'रुद्रो वा एष यदग्निस्तस्यैते तनुवौ घोरान्या शिवान्या' 'ये ते अग्ने शिवे तनुवौ' 'यास्ते अग्ने घोरास्तनुवः' 'अघोरेभ्योऽथ घोरेभ्यः' इत्यादिश्रुतेः । महाभारतेऽप्यानुशासनिके दर्शितम्— 'वदन्त्युग्रं महादेवं तथा देवं महेश्वरम् । एकास्यं त्र्यम्बकं चैव विश्वरूपं शिवं तथा ॥ द्वे तनू तस्य देवस्य वेदज्ञा ब्राह्मणा विदुः । घोरामन्यां शि-

वामन्यां ते तनू बहुधा पुनः ॥ परा घोरा तनुर्यास्य साग्नि-र्विद्युत्समप्रभा । शिवा सौम्याथ हृद्यास्य धर्मस्त्वापोऽथ च-न्द्रमाः ॥ आत्मनोऽर्धं तु तस्याग्निरुच्यते भरतर्षभ' इति । तयोस्तन्वोर्मध्ये घोररूपतनुशालीत्यर्थः । एतेन जगद्रक्षक इत्युक्तं भवति, शिवस्य घोरतनुपरिग्रहो जगद्रक्षाहेतुरित्यानु-शासनिके व्यक्तमभिधानात् । यथा— 'उमा— भगव-न्देव देवेश त्रिणेत्र वृषभध्वज । पिङ्गलं विकृतं भाति रूपं ते तु भयानकम् ॥ भस्मदिग्धं विरूपाक्षं तीक्ष्णदंष्ट्रं जटाकुलम् । व्याघ्रोदरत्वक्संवीतं कपिलश्मश्रुसंततम् । रौद्रं भयानकं घोरं शूलपट्टससंयुतम् । किमर्थमीदृशं रूपं तन्मे शंसितुमर्हसि ॥ महेश्वरः— तदहं कथयिष्यामि शृणु तत्त्वं समाहिता । द्विविधो लौकिको भावः शीतमुष्णमिति प्रिये ॥ तयोर्निग्रथितं सर्वं सौम्याग्नेयमिदं जगत् । सौम्य-त्वं सततं विष्णौ मय्याग्नेयं प्रतिष्ठितम् ॥ अनेन वपुषा नित्यं सर्वाँल्लोकान्बिभर्म्यहम् । रौद्राकृति विरूपाक्षं शूल-पट्टससंयुतम् ॥ आग्नेयमिति मे रूपं देवि लोकहिते रतम् । यद्यहं विपरीतः स्यामेतत्त्यक्त्वा शुभानने ॥ तदैव सर्वलो-कानां विपरीतं प्रवर्तते । तस्मान्मयेदं ध्रियते रूपं लोकहितै-षिणा' इति । यद्वा, कठोरः पूर्णः, तथा च निघण्टुः—

'कठोरः कठिने पूर्णे' इति; माघकाव्येऽपि— 'कठोरताराधिपलाञ्छनच्छविः' इति । तथा च श्रुतिः— 'तेनेदं पूर्णं पुरुषेण सर्वम्' इति ॥ ३७ ॥

त्रिपुरान्तक इति । त्रीणि पुराणि त्रिपुराणि, 'दिक्संख्ये संज्ञायाम्' इति समासः, अन्तशब्दान्नाशवचनात् तत्करोतीति ण्यन्तात्कर्तरि ण्वुलि अन्तकः, त्रिपुराणाम् अन्तकः त्रिपुरान्तकः । त्रिपुरसंहारकत्वं च तैत्तिरीयश्रुताबुपसदर्थवादे 'तेषामसुराणां तिस्रः पुर आसन्' इत्यादिना स्पष्टं प्रतिपादितम्, सर्वपुराणेषु च प्रसिद्धम् । यद्वा त्रीणि पुराणि शरीराणि, 'पुरसंज्ञे शरीरेऽस्मिञ्शयनात्पुरुषो हरिः' इति विष्णुपुराणवचनात् । तानि च स्थूलसूक्ष्मकारणात्मकानि— स्थूलं भौतिकमेव, सूक्ष्मं लिङ्गशरीरम्, कारणं त्वविद्यारूपमिति । एषां त्रिपुराणामन्तकः त्रिपुरान्तकः; शिवज्ञानस्य च विदेहकैवल्यहेतुत्वं मन्त्रोपनिषदि श्रुतम् । यथा— 'भावग्राह्यमनीशाख्यं भावाभावकरं शिवम् । कालसर्गकरं देवं ये विदुस्ते जहुस्तनुम्' इति । अत्र प्रथमव्याख्याने 'नवमं त्रिपुरारिः स्यात्' इति वातूलशुद्धोक्ता नवमी महेश्वरमूर्तिरनुसंहिता । इदं च श्रुतिप्रसिद्धं नाम, त्र्यम्बकाय त्रिपुरान्तकाय त्रिकाग्निकालाय कालाग्निरुद्राय नमः' इति ॥

वृषाङ्क इति । वृषः अङ्कः लाञ्छनं यस्य स वृषाङ्कः वृषध्वज इत्यर्थः । वृषभस्य च ध्वजत्वं भारते उमामहेश्वरसंवादे सहेतुकं दर्शितम् । यथा— 'उमा— भगवन्देव देवेश पिनाकपरमप्रिय । वाहनेषु तथान्येषु सत्सु भूतपते तव ॥ अयं तु वृषभः कस्माद्वाहनं स यथाभवत् । एवं मे संशयो देव तं मे शंसितुमर्हसि ॥ महेश्वरः— तदहं ते प्रवक्ष्यामि वाहनं स यथाभवत् । आदिसर्गे पुरा गावः श्वेतवर्णाः शुचिस्मिते ॥ बलसंहननोपेता दर्पयुक्ताश्चरन्ति ताः । अहं तु तप आतिष्ठं तस्मिन्काले शुभानने ॥ एकपादश्चोर्ध्वबाहुर्लोकार्थं हिमवद्गिरौ । गावो मे पार्श्वमागम्य दर्पोत्सिक्ताः समन्ततः ॥ स्थानभ्रंशं तदा देवी चक्रिरे बहुशस्तदा । अपकारेण चैतासां मनःक्षोभोऽभवन्मम ॥ तस्माद्दग्धा मया गावो रोषाविष्टेन चेतसा । तस्मिंस्तु व्यसने घोरे वर्तमाने पशून्प्रति ॥ अनेन वृषभेणाहं शमितः संप्रसादनैः । तदाप्रभृति शान्ताश्च वर्णभेदत्वमागताः ॥ श्वेतोऽयं वृषभो देवी सर्वसंस्कारसंयुतः । वाहनत्वे ध्वजत्वे च तदाप्रभृति योजितः ॥ तस्मान्मे गोपतित्वं च देवैर्गोभिश्च कल्पितम्' इति । अस्य च वृषस्य धर्मरूपत्वं शिवागमेषु प्रसिद्धम्— 'शुद्धस्फटिकसंकाशो धर्मरूपो वृषः स्मृतः' इति । ब्रह्मा-

ण्डपुराणेऽपि— 'वन्दे धर्मवृषं वृषध्वजरथं तीर्थाश्रितांस्सदा' इति । स्कान्देऽपि— 'तस्माद्धर्मः सदा शंभोर्वृषरूपेण वाहनम्' इति । वाहनस्यैव सतो ध्वजत्वं तु प्रागेवोपपादितम् । धर्म एवास्यासाधारणं लाञ्छनमिति उक्त्या धर्मप्रियत्वं सूचितम् ॥ ३९ ॥

वृषभारूढ इति। 'वृष सेचने' वर्षणात्सर्वकामानां वृषभः, धर्मरूपतया सर्वकामप्रदत्वात् 'ऋषवृषाभ्यां कित्' इत्यौणादिकोऽभच्प्रत्ययः, तमारूढो वृषभारूढः, 'द्वितीया—' इति योगविभागात्समासः; वृषभवाहन इत्यर्थः । यद्वा, परंपरया वृषभमारूढ इति तथा; त्रिपुरविजयप्रयाणावसरे भगवद्भाराक्षमतया भुग्नजानुषु वेदाश्वेषु पततो रथस्य वृषभरूपेण विष्णुना धारितत्वेन तादृशरथारूढस्य परंपरया वृषभारूढत्वात् । यथोक्तं लिङ्गपुराणे— 'तस्मिन्नारोहति रथं कल्पितं लोकसंभृतम् । शिरोभिः पतिता भूमौ तुरंगा वेदरूपिणः ॥ अथाधस्तादृथस्याथ भगवान्धरणीधरः । वृषेन्द्ररूपी चोत्थाप्य स्थापयामास वै क्षणम् ॥ क्षणान्तरे वृषेन्द्रोऽपि जानुभ्यामगमद्धराम् । अभीशुभिश्च भगवानुद्यम्य च हयान्विधिः ॥ स्थापयामास देवस्य वचनाद्वै रथं शुभम्' इति । अनेन 'तृतीयं तु वृषारूढम्' इति वातूलशुद्धोक्ता

महेश्वरस्य तृतीया मूर्तिरनुसंहिता ॥ ४० ॥

भस्मोद्धूलितविग्रह इति । भस्म विभूतिः । 'भस भर्त्सनदीप्त्योः' इति जौहोत्यादिको धातुः, ततः कर्तरि 'अन्येभ्योऽपि दृश्यते' इति मनिन्प्रत्ययः, दृशिग्रहणाच्छान्दसस्यापि भाषायां प्रयोग इति धातुवृत्तौ । पापानां रोगाणां मायापाशस्य च भर्त्सनाद्भस्म, तत्र पापनिवर्तकत्वं जाबालश्रुतौ प्रसिद्धम्— 'पापं नाशयते कृत्स्नमपि जन्मशतार्जितम्' इति । रोगग्रहपीडादिनिवर्तकत्वं रक्षार्थत्वकीर्तनेनानुशासनिके उमामहेश्वरसंवादे दर्शितम्— 'रक्षार्थं मङ्गलार्थं च पवित्रार्थं च भामिनि । लाञ्छनार्थं च भक्तानां भस्म दत्तं मया पुरा' इति । पाशनिवर्तकत्वं ब्रह्मोत्तरखण्डे दर्शितम्— 'उद्धूलनं त्रिपुण्ड्रं च मायापाशनिवृत्तये । आचरन्ति मुनिश्रेष्ठा अथर्वशिरसि स्थितम्' इति । विशिष्टं तु वासिष्ठलैङ्गे दर्शितम्—'भर्त्सनात्सर्वपापानां पाशानां च महामुने । भस्मेति कीर्त्यते रक्षा रोगाणां चापि भर्त्सनात्' इति । यद्वा, अस्मादेव धातोः ज्ञानार्थादन्तर्भावितण्यर्थात्प्राग्वदेव मनिन्प्रत्यये भस्म ज्ञानजनकमित्यर्थः । तथा च माधवीये स्मृतिरत्ने नारदीयवचनमुदाहृतम्— 'भासनाद्भसितं प्रोक्तं भस्म पापस्य भर्त्सनात् । भूतिर्भूतिकरी पुंसां रक्षा रक्षाकरी पुनः'

इति। वासिष्ठलैङ्गेऽपि– 'भयेभ्यो रक्षणाद्रक्षा भासनाद्भसितं तथा' इति । यद्यपि भसितपदव्युत्पत्तिप्रदर्शनपरमुदाहृतं वचनद्वयम्, तथापि भसधातोर्ज्ञानार्थतायां भस्मनि तदर्थानुस्यूतौ भस्मनस्तद्धातूत्पन्नशब्दवाच्यतायां चेदं प्रमाणमिति लिखितम्, ब्रह्मोत्तरखण्डे भस्मशब्देऽपि इयमेव व्युत्पत्तिः सूचिता 'महाभस्म महादेवो महामायावभासकः' इति । भस्मनश्च ज्ञानहेतुत्वं तत्साध्योद्धूलनस्य पाशुपतव्रताख्यस्य मोक्षविद्याङ्गत्वेन श्रवणात् । यथाथर्वशिरसि— 'अग्निरित्यादिना भस्म गृहीत्वा विमृज्याङ्गानि संस्पृशेत् । व्रतमेतत्पाशुपतं पशुपाशविमोक्षाय' इति । ज्ञानैकसाध्याया विमुक्तेर्भस्मोद्धूलनक्रियाफलत्वोक्त्या विमोक्षशब्दस्य तत्साधनविद्यापरत्वात् 'तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्णम्' इति मुण्डकोपनिषद्वचनाच्च । शिरोव्रतपदेनात्र भस्मोद्धूलनस्य विवक्षितत्वात्। शिरोव्रतशब्दस्य भस्मोद्धूलने रूढिः स्कान्दान्तर्गतसौरसंहितावचनेन दर्शिता– 'अग्निरित्यादिभिर्मन्त्रैः षड्भिः शुद्धेन भस्मना । सर्वाङ्गोद्धूलनं कुर्याच्छिरोव्रतसमाह्वयम्' इति । वासिष्ठलैङ्गेऽपि– 'बहुनोक्तेन किं भस्मधारणं मोक्षसाधनम्। भस्मना नित्ययुक्तस्य ज्ञानमुत्पद्यतेऽचिरात्' इति । एवंभूतेन भस्मनोद्धूलितो विग्रहो यस्य स तथोक्तः; उद्धूलित-

शब्दः 'तत्करोति' इति ण्यन्तात् 'आदिकर्मणि क्तः कर्तरि च' इति चकारात्कर्मणि क्तप्रत्यये उद्धूलित इति रूपम् । एवं च उद्धूलनमुद्धृतधूलित्वेन करणम् । यथा च धूलय उद्गच्छन्ति, तथा सान्द्रतया भस्मना सर्वाङ्गाणां संबन्ध इति यावत् । इदं च 'विमृज्याङ्गानि संस्पृशेत्' इति श्रुतौ सम्यगित्यर्थपरेण समित्युपसर्गेण लब्धम् । समित्यस्यैव समन्तादित्यर्थमादाय सर्वाङ्गविषयत्वमुद्धूलनस्य लब्धम् । अत एव सौरसंहितायां सर्वाङ्गोद्धूलनं कार्यमित्युक्तम् । एतदृष्ट्यैवास्मदीक्षितैरपि भस्मना सान्द्रसर्वाङ्गसंस्पर्शनात्मकमुद्धूलनं कुर्यादिति शिवार्चनचन्द्रिकायामभिहितम् । आदिकर्मणि क्तप्रत्यय इति व्याख्यानं च एवंरूपपाशुपतव्रतस्य शिवेनैव प्रथमं प्रवर्तितत्वात् । अत एव प्रथमं स्वेनाचरितं पश्चात्कुबेरेणेति स्वद्वितीयतया तेन तस्मै सखित्वं दत्तमित्युत्तररामायणे वर्णितम् । यथा— 'मया चैतद्व्रतं चीर्णं त्वया चैव नराधिप । तृतीयः पुरुषो नास्ति यश्चरेद्व्रतमीदृशम् । व्रतं सुदुश्चरं ह्येतन्मयैवोत्पादितं पुरा । तत्सखित्वं मया सौम्य रोचय त्वं धनेश्वर' इति । एवं च सकलब्रह्मविद्याङ्गभूतपाशुपतव्रतरूपभस्मोद्धूलनप्रवर्तकतया परमकारुणिक इति सूचितम् ॥ ४१ ॥

सामप्रियः स्वरमयस्त्रयीमूर्तिरनीश्वरः ।
सर्वज्ञः परमात्मा च सोमसूर्याग्निलोचनः ॥

सामप्रिय इति । साम गीतिविशेषः, तत्प्रधानत्वात् वेदोऽपि साम, तत्प्रिय इत्यर्थः । 'ईशानः सर्वविद्यानाम्' इति श्रुतिसिद्धसर्वविद्याधिपत्यस्य शिवस्य 'ऋचो ह यो वेद स वेद देवान्यजूंषि यो वेद स वेद यज्ञान् । सामानि यो वेद स वेद सर्वम्' इति श्रुतिसिद्धमहिम्नि सामवेदे प्रीत्यौचित्यात् । साम्नोऽभ्यर्हितत्वादेव श्राद्धप्रकरणे स्मर्तारः— 'त्रयाणामप्यलाभे तु छन्दोगं तत्र पूजयेत्' इति बहूनां ब्राह्मणानां स्थाने छन्दोगमेकं विदधति । अत एव गीतासु— 'वेदानां सामवेदोऽस्मि' इति भगवता विभूतिषु परिगणितम् । सामप्रियत्वादेव भारते उपमन्यूपाख्याने उपमन्युकृतशिवसाक्षात्कारोपायवर्णने ब्रह्मनारायणाभ्यां रथंतरसाम्ना ज्येष्ठसाम्ना च स्तुतमित्युक्तम् । यथा— 'ब्रह्मा भवं तदास्तौषीद्रथंतरमुदीरयन् । ज्येष्ठसाम्ना च देवेशं जगौ नारायणः प्रभुः' इति । यद्वा, साम सान्त्वं मधुरोक्तिरित्यर्थः, तत्प्रियः; सर्वत्र सान्त्ववादप्रयोगस्य शिवप्रीतिहेतुतया शिवधर्मोत्तरे स्मरणात् । यथा— 'अमृतस्यन्दिनीं वाचं चन्दनस्पर्शशीतलाम् । सर्वत्रैव प्रयुञ्जानः शिवलोके महीयते' इति ॥४२॥

स्वरमय इति । स्वरो नाम अच् , स चात्र प्रणवरूपः, सामान्यशब्दस्य विशेषे पर्यवसनात् ; 'यो वेदादौ स्वरः प्रोक्तो वेदान्तेषु प्रतिष्ठितः' इति प्रयोगदर्शनाच्च । यद्यपि प्रणवो मकारेण सहैव स्वरव्यञ्जनसमुदायश्च न स्वरः, तथापि स्वरस्य द्वे मात्रे व्यञ्जनस्यार्धमात्रेति स्वरांशस्य भूयस्त्वात्स्वरत्वेन व्यपदेशः । स्वरस्यावयवः स्वरमयः 'मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः' इति सूत्रेण सर्वस्मादपि शब्दाद्विकारावयवयोरर्थयोर्मयड्भवतीत्यर्थकेन मयटोऽनुशासनात्साधुः । प्रणवावयवत्वं च तथाभूतमकारेण गुणिरुद्रस्य प्रतिपादनात् मकारात्परयार्धमात्रया नादाख्यया त्रिमूर्त्युत्तीर्णस्य महेश्वरस्य प्रतिपादनाद्वा वाच्यवाचकयोरभेदाध्यवसायेन तद्वाच्यस्य तद्वाच्यपदेशौचित्यात् । यथोक्तं वायवीयसंहितायाम्— 'प्रणवो वाचकस्तस्य शिवस्य परमात्मनः । शिवरुद्रादिशब्दानां प्रणवः परमः स्मृतः ॥ तस्मादेकाक्षरं देवमाहुरागमपारगाः । वाच्यवाचकयोरैक्यं मन्यमाना मनस्विनः ॥ अस्य मात्राः समाख्याताश्चतस्रो वेदमूर्धनि । अकारश्चाप्युकारश्च मकारो नाद इत्यपि ॥ अकारं बह्वृचं प्राहुरुकारो यजुरुच्यते । मकारः साम नादोऽस्य श्रुतिराथर्वणी स्मृता ॥ अकारस्तु महाबीजं रजः स्रष्टा चतुर्मुखः ।

उकारः प्रकृतिर्योनिः सत्त्वं पालयिता हरिः ॥ मकारः पुरुषो बीजं तमः संहारको हरः । नादः परः पुमानीशो निर्गुणो निष्क्रियः शिवः ॥ एवं तिसृभिरेवैष मात्राभिर्निखिलं त्रिधा । अभिधाय शिवात्मानं बोधयत्यर्धमात्रया' इति । अयमर्थश्च 'यो वेदादौ' इति श्रुतिमुदाहृत्य योगयाज्ञवल्क्यवचनाद्यनुसारेण प्रपञ्चितः शिवतत्त्वविवेकेऽस्माभिरिति नेह प्रपञ्च्यते ॥ ४३ ॥

त्रयीमूर्तिरिति । ऋग्यजुःसामरूपैस्त्रिभिरवयवैर्घटितः समुदायः त्रयी, 'संख्याया अवयवे तयप्' 'द्वित्रिभ्यां तयस्यायज्वा' इत्ययजादेशः, स्त्रीत्वं स्वाभाव्यात्; 'इति वेदास्त्रयस्त्रयी' इति निघण्टुः । सा मूर्तिरस्येति बहुव्रीहिः । 'शब्दजातमशेषं तु धत्ते शर्वस्य वल्लभा । अर्थस्वरूपमखिलं धत्ते मुग्धेन्दुशेखरः' इति शिवपुराणोक्तरीत्या नामात्मकप्रपञ्चस्य देवीमूर्तितया तन्मुखेन शिवमूर्तित्वोपपत्तेः । विशिष्य च त्रय्या देवीमूर्तित्वं कूर्मपुराणे हिमवन्तं प्रति देवीवचनेन दर्शितम्— 'ममैवाद्या परा मूर्तिर्वेदसंज्ञा सनातनी । ऋग्यजुःसामरूपेण सर्गादौ संप्रवर्तते' इति । यद्यपि चत्वारोऽपि वेदास्तस्यैव मूर्तिः, तथापि मूर्तिशब्दस्यात्र प्रेमास्पदलक्षकतया तुरीयवेदस्य प्रायेणाभिचारबहुलतया अध-

र्मजनके तदर्थाचरणे त्रय्यर्थाचरणवन्न प्रीतिः परमेश्वरस्येति त्रयीमूर्तिरित्युक्तम् । अत एवोदाहृतकौर्मवचने त्रय्याम् 'परा मूर्तिः' इति इष्टवाची परशब्दः प्रयुक्तः । 'विप्रतिषेधे परं कार्यम्' इति सूत्रे इष्टवाची परशब्द इति महाभाष्योक्तेः । उत्कृष्टवाची वा परशब्दः, उत्कर्षश्च इष्टत्वमेव ॥ ४४ ॥

अनीश्वर इति । न विद्यते ईश्वरोऽस्येति बहुव्रीहिः, 'न तस्य कश्चित्पतिरस्ति लोके न चेशिता नैव च तस्य लिङ्गम् । स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः' इति श्रुतेः । इदं च नामत्वेनैव श्रुतौ प्रसिद्धम् । यथा— 'भावग्राह्यमनीशाख्यं भावाभावकरं शिवम्' इति ॥ ४५ ॥

सर्वज्ञ इति । सर्वं जानातीति सर्वज्ञः, 'इगुपधज्ञाप्रीकिरः कः' इति कप्रत्ययः; 'यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः', 'स विश्वकृद्विश्वविदात्मयोनिर्ज्ञः कालकालो गुणी सर्वविद्यः' इत्यादिश्रुतेः ॥ ४६ ॥

परमात्मेति । परमः उत्कृष्ट आत्मा परमात्मा, पारम्यं च सर्वजीवानामन्तर्यामितया नियन्तृत्वम् । तथा च श्रुतयः— प्रथमं तावत्सर्वगतत्वे— 'ततः परं ब्रह्म परं बृहन्तं यथा निकायं सर्वभूतेषु गूढम् । विश्वस्यैकं परिवेष्टितारमीशं तं

ज्ञात्वामृता भवन्ति' 'यो रुद्रोऽग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमोऽस्तु' 'सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः । सर्वव्यापी च भगवांस्तस्मात्सर्वगतः शिवः' 'सूक्ष्मातिसूक्ष्मं कलिलस्य मध्ये विश्वस्य स्रष्टारं तमनेकरूपम् । विश्वस्यैकं परिवेष्टितारं ज्ञात्वा शिवं शान्तिमत्यन्तमेति ॥ स एव कालो भुवनस्य गोप्ता विश्वाधिपः सर्वभूतेषु गूढः । यस्मिन्युक्ता ऋषयो देवताश्च तमेव ज्ञात्वा मृत्युपाशाञ्छिनत्ति ॥ घृतात्परं मण्डमिवातिसूक्ष्मं ज्ञात्वा शिवं सर्वभूतेषु गूढम् । विश्वस्यैकं परिवेष्टितारं ज्ञात्वा देवं मुच्यते सर्वपाशैः' 'सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमोऽस्तु' इत्यादयः । 'नमो दुन्दुभ्याय च' इत्यादयश्च 'भवे छन्दसि' इति विहितयत्प्रत्ययान्ता अनुवाकद्वयोपात्ता नियम्यनियामकयोरभेदोपचारेण प्रवृत्ताः । 'कुलालेभ्यः कर्मारेभ्यश्च वो नमो नमः पुञ्जिष्टेभ्यो निषादेभ्यश्च वो नमो नमः' इत्यादयश्च, तथा 'यच्च किंचिज्जगत्यस्मिन्दृश्यते श्रूयतेऽपि वा । अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः' इत्यादिश्रुतिसिद्धस्य नारायणव्यापकत्वस्य नारायणस्यैव शिवांशतया शिवव्यापकत्वपर्यवसानबोधिका मन्त्रोपनिषद्गता 'मायां तु

प्रकृतिं विद्यान्मायिनं तु महेश्वरम् । तस्यावयवभूतेन व्याप्तं सर्वमिदं जगत्' इति श्रुतिश्च, तथा 'धियो यो नः प्रचोदयात्' इति मन्त्रलिङ्गप्रतिपन्नसर्वान्तर्यामिभावायाः सवितृमण्डलमध्यवर्तिमूर्तेः शिवत्वप्रतिपादनपरा 'असौ योऽवसर्पति नीलग्रीवो विलोहितः' इत्यादिश्रुतिः गायत्रीगतभर्गश्रुतिः 'य एषोऽन्तरादित्ये' इत्यादिश्रुतयश्च प्रमाणानि । सर्वाधिष्ठातृत्वे 'यो योनिं योनिमधितिष्ठत्येको यस्मिन्निदं संचविचैति विश्वं तमीशानं वरदं देवमीड्यम्' 'स विश्वकृद्विश्वविदात्मयोनिर्ज्ञः कालकालो गुणी सर्वविद्यः । प्रधानक्षेत्रज्ञपतिर्गुणेशः संसारमोक्षस्थितिबन्धहेतुः' इत्यादयः । स्मृतयस्तु भारतभागवतादयो विस्तरभयाद्विस्पष्टत्वाच्च न लिख्यन्ते । शिवपुराणागमप्रसिद्धेषु शिवाद्यष्टनामसु उक्तमिदं नाम 'शिवो महेश्वरश्चैव रुद्रो विष्णुः पितामहः । संसारवैद्यः सर्वज्ञः परमात्मेति मुख्यतः' इति वायुसंहितावचनात् ॥ ४७ ॥

सोमसूर्याग्निलोचन इति । तेजस्त्वेन त्रयाणां साम्येऽपि प्रागुदाहृतवराहपुराणोक्तरीत्या सोमस्य सर्वजीवसमष्टिरूपतया अभ्यर्हितत्वेन पूर्वनिपातः, अन्यथा 'द्वन्द्वे घि' इति अग्निशब्दस्यैव पूर्वनिपातः स्यात्; न च बहुषु अनियमः,

'अनेकप्राप्तावेकस्य नियमोऽनियमः शेषे' इति हि तद्वार्तिकमाकरे पठ्यते । ततश्चाभ्यर्हितत्वात्प्रथमस्य नियमे सिद्धे द्वितीयस्य च 'द्वन्द्वे धि' इति नियमाभावमात्रप्रतिपादनात् । भगवल्लोचनानां तेजस्त्रयात्मकत्वं चानुशासनिके उपमन्यूपाख्याने दर्शितम् ; यथा— 'दिवसकरशशाङ्कवह्निनेत्रं त्रिभुवनसारमपारमीशमाद्यम् । अजरममरमप्रसाद्य रुद्रं जगति पुमानिह को लभेत शान्तिम्' इति, शिवागमेष्वपि 'स्फुटितनलिनसंस्थं चन्द्रवह्न्यर्कनेत्रम्' इति ॥ ४८ ॥

हविर्यज्ञमयः सोमः पञ्चवक्त्रः सदाशिवः ।
विश्वेश्वरो वीरभद्रो गणनाथः प्रजापतिः ॥

हविरिति । प्रायेण हूयमानद्रव्याणां पार्थिवत्वात्पृथिव्याश्च भगवन्मूर्तिषु प्रथमत्वाद्धवीरूपत्वम् ; अथवा 'रसजातं महादेवी देवो रसयिता शिवः' इति शिवपुराणोक्तरीत्या भोक्तव्यवस्तुमात्रस्य देवीरूपतया तदभेदाद्धवीरूपत्वम् । एतदृष्ट्यैवोक्तं भगवद्गीतासु— 'ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् । ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना' इति ॥ ४९ ॥

यज्ञमय इति । यज्ञाः क्रतवः, प्राचुर्येण प्रस्तुता अस्मिन्निति यज्ञमयः, 'तत्प्रकृतवचने मयट्' इति मयट् । स्वामिनि

हि स्वं प्रायेण प्रस्तुतं भवति, यज्ञस्वामीत्यर्थः । तथा च श्रुतिः— 'आवो राजानमध्वरस्य रुद्रम्' इति ॥ ५० ॥

सोम इति । उमया सहितः सोमः, 'उमासहायं परमेश्वरं प्रभुम्' इति श्रुतेः ; यद्वा सोमो लताविशेषः, तदभिमानित्वाच्छिवोऽपि सोमः ; सोमलतायाः शिवाधिष्ठितया तत्तादात्म्यदृष्टयैव 'सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्रास्ते संप्रसूयन्ते सर्वाणि चेन्द्रियाणि सह भूतैः न कारणं कारणानां धाता ध्याता कारणं तु ध्येयः सर्वैश्वर्यसंपन्नः सर्वेश्वरः शंभुराकाशमध्ये' इत्यथर्वशिरसि प्रतिपन्नं शिवस्य जगत्कारणत्वम् सोमलतायामारोप्य मन्त्रः स्तौति 'सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्या जनिताग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः' इति । अत एव 'अयं सोमः कपर्दिने' इति श्रुतिरप्युपपन्ना । शरीरशरीरिभावलक्षणसंबन्धप्रतिपादनाय षष्ठ्यां प्रयोज्यायां तत्स्थाने 'छन्दसि षष्ठ्यर्थे चतुर्थी वक्तव्या' इति वार्तिकेन चतुर्थ्याः प्रयोगात्। तथा चोक्तं स्कान्दे सनत्कुमारसंहितायां काशीगतादाल्भ्येश्वरालिङ्गकथाप्रस्तावे—'मतीनां च दिवः पृथ्व्या वह्नेः सूर्यस्य वज्रिणः। साक्षादपि च विष्णोश्च सोमो जनयितेश्वरः ॥ एवं जातः पुनः सोमः पुनाति सकलाघतः । सोमो वै ह्यात्मनः सोममात्मानं वेत्ति

शंकरः' इति । आत्मनः स्वस्यात्मानं शरीरं सोमलताविशेषं सोमः उमासहितः शंकरो वेत्तीति तदर्थात् । यद्वा, सोमशेषित्वात्सोमः 'राजा राष्ट्रम्' इतिवत्; शेषशेषिणोरभेदव्यपदेशौचित्यात् । एवं च 'अयं सोमः कपर्दिने' इति तादर्थ्यचतुर्थ्यप्युपपद्यते । 'रुद्र आ हुतः' इति सोमाहुते रुद्रदैवत्यश्रवणमपि अत्र प्रमाणम् । अत एव सनत्कुमारसंहितायामुक्तम्— 'सोमेन सोममाराध्यं पीत्वा शेषं शिवस्य तम् । जानामि सम्यक्तं सोमं शिवं शंभुं महेश्वरम्' इति ॥ ५१ ॥

पञ्चवक्त्र इति । प्रदक्षिणं कुर्वन्त्यास्तिलोत्तमाया दिदृक्षया चतसृषु दिक्षु उत्पादितानि चत्वारि मुखानि प्रागवस्थितमूर्ध्वमुखमेकमित्याहत्य पञ्च वक्त्राणि यस्य स पञ्चवक्त्रः इति बहुव्रीहिः; यद्यपि मत्वर्थे बहुव्रीहिः, अन्यथा 'उक्तार्थानामप्रयोगः' इति 'न बहुव्रीहिगम्येऽर्थे भवन्ति मतुबादयः' इति निषेधाप्रसक्तेः; मत्वर्थश्च तद्धितार्थः, तथा च 'दिक्संख्ये संज्ञायाम्' इत्यनुवृत्तौ 'तद्धितार्थोत्तरपदसमाहारे च' इति सूत्रेण पञ्चसु कपालेषु संस्कृत इति संस्कृतत्वरूपतद्धितार्थविवक्षायामिव पञ्च वक्त्राण्यस्य सन्तीति मत्वर्थरूपतद्धितार्थविवक्षायामपि द्विगुना भवितव्यम्; न

च संस्कृताद्यर्थेषु सावकाशो द्विगुः दिक्संख्याव्यतिरिक्तस्थले चित्रगुरित्यादौ सावकाशो बहुव्रीहिरिति द्वयोः सावकाशयोः परत्वाद्बहुव्रीहिरेव भविष्यतीति वाच्यम् ; शेषो बहुव्रीहिः ' इति शेषग्रहणात् समासान्तरविषये बहुव्रीहेरप्रसक्तेः, नापि अस्तु द्विगुः किं तत इति वाच्यम् ; द्विगौ हि सति तद्धित उत्पद्येत षाण्मातुर इतिवत् ; न च तस्य लोपो लभ्यः, ' द्विगोर्लुगनपत्ये ' इत्यस्य प्राग्दीव्यतीयविषयत्वात् ' अध्यर्धपूर्वाद्विगोर्लुगसंज्ञायाम् ' इत्यस्य अर्हीयविषयत्वान्मत्वर्थस्य चोभयबहिर्भूतत्वादिति, तथापि ' सर्वत्र मत्वर्थे प्रतिषेधो वक्तव्यः ' इति वार्तिकेन ' प्रत्ययोत्तरपदयोश्च ' इति तर्कितन्यासे ' तद्धितार्थोत्तरपदसमाहारे च ' इति यथाश्रुतन्यासे च सर्वत्र मत्वर्थरूपतद्धितार्थे विषयीभूते द्विगुसमासप्रतिषेधो वक्तव्य इत्यर्थकेन द्विगोः प्रतिषेधाद्बहुव्रीहिरेवायमिति तत्त्वम् । तिलोत्तमादिदृक्षाप्रयुक्तमुखचतुष्टयसृष्टिश्चानुशासनिके उमामहेश्वरसंवादे दर्शिता । यथा— ' उमा— भगवन्देवदेवेश सर्वदेवनमस्कृत । चतुर्मुखो वै भगवानभवत्केन हेतुना ॥ भगवन्केन ते वक्त्रमैन्द्रमद्भुतदर्शनम् । उत्तरं चापि भगवन्पश्चिमं शुभदर्शनम् ॥ दक्षिणं च मुखं रौद्रं केनोर्ध्वं जटिलावृतम् । यथा-

दिशं महादेव श्रोतुमिच्छामि कारणम् ॥ एष मे संशयो देव तन्मे शंसितुमर्हसि । महेश्वरः— तदहं ते प्रवक्ष्यामि यत्त्वमिच्छसि भामिनि । पुरा महासुरौ घोरौ लोकोद्वेगकरौ भृशम् । सुन्दोपसुन्दनामानावासतुर्बलगर्वितौ ॥ अशस्त्रवध्यौ बलिनौ परस्परहितैषिणौ । तयोरेव विनाशाय निर्मिता विश्वकर्मणा ॥ सर्वतः सारमुद्धृत्य तिलशो लोकपूजिता । तिलोत्तमेति विख्याता अप्सराः सा बभूव ह ॥ देवकार्यं करिष्यन्ती हासभावसमन्विता । सा तपस्यन्तमागम्य रूपेणाप्रतिमा भुवि ॥ मया बहुमता चेयं देवकार्यं करिष्यति । इति मत्वा तदा चाहं कुर्वतीं मां प्रदक्षिणम् ॥ तथैव तां दिदृक्षुश्च चतुर्वक्त्रोऽभवं प्रिये । ऐन्द्रं मुखमिदं पूर्वं तपश्चर्यापरं सदा । दक्षिणं मे मुखं दिव्यं रौद्रं संहरति प्रजाः । लोककार्यकरं नित्यं पश्चिमं मे मुखं प्रिये । वेदानधीते सततमद्भुतं चोत्तरं मुखम् । एतत्ते सर्वमाख्यातं किं भूयः श्रोतुमिच्छसि ' इति । रूपेणाप्रतिमा सेयं तिलोत्तमा तपस्यन्तं मामागम्योपसृत्य प्रदक्षिणं कुर्वती, अत एव मया बहुमता च सती देवकार्यं करिष्यतीति मत्वा तदाहं स्थित इत्यध्याहारेण वाक्यपूरणम् । यथा मया चिन्तितं तथैव मामुपसृत्य प्रदक्षिणीकृत्य मत्प्रसादबलेन देवकार्याणि साधयितुं प्रवृत्ता ।

तां दिदृक्षुः द्रष्टुमिच्छुः चतुर्वक्त्रोऽभवमित्यर्थः । तथैवेति च साभिप्रायं विशेषणम्—यत एषा मच्चित्तानुरूपमेव 'प्रदक्षिणीकृत्य शशाङ्कशेखरं प्रयास्यतः कस्य न सिद्धिरग्रतः' इति पुराणार्थतत्त्वं विज्ञाय मामुपागतवती, अतस्तां दिदृक्षुरिति; न ह्यन्यथा अप्राकृतसौन्दर्यनिधानभूतामम्बामपि साधनं कृत्वा प्रवृत्तेन साक्षान्मदनेनापि चालयितुमशक्यस्य ज्ञानवैराग्यतपःसत्यादिदिव्यमङ्गलगुणगणालंकृतस्य भगवतो महेश्वरस्य प्राकृतसौन्दर्याभासशालिन्या तिलोत्तमया प्रलोभनं कर्तुं शक्यमिति भावः । एतेन एवं स्वकार्योद्देशेनापि भक्तिं कुर्वतीं तिलोत्तमां नैरन्तर्येण द्रष्टुमेकं मुखं नालमित्यत्यन्तौत्सुक्येन यश्चतुर्वक्त्रोऽभवत्, स परमेश्वरः सात्त्विकभक्तेषु कियन्नानुकम्पत इति कैमुतिकन्यायेन निरतिशयं भक्तवात्सल्यं सूचितम् । एतदेव च तिलोत्तमादिदृक्षाप्रयुक्तमुखचतुष्टयसृष्टिप्रतिपादनपरस्य भारतवचनस्यापि तात्पर्यविषयः; अन्यथा सदाशिवीयपञ्चमुखानामनादित्वेन सकलशिवपुराणागमप्रसिद्धानां मध्ये मुखचतुष्टयस्यागन्तुकत्वकथनानुपपत्तेः । तानि च पञ्च मुखानि ईशानतत्पुरुषाघोरवामदेवसद्योजाताख्यपञ्चब्रह्मात्मकानि, तानि च पञ्च ब्रह्माणि भूतपञ्चकतन्मात्रपञ्चककर्मेन्द्रियपञ्चकज्ञानेन्द्रियपञ्चकपुरुषप्रकृ-

तिबुद्ध्यहंकारमनोरूपतत्त्वपञ्चकनिवृत्तिप्रतिष्ठाविद्याशान्ति-शान्त्यतीताख्यकलापञ्चकब्रह्मविष्णुरुद्रमहेश्वरसदाशिवाख्य-मूर्तिपञ्चकशिवसादाख्यामूर्तसादाख्यमूर्तसादाख्यकर्तृसादा-ख्यकर्मसादाख्यसादाख्यपञ्चकात्मकानीति शिवपुराणागमेषु प्रसिद्धम् । यथोक्तं वायवीयसंहितायाम्– 'ब्रह्मा विष्णुस्तथा रुद्रो महेशानः सदाशिवः । मूर्तयस्तस्य विज्ञेया याभिर्विश्व-मिदं ततम् ॥ अथान्याश्चापि तनवः पञ्चब्रह्मसमाह्वयाः । तनु-भिस्ताभिरव्याप्तमिह किंचिन्न विद्यते ॥ ईशानः पुरुषोऽघोरो वामः सद्यस्तथैव च । ब्रह्माण्येतानि देवस्य मूर्तयः पञ्च विश्रुताः ॥ ईशानाख्या तु या तस्य मूर्तिराद्या गरीयसी । भोक्तारं प्रकृतेः साक्षात्क्षेत्रज्ञमधितिष्ठति ॥ स्थाणोस्तत्पु-रुषाख्या या मूर्तिर्मूर्तिमतः प्रभोः । गुणत्रयात्मकं भोग्य-मव्यक्तमधितिष्ठति ॥ धर्माद्यष्टाङ्गसंयुक्तं बुद्धितत्त्वं पिना-किनः । अधितिष्ठत्यघोरात्मा मूर्तिरत्यन्तमूर्जिता ॥ वामदेवा-ह्वया मूर्तिर्महादेवस्य वेधसः । अहंकृतेरधिष्ठात्रीत्याहुराग-मवेदिनः ॥ सद्योजाताह्वया मूर्तिः शंभोरमिततेजसः । मनसः समधिष्ठात्री मतिमन्तः प्रचक्षते ॥ श्रोत्रस्य वाचः शब्दस्य विभोर्व्योम्नस्तथैव च । ईश्वरीमीश्वरस्यैनामीशा-नाख्यां विदुर्बुधाः ॥ त्वक्पाणिस्पर्शवायूनामीश्वरीं मूर्तिमै-

श्वरीम् । पुरुषाख्यां विदुः पूर्वे पुराणार्थविशारदाः ॥ चक्षुषश्चरणस्यापि रूपस्याग्नेस्तथैव च । अघोराख्यामधिष्ठात्रीं मूर्तिमाहुर्मनीषिणः ॥ रसनायाश्च पायोश्च रसस्यापां तथैव च । ईश्वरीं वामदेवाख्यां मूर्तिं मुनिवरा विदुः ॥ घ्राणस्य चैवोपस्थस्य गन्धस्य च भुवस्तथा । सद्योजाताह्वया मूर्तिमीश्वरीं संप्रचक्षते' । पुनस्तत्रैव प्रदेशान्तरे स्तोत्राध्याये— 'शुद्धस्फटिकसंकाशमीशानाख्यं सदाशिवम् । मूर्धाभिमानिनी मूर्तिः शिवस्य परमात्मनः ॥ शिवार्चनरतं शान्तं शान्त्यतीतं खमास्थितम् । पवित्रं पञ्चमं ब्रह्म प्रार्थितं मे प्रयच्छतु । बालसूर्यप्रतीकाशं पुरुषाख्यं पुरातनम् । पूर्ववक्त्राभिमानं च शिवस्य परमेष्ठिनः । शान्त्यामत्कं मरुत्संस्थम्' इत्यादि । 'अञ्जनाद्रिप्रतीकाशमघोरं घोरविग्रहम् । देवस्य दक्षिणं वक्त्रं देवदेवपदार्चकम् ॥ विद्यापदसमारूढम्' इत्यादि । 'कुङ्कुमक्षोदसंकाशं वामाख्यं वरवेषधृक् । वक्त्रमुत्तरमीशस्य प्रतिमायां प्रतिष्ठितम्' इत्यादि । 'शङ्खकुन्देन्दुधवलं सद्याख्यं सौम्यलक्षणम् । शिवस्य पश्चिमं वक्त्रं शिवपादार्चने रतम् । निवृत्तिपदनिष्ठं च पृथिव्यां समवस्थितम्' इत्यादि । तथा शिवागमेषु— सदाशिवात्मा व्योमस्थ ईशानः परिकीर्तितः । वश्यकृद्वन्ध-

वाहस्थ ईश्वरः पुरुषः स्मृतः ॥ अशेषाघहरः पुंसामघोरो रुद्रविग्रहः । वामदेवः प्रवालाभो देवो वारिस्थितो हरिः ॥ शान्तिकृत्पृथिवीसंस्थः सद्योजातः पितामहः' इति। सादाख्यस्वरूपं तद्रहस्यं च सर्वागमेषु बहुधा प्रपञ्चितम् । बहु चात्र वक्तव्यमिति विस्तरभयान्न लिख्यते । तत्रायं संग्रहोऽस्मदीक्षितप्रणीतायां शिवध्यानपद्धतौ; यथा— 'विशुद्धं शिवसादाख्यं विशुद्धेन्दुमिवाम्बरे । विश्वतः स्फुरितं ज्योतिर्विद्यादूर्ध्वमुखं विभोः ॥ अमूर्तमपि सादाख्यं मूलस्तम्भ इति श्रुतम् । ज्योतिस्तम्भमयं लिङ्गं स्मरेदस्योत्तरं मुखम् ॥ ज्योतिर्लिङ्गैकभागोत्थमेकवक्त्रं त्रिलोचनम् । मूर्तं सादाख्यमित्युक्तं ध्यायेत्पश्चिममाननम् ॥ शूलं च परशुं वज्रमभीतिं दक्षिणैः करैः । पाशं वह्निं च घण्टां च वरं वामैः करैरपि ॥ दधानं कर्तृसादाख्यं चतुर्वक्त्राम्बुजोज्ज्वलम् । लिङ्गमध्ये समुद्भूतं संस्मरेद्दक्षिणाननम् ॥ पञ्चवक्त्रं दशभुजं पीठलिङ्गसमुद्भवम् । प्रसिद्धं कर्मसादाख्यं पुरारेः पूर्वमाननम्' इति । शिवस्य सर्वदिक्षु वदनसद्भावे 'रुद्र यत्ते दक्षिणं मुखं तेन मां पाहि नित्यम्' इति मन्त्रोपनिषद्गतमन्त्रलिङ्गमेव लिङ्गम् । एतेन च सर्वात्मक इत्युक्तं भवति ॥ ५२ ॥

सदाशिव इति । सदा सर्वकालेषु वर्तमानः शिवः सदाशिवः, किं कादाचित्कोऽपि शिवोऽस्ति? यद्वयावृत्तये सदेति विशेषणम्; अस्तीत्याह— तत्र ब्रह्मविष्णुरुद्रमहेश्वरमूर्तीनामुत्तरोत्तरचिरकालवर्तित्वेऽपि सदाशिवाख्यपञ्चममूर्त्यपेक्षया कादाचित्कीं रुद्रमूर्तिं व्यावर्तयितुं सदेति विशेषणोपादानसंभवात् । उक्तं चेदं शिवपुराणे सृष्टिप्रकरणे— 'केन मानेन कालेऽस्मिन्नायुःसंख्या प्रवर्तते' इति पृच्छत ऋषीन्प्रति वायुवचने यथा— 'आयुषोऽत्र निमेषाख्यमादिमानं प्रचक्षते । संख्यानमस्य कालस्य शान्त्यतीतकलावधि ॥ अक्षिपक्ष्मपरिक्षेपो निमेषः परिकीर्तितः । तादृशानां निमेषाणां काष्ठास्तु दश पञ्च च' इत्यादिना, 'चतुर्युगसहस्रं यत्तत्कल्प इति कथ्यते' इत्यन्तेन प्रसिद्धं कल्पपरिमाणमुक्त्वा पुनर्वर्णितम्— 'कल्पो नाम दिवा प्रोक्तं ब्रह्मणोऽव्यक्तजन्मनः । कल्पानां वै सहस्रं तु ब्राह्मं वर्षमिहोच्यते ॥ वर्षाणामष्टसाहस्रं यच्च तद्ब्रह्मणो युगम् । सवनं युगसाहस्रं ब्रह्मणः पद्मजन्मनः ॥ सवनानां सहस्रं तु त्रिगुणं त्रिविधं तथा । कल्प्यते सकलः कालो ब्रह्मणः परमेष्ठिनः ॥ तस्य वै दिवसे यान्ति चतुर्दश पुरंदराः । ब्रह्मा विष्णुर्दिने चैको विष्णू रुद्रदिने तथा ॥ ईश्वरस्य दिने रुद्रः सदाख्यस्य

तथेश्वरः । साक्षाच्छिवस्य तत्संख्यस्तदा सोऽपि सदाशिवः ॥ तस्मिन्साक्षाच्छिवेनैव कालात्मा संप्रवर्तितः' इति । अयमर्थः— कल्पः प्रसिद्धः, तादृक्कल्पसहस्रमेको वत्सरः, तादृशवत्सराणामष्टसाहस्राण्येकं युगम्, तादृशयुगसहस्रमेकं सवनम्, तादृशसवनसहस्राणि त्रिगुणानि सन्ति त्रिविधानि नवसंख्यानीति यावत् । सहस्रस्य प्रथमं त्रैगुण्ये त्रीणि सहस्राणि, ततस्तस्यास्त्रिसाहस्रथा पुनस्त्रैगुण्ये नवसाहस्र्यां पर्यवसानात् । एवं च तादृशसवनानां नवसहस्रं ब्रह्मणः परमायुः । तादृशब्रह्मपरमायुर्विष्णोरेकदिनम्, तादृशविष्णुपरमायुः रुद्रस्यैकदिनम्, तादृशरुद्रपरमायुः महेश्वरस्यैकदिनम्, तादृशमहेश्वरस्य परमायुः सदाशिवस्यैकदिनम्, तादृशसदाशिवपरमायुः परमशिवस्यैकं दिनम्, परमशिवस्य कालकृतपरिच्छेद एव नास्तीति । अत एव प्रदेशान्तरेऽपि तत्रैव, 'कालावच्छेदयुक्तानां गुरूणामप्यसौ गुरुः । सर्वेषामेव सर्वेशः कालावच्छेदवर्जितः' इति । यद्यप्युदाहृतवचनैः सदाशिवस्यापि कादाचित्कत्वमागतमिति सदेति विशेषणानन्वयः, तथापि ब्रह्माद्यपेक्षया अधिककालवर्तित्वेन ब्रह्मादिकालेषु सदा वर्तत इति तदभिप्रायो बोध्यः । यद्वा परमशिवे वा केवलयौगिकोऽयं द्रष्टव्यः । तत्र कालावच्छेदरहिते सदा-

पदसाङ्गस्यात् । न च तस्यापि कालावच्छेदोऽस्त्येव ; अन्यथा सदाशिवस्य परमायुः परमशिवस्य दिनमिति परिच्छिन्नव्यवहारायोगादिति वाच्यम् । दिनव्यवहारस्य दिनवदतिक्षुद्रः काल इत्यौपचारिकतया प्रवृत्तत्वात् । अत एवोक्तं तत्रैव किंचिदुत्तरतः— 'अहर्न विद्यते तस्य न रात्रिरिति धारयेत् । उपचारस्तु क्रियते लोकानां हितकाम्यया' इति । तथा पाद्मे शिवराघवसंवादेऽपि सदाशिववचने दर्शितम्— 'अल्पायुर्दृश्यते ब्रह्मा द्वौ निःश्वासौ हि जीवितम् । चतुर्निःश्वासमात्रं तु विष्णोरायुरुदाहृतम्' इति । इयं च निःश्वाससंख्या सदाशिवायुरपेक्षया द्रष्टव्या । एवं पुराणान्तरेष्वपि । इदं च श्रुतिप्रसिद्धं नाम 'ब्रह्मा शिवो मेऽस्तु सदाशिवोम्' इति ॥ ५३ ॥

विश्वेश्वर इति । विश्वेषामीश्वरः विश्वेश्वरः । तथा च मन्त्रोपनिषदि 'भूयः सृष्ट्वा पतयस्त्वथेशः सर्वाधिपत्यं कुरुते महात्मा' इति । तैत्तिरीयकेऽपि 'पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतम्' इति च । ननु 'स्वामीश्वर' इति सूत्रेण षष्ठ्याः प्रतिपदविहितत्वात् 'प्रतिपदविधाना षष्ठी न समस्यते' इति निषेधात् कथं समास इति चेत् ; न, नेयं प्रतिपदविधाना षष्ठी, किं तु शेषषष्ठ्येव, परं तु प्रतिपदवि-

हितया सप्तम्या मा बाधीति शेषषष्ठ्येव चकारेणानुज्ञायते । इदं चार्थतः श्रुतिप्रसिद्धं नाम 'सर्वेश्वरः शंभुराकाशमध्ये' इति ॥ ५४ ॥

वीरभद्र इति। भद्रो नाम दक्षाध्वरध्वंसार्थं रुद्रेणोत्पादितो गणविशेषः । वीरश्चासौ भद्रश्च इति कर्मधारयः । तस्य चोत्पत्तिः कल्पभेदेन बहुधा । तथा हि ब्रह्माण्डपुराणोत्तरभागे हयग्रीवागस्त्यसंवादे ललितोपाख्याने शिवललाटजस्वेदबिन्दोः भद्रस्योत्पत्तिः ततो गणानामुत्पत्तिश्च दर्शिता । यथा— 'अथ देवो महादेवो ललाटतटसंभवम् । एकं स्वेदपयोबिन्दुं नखाग्रेणाक्षिपत्क्षितौ ॥ तत उत्तस्थिवानेको लोकघस्मरविग्रहः । कालाग्निरिव दीप्ताङ्गो वीरभद्रो गणेश्वरः' इति । 'वीरभद्रः स कैलासान्निर्जगाम महाजवः । तस्यैव रोमकूपेभ्यो दीप्तान्निटिललोचनात् ॥ कर्णाभ्यां चैव नासाभ्यामास्याद्दंष्ट्राभयंकरात् । प्रसूता बहवो लोकघस्मराः प्रमथेश्वराः' इति । वामनपुराणे तु क्रुद्धस्य शिवस्य शरीरनिःसृतात्तेजसः सह गणैर्वीरभद्र उत्पन्न इति दर्शितम् । यथा— 'एतच्छ्रुत्वा वचो रौद्रं रुद्रः कोपान्वितोऽभवत् । क्रुद्धस्य सर्वगात्रेभ्यो निःसेरुः सहसार्चिषः ॥ सह क्रोधात्त्रिणेत्रस्य गात्ररोमान्तरोद्भवाः । गणाः सांख्यमुखा जाता वीरभद्रपु-

रोगमाः' इति । वायवीयसंहितायां तु दक्षयज्ञार्थं गत्वा तद्वृत्तान्तश्रवणकुपितया देव्या प्रेरितेन शिवेन संमुग्धतया वीरभद्रस्य सृष्टिमुक्त्वा देव्यापि कुपितया भद्रकाली सृष्टा, तया सहितो वीरभद्रः कार्याण्यसाधयदित्युक्तम् । यथा— 'दग्धुं दक्षाध्वारं विप्रा देवी देवमचोदयत् । देव्या संचोदितो देवो दक्षाध्वरजिघांसया ॥ ससर्ज सहसा वीरं वीरभद्रं गणेश्वरम् । सहस्रवदनं देवं सहस्रचरणेक्षणम्' इति ; तथा— 'मन्युना चासृजद्भद्रां भद्रकालीं महेश्वरी । आत्मनः कर्मसाक्षित्वात्तेन गन्तुं सहैव तु ॥ तं दृष्ट्वावस्थितं वीरभद्रं कालाग्निसंनिभम् । भद्रया सहितं प्राह भद्रमस्त्विति शंकरः' इति । एतेन भद्रया सहितत्वाद्भद्रावान्भद्र इति मत्वर्थीयाकारेण भद्रशब्दो निष्पन्न इति व्युत्पत्तिरपि सूचिता । काशीखण्डे तु— 'ततस्तत्क्रोधजाद्वह्नेराविरास महाद्युतिः । भद्रस्तु प्रमथाकारः कालमृत्युप्रकम्पनः' इति । शिवकोपाग्नेरुत्पन्नो भद्र इत्युक्त्वा पश्चात्तत्पराक्रमज्ञानपरितुष्टेन परमेश्वरेण वीरभद्र इति नाम दत्तमित्युक्तम् । यथा— 'महावीरोऽसि रे भद्र मम सर्वगणेष्विह । नाम्ना त्वं वीरभद्रेति भव लोकेषु विश्रुतः' इति । वराहपुराणे गौरीविवाहप्रकरणे तु, सर्गादौ ब्रह्म-

ललाटादुत्पन्नप्रजापतीनामन्यतमः स्थाणू रुद्रः, यः प्रजा असृष्ट्वा जले मग्नस्तपश्चरन्स्थितः, स एव जलादुत्तीर्य गणान्सृष्ट्वा तैः समेतो दक्षाध्वरं ध्वंसयामासेत्युक्तम्। यथा— 'रुद्रक्रोधोद्भवो यस्तु पूर्वं मग्नो महाजले । स सहस्रार्कसंकाशो निश्चक्राम जलात्तदा' इति तस्य निष्क्रमणमुक्त्वा, 'शुश्राव च तथा शब्दानृत्विजां दक्षसद्मनि । शुश्राव याजिनां चोच्चैरिन्द्रागच्छेति कीर्तनम् ॥ ततः श्रुत्वा महातेजाः सर्वज्ञः परमेश्वरः । चुकोप सुभृशं देवो वाक्यं चेदमुवाच ह' इत्यादिना तस्य दक्षाध्वरश्रवणजन्यं कोपमुपन्यस्य, तदुपरि 'तस्य नानदतो ज्वाला गात्रेभ्यो निर्ययुस्तदा । ततो भूतानि वेताल उच्छुष्माः प्रेतपूतनाः ॥ कूश्माण्डा यातुधानाश्च सर्वे प्रज्वलिताननाः । उत्तस्थुः कोटिशस्तत्र नानाप्रहरणावृताः' इत्यादिना गणानां सृष्टिमुक्त्वा, 'एवं कृत्वा स सामग्रीं देवदेवः प्रतापवान । जगाम दक्षयज्ञाय क्रोधाद्रुद्रः प्रतापवान्' इत्यादिना समस्तेनाध्यायेन दक्षाध्वरध्वंसवृत्तान्तकथनपूर्वकं पश्चाद्ब्रह्मवचनेन क्षमापणार्थं दक्षविनिर्मितगौरीविवाहो वर्णितः । पाद्मे तु शिवराधवसंवादे वीरभद्रेण कस्यचिदष्टशिरसो राक्षसस्य वधमुक्त्वा तदनन्तरं नारदमुखाद्वृत्तान्तं श्रुत्वा स्तुवतां ब्रह्म-

विष्णुरुद्राणां वचने तस्य राक्षसस्योत्पत्तिवरलाभादिप्रतिपादनावसरे— 'त्वज्जटोत्पाटनेनैकः पुरुषः संभविष्यति । तेनैव मरणं नान्यैरिदमेव व्रतं शिव ॥ श्रीशिवः— भविष्यत्येवमेवैतदित्युक्त्वान्तरधीयत । एवं लब्धवरः पापी राक्षसो निहतस्त्वया ॥ अथालिङ्ग्य हरिर्वीरं शंकरश्च पितामहः । यथागतं तथा जग्मुरथ देवादियोषितः ॥ निपत्य दण्डवद्भूमौ वीरभद्रमथाब्रुवन्' इति प्रतिपादितम् । तथा च राक्षसवधादिकार्यसाधनायेयमपरा शिवजटाशकलाद्वीरभद्रस्योत्पत्तिः । एवं च यदत्र वीरभद्रादूणानां सृष्ट्युपाख्यानं तदुत्तरेण नाम्नाविष्कृतं गणनाथ इति । यत्तूक्तं प्रजापतिपदे स्थितः स्थाणू रुद्र एव दक्षाध्वरध्वंसक इति, तत्ततोऽप्युत्तरेण नाम्नाविष्कृतं प्रजापतिरिति । यत्तु पुनः सकलदेवतानिग्रहात्मकं कर्म तत्सर्वमत्रत्येन वीरपदेनैव सूचितम् , तथैव पौराणिकव्युत्पत्तेरपि दर्शितत्वात् । अथवा दक्षाध्वरध्वंसवृत्तान्तस्य दक्षाध्वरहर इति नाम्ना अग्रे वक्ष्यमाणतयात्र सामान्यतः शरभभैरववीरभद्रादिसाधारणं पराक्रमातिशयमात्रं विवक्षितम् । वीराणां भद्रः वीरभद्रः वीरश्रेष्ठ इत्यर्थात् । ननु नैवं समासः संभवति, 'न निर्धारणे' इति निषेधादिति चेत् , न;

'द्विवचनविभज्योपपदे तरबीयसुनौ' इति सूत्रे, यतो निर्धार्यते, यश्चैकदेशो निर्धार्यते, येन हेतुना निर्धार्यते, एतत्त्रितयसंनिधाने हि निर्धारणं भवति ; न तु तदभावेऽपि नागानामुत्तमो नागोत्तम इत्यादौ । तत्र हि संबन्धसामान्ये षष्ठी, तस्याश्च समासो भवतीति कैयटेनोक्तत्वात् तद्वदिहापि संबन्धसामान्यषष्ठ्याः समासोपपत्तेः । ननु कथमिह त्रितयसंनिधानाभावः ? प्रकरणादुपस्थितस्य शिवस्यैव विशेष्यतया मनुष्याणां क्षत्रियः शूर इतिवद्वीराणां शिवो भद्र इति तृतयसंनिधानेन निर्धारणसंभवे संबन्धसामान्यषष्ठ्ययोगात् ; न च संभवत्यपि निर्धारणे संबन्धसामान्यविवक्षया प्रकृतषष्ठीनिर्वाह इति वाच्यम् ; तथा सति मनुष्याणां क्षत्रियः शूर इत्यादावपि संबन्धसामान्यविवक्षायाः संभवेन 'नागोत्तम इत्यादौ संबन्धसामान्यषष्ठी, मनुष्याणां क्षत्रिय इत्यादौ निर्धारणषष्ठी' इति कैयटोक्तविषयव्यवस्थाभङ्गप्रसङ्गेन त्रितयसंनिधाने सति निर्धारणप्रतीत्यवश्यंभावेन निर्धारणषष्ठ्या एवावश्यवक्तव्यत्वात् । नापि प्रकरणाद्वा साक्षाद्वा शिव इति विशेष्योपस्थितावपि शिवत्वस्य जातिगुणक्रियाबहिर्भूततया जातिगुणक्रियाभिः पृथक्करणस्यैव निर्धारणत्वेन तदभावात्संबन्धसामान्यषष्ठी संभवतीति वाच्यम् ; जातिगुणक्रियाभिः

पृथक्करणं निर्धारणमिति वृत्तिकारीयव्याख्यानस्य त्रयी शब्दानां प्रवृत्तिरिति पक्षाभिप्रायकतया शिवत्वादेरपि जातिकोटौ निवेशात् चतुष्टयीपक्षेऽप्युपलक्षणतया शिवत्वादेरपि संग्रहात्; इतरथा अमीषां छात्राणां कतमो देवदत्तः पठतां देवदत्तः पटुतरः आदित्यानामहं विष्णुः नक्षत्राणामहं शशी इत्यादिषु निर्धारणषष्ठ्या अगतेः, तस्मात्कथमत्र समास इति चेत्, उच्यते । इदं तावदत्र विचारणीयम्— मनुष्याणां क्षत्रियः शूरः इत्यादौ कथं शाब्दबोध इति; तत्र मनुष्याणां मध्ये यः क्षत्रियः स शूर इति भवितव्यम्, अत एव हरदत्तेन 'न निर्धारणे' इति सूत्रे अभिहितम्— 'क्षत्रियशब्देनात्र समासप्रसङ्गः, तदपेक्षा हि षष्ठी न शूरतमापेक्षा गुणत्वाच्च तेन न समासः' इति । प्रौढमनोरमायामपि नृणां द्विज इति प्रतीकमादाय द्विजशब्देनात्र समासप्रसङ्गः, तदपेक्षा हि षष्ठी न श्रेष्ठापेक्षेत्येतावद्धरदत्तोक्तमनूद्य न श्रेष्ठापेक्षेत्यत्रोपपत्तिरपि दर्शिता; श्रेष्ठत्वं च द्विजेतरमनुष्येभ्यः, तांश्च सामान्यशब्दोपस्थितान्विहाय अनुपस्थितकल्पनाया अन्याय्यत्वादिति । अस्यार्थः— द्विजनिष्ठं हि श्रेष्ठत्वं द्विजेतरमनुष्यनिरूपितम्; यद्यपि द्विजेतरेऽपि मनुष्याः मनुष्यत्वेनोपस्था-

प्यन्ते, तथाप्यन्वयितावच्छेदकरूपेणोपस्थितिर्मनुष्यशब्देन न भवतीत्यध्याहारेणैव तदुपस्थितिः संपादनीयेति मनुष्याणामिति पदं द्विजपदेनैव समर्थमिति श्रेष्ठपदेनासामर्थ्यादेव समासाप्रसक्तेः द्विजपदेन प्रसक्तः स प्रतिषिध्यत इति ; तस्मादेवं भवितव्यमिति । नैतदस्ति— मनुष्याणां मध्ये यः क्षत्रियः इति कोऽर्थः ? मनुष्यरूपसमुदायान्तर्गतो यः क्षत्रिय इति तावन्न संभवति, पृथक्करणलक्षणनिर्धारणस्येदानीमभावात् । किं चैवं सति समुदायसमुदायिभावलक्षणे संबन्धे वनस्य वृक्ष इतिवत् षष्ठ्याः समुदायिनं प्रति समुदायस्याधारतया वने वृक्षाः सहस्रे शतमितिवत् सप्तम्या अपि सिद्धतया 'यतश्च निर्धारणम्' इति सूत्रानर्थक्यप्रसङ्गात् । नापि मनुष्याणां क्षत्रियः मनुष्येभ्यः पृथग्भूतः क्षत्रिय इति ; क्षत्रियाणामपि मनुष्यत्वेन ततः पार्थक्यासिद्धेः । क्षत्रियत्वस्य मनुष्यत्वव्याप्यत्वात्पार्थक्यमस्तीति चेत् ; तस्य सिद्धतया अबोधनीयत्वात् । एवं तर्हि भवितुमर्हति— यः क्षत्रियः स मनुष्याणां शूर इति । अत एव 'न निर्धारणे' इति सूत्रे प्रागुदाहृतवाक्यादुत्तरत एव गवां कृष्णा संपन्नक्षीरतमेति द्वितीयोदाहरणव्याख्यानावसरे हरदत्तेनोक्तम्— नैवमभिसंबन्धो गवां मध्ये या कृष्णा सा संपन्नक्षीरतमेति ; एवं सति कृष्णाशब्दस्य गुण-

वचनत्वात् 'पूरणगुण' इत्येव समासनिषेधसिद्धेः । किंतु या कृष्णा सा गवां संपन्नक्षीरतमा— इति । न च कृष्णातिरिक्तगव्यपेक्षसंपन्नक्षीरतमत्वस्य विवक्षिततया अन्वयितावच्छेदककृष्णेतरगवित्वप्रकारकबोधजननासमर्थत्वात्सामान्यशब्दस्य - गोपदस्य तन्नान्वेतुमर्हति इति प्रागुक्ताधुनिकसमर्थनविरोध इति वाच्यम्; 'चन्द्रे कलङ्कः सुजने दरिद्रता विकासलक्ष्मीः कमलेषु चञ्चला। यशो विधातुः कथयन्ति खण्डितम्' इत्यादाविव अन्वयितावच्छेदकरूपेणानुपस्थितस्याप्यन्वयदर्शनादिति। इदमपि न युक्तम्— अधुना हि क्षत्रियः स्वातिरिक्तमनुष्यापेक्षया शूर इति फलितम्; एवं तर्हि निर्धारणकथैव लुप्ता; ननु कथं लुप्ता? निर्धारणं हि पृथक्करणम्, तच्च तदतिशायिगुणशालित्वरूपतद्वैलक्षण्यलक्षणं मनुष्यापेक्षया क्षत्रियाणामव्याहतमिति कृत्वेति चेत्; न; न हीदृशं पृथक्करणं वैयाकरणा मन्यन्ते, निर्धार्यधर्मितावच्छेदकं यज्जात्यादि तत्कृतमेव पृथक्करणं निर्धारणमिति तेषामभिमानात्। अत एव काशिकायां वृत्तौ 'जातिगुणक्रियाभिः पृथक्करणं निर्धारणं तत्र षष्ठी न समस्यते। यथा मनुष्याणां क्षत्रियः शूरतमः, गवां कृष्णा संपन्नक्षीरतमा, गच्छतां धावन्शीघ्रतमः' इत्युदाहृतम्। एवं तर्हि एवं भवतु— मनुष्याणां

क्षत्रियः शूरतम इति मनुष्याणां मध्ये क्षत्रियः शूरतमः न सर्वे मनुष्या इति । एवं हि पृथक्करणं समभिव्याहृतैकधर्मान्वयरूपं निर्धारणशब्दवाच्यमपि समर्थितं भवति । न चात्र जातिगुणक्रियाभिः पृथक्करणं निर्धारणमिति वैयाकरणाभिमतं पृथक्करणमिदं नेति वाच्यम्, अस्मिन्पृथक्करणे जातिगुणक्रियाणामप्यनुप्रवेशात् । तथा हि– क्षत्रिया एव शूरा न सर्वे मनुष्या इत्यत्र प्रागुक्तैकधर्मान्वयव्यवच्छेदकभेदपर्यवसन्नतया निर्धार्यधर्मितावच्छेदकभूतानां जात्यादीनां शूरत्वं न मनुष्येषु कात्स्न्र्येन, किं तु क्षत्रियरूपतदेकदेशावच्छेदेनेति समभिव्याहृतधर्मान्वयसंकोचकतयानुप्रवेशः स्पष्ट इति । तथा च तद्व्यापकत्वे सति तद्व्याप्यव्यापकत्वं षष्ठ्यर्थः; मनुष्यत्वाव्यापकं तद्व्याप्यक्षत्रियत्वव्यापकं च यच्छूरत्वं तद्वान्क्षत्रिय इत्यर्थः । अस्मिञ्छाब्दबोधे षष्ठ्याः स्वार्थघटकतया क्षत्रियेण स्वप्रतिसंबन्धिसमर्पकतया शूरेण च साकाङ्क्षतयोभयसापेक्षस्य षष्ठ्यन्तस्य केनापि साकं सामर्थ्याभावात् सिद्ध एव समासाभावः 'न निर्धारणे' इति सूत्रेणानूद्यते । यत्र तु नैवंरूपः षष्ठ्यर्थः । किं तु निरूपकत्वमात्रपरः नागानामुत्तमो नागोत्तम इत्यादौ, तत्र षष्ठ्या एकमात्रसापेक्षतया उत्तमपदेन साकं सामर्थ्यादप्रतिबद्धः समा-

सः । इदमेवाभिमतं त्रितयसंनिधाने समासनिषेधवादिनः कैयटस्यापि, अस्मदुक्तनिर्धारणस्य त्रितयसंनिधानसापेक्षतया तत्र चासामर्थ्येन समासाभावस्य सिद्धत्वादिति । अत एव नागोत्तम इत्यादौ निरूपकत्वमात्रस्य षष्ठ्यर्थत्वेन षष्ठीनिर्वाहाय त्रितयापेक्षा नास्तीति तादृशस्थले समासोऽप्रतिबद्ध इत्यप्युक्तम् । अत एवोक्तं भगवत्पादैरपि सहस्रनामभाष्ये पुरुषोत्तमनामव्याख्यानावसरे 'पुरुषाणामुत्तमः पुरुषोत्तमः 'न निर्धारणे' इति समासनिषेधो न भवति, इह जात्याद्यनपेक्षया समर्थत्वात् । यत्र तु जात्याद्यपेक्षया पृथग्भावस्तत्रासमर्थत्वान्निषेधः प्रवर्तते मनुष्याणां क्षत्रियः शूरः, गवां कृष्णा संपन्नक्षीरतमा, गच्छतां धावन्शीघ्रतम इत्यादौ' इति । अथवा वीरेषु भद्र इति सप्तम्यन्तपूर्वपदः 'संज्ञायाम्' इति समासः । एतेन च द्वादशी महेश्वरमूर्तिरनुसंहिता । यथोक्तं वातूलशुद्धे-- 'एकादशं गजारिः स्याद्द्वादशं वीरभद्रकम्' इति । महेश्वरव्यूहान्तर्गतत्वादेव त्रिमूर्त्यात्मकत्वेन वीरभद्रः शिवपुराणे वर्णितः । यथा-- 'आ नाभेर्ब्रह्मणो रूपमा कण्ठाद्वैष्णवं वपुः । आ ललाटान्महादेवं त्रिरूपं तु त्रयीमयम्' इति । यत्तु व्याख्यानं वराहपुराणोक्तरीत्या 'रुद्रक्रोधोद्भवो यस्तु पूर्वं

मग्नो महाजले । स सहस्रार्कसंकाशो निश्चक्राम जलात्तदा' इति ब्रह्मकोपोत्पन्नस्थाणूरुद्रः प्रजापतिपदस्थित एव वीरभद्र इति; तस्मिन्पक्षे संहाररुद्रव्यूहान्तर्भावः, ब्रह्मकोपोत्पन्नत्वलिङ्गादिति ध्येयम् ॥ ५५ ॥

गणनाथ इति । गणानां नाथो गणनाथः, वीरभद्रावतारे गणानां सृष्टेः प्रागुक्तत्वात् । यद्वा गणा नन्दिभृङ्गिमहाकालप्रभृतयः, तेषां नाथ इत्यर्थः ॥ ५६ ॥

प्रजापतिरिति । स्थाणूरुद्रस्य प्रजापतिष्वन्तर्भावादिति प्रागेवोक्तम्, तस्य च प्रजापतित्वम् 'सहस्राणि सहस्रशो ये रुद्रा अधिभूम्याम्' इति श्रुतिप्रसिद्धासंख्यातरुद्रसर्गस्य तदधीनत्वात् ॥ ५७ ॥

हिरण्यरेता दुर्धर्षो गिरीशो गिरीशोऽनघः ।
भुजंगभूषणो भर्गो गिरिधन्वा गिरिप्रियः ॥

हिरण्यरेता इति । हिरण्यं हिरण्यात्मकं रेतो यस्य स तथोक्तः; रुद्रेण सर्गादावपः सृष्ट्वा, तासूत्सृष्टस्य वीर्यस्य हिरण्यरूपब्रह्माण्डात्मना परिणतत्वात् । यथोक्तं स्कान्दे सौरसंहितायाम्— 'त्रिमूर्तीनां तु सर्गस्यानन्तरं परमः शिवः । शब्दादीनां तु भूतानामुत्पत्तिं कुरुते स्वयम्' इत्या-

दिना त्रिमूर्त्यादिसर्गमुक्त्वा, 'सदाशिवेश्वरौ रुद्रस्तथा नारायणो विधिः । इति नाम्ना प्रकीर्त्यन्ते तेषु रुद्रः शिवाश्रया ॥ पुरस्तादण्डसर्गस्य ससर्जापो द्विधा पुनः । अपामेकांशके विद्वन्स्वकं वीर्यमपासृजत् ॥ तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् । तस्मिन्जज्ञे स्वयं विष्णुर्ब्रह्मांशेन समन्वितः ॥ आपो नारा इति प्रोक्ताः सूक्ष्मास्ता मुनिसत्तम । शिवस्य नरसंज्ञस्य यतः कार्याणि तास्ततः ॥ ता यदस्यायनं प्रोक्तं तेन नारायणः स्मृतः । अंशोपाधिवशेनैव ब्रह्मेति परिकीर्तितः ॥ अपामन्तरवस्थानान्नारायण इतीरितः' इति । यद्वा हिरण्यजनकत्वाद्धिरण्यम्, तद्रेतो यस्येति बहुव्रीहिः प्राग्वदेव । हिरण्यजनकत्वं तु कुमारोत्पत्तौ भगवद्वीर्यसंस्पर्शमात्रेण तत्रत्यानां सौवर्णत्वस्य रामायणे दर्शितत्वादिति भेदः । यथोक्तं बालकाण्डे-- 'निक्षिप्तमात्रे गर्भे तु तेजोभिरभिरञ्जितम् । सर्वं पर्वतसंनद्धं सौवर्णमभवद्वनम्' इति ॥ ५८ ॥

दुर्धर्ष इति । दुःखेन धर्षणीयः, केनापि धर्षयितुमशक्य इति भावः । सर्वथा अलभ्ये दुर्लभ इति प्रयोगात् । धृषेः प्रागल्भ्यार्थकस्य लक्षणया तत्पूर्वकाभिभववृत्तेः कर्मणि 'ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्' इति खल्प्रत्यये रूपम् ।

अस्मिंश्चार्थे 'न तत्समश्चाभ्यधिकश्च विद्यते' इति श्रुतिर्मानम् ॥ ५९ ॥

गिरीश इति । गिरेः कैलासस्य ईशः गिरीशः, यद्वा गिरीणां कैलासमेरुमन्दरादीनामीशो गिरीशः । पर्वताधिपत्यं च शिवस्य हरिवंशे धन्याश्चर्योपाख्याने नारदं प्रति पर्वतानां वचने दर्शितम्— 'ब्रह्मर्षे न वयं धन्या नाप्याश्चर्याणि सन्ति नः । अस्माकमीश्वरः शूली गिरिशो वृषभध्वजः ॥ नाश्चर्यो वापि धन्यो वा तस्मात्परतरो भुवि' इति ॥ ६० ॥

गिरिश इति । गिरौ कैलासे शेत इति गिरिशः 'गिरौ डश्छन्दसि' इति डप्रत्ययः, छान्दसा अपि क्वचिद्भाषायां प्रयुज्यन्ते इति टीकासर्वस्वे । यद्वा गिरिं मेरुं श्यति तनूकरोति लघूकरोति चापत्वेन धारणादिति गिरिशः ; 'आतोऽनुपसर्गे कः' इति कः । अत्र प्रथमव्याख्याने गिरौ शयनं न हि लोकसिद्धं विवक्षितं किं तु शीधातुना सुखावस्थानं विवक्षितमिति 'त्रयोविंशं सुखासनम्' इति वातूलशुद्धप्रसिद्धा महेश्वरमूर्तिरनुसंहिता । इदं च श्रुतिसिद्धं नाम ; 'नमो गिरिशाय च शिपिविष्टाय च' इति ॥ ६१ ॥

अनघ इति । न विद्यतेऽघं पापं दुःखं वा यस्य स

तथा । 'एष आत्मापहतपाप्मा विजरो विमृत्युर्विशोकः' इति श्रुतेः ॥ ६२ ॥

भुजंगभूषण इति । 'भुजकौटिल्ये' भुजं कुटिलं यथा तथा गच्छन्तीति भुजंगाः सर्पाः, 'खच्च डिद्वा वक्तव्यः' इति खच्; त एव भूषणं यस्य स तथा । भुजंगाश्चात्र दारुकावनस्थमुनिकृताभिचारोत्पन्नः गरुडभीत्या शरणागता वासुकिप्रभृतयश्च गृह्यन्ते । यथोक्तं स्कान्दे—'ततः पञ्चफणा नागा निःश्वसन्तो विषोल्बणाः । शीघ्रमुत्थाय कुण्डेभ्यः समाजग्मुर्महेश्वरम् ॥ तानुपादाय नागेन्द्राञ्ज्वलितानुपशोभितान् । दधाराभरणत्वेन तेनासीन्नागभूषणः ॥ अपरैरपि नागेन्द्रैर्वासुकिप्रमुखैः शिवः । वैनतेयभयात्प्राप्तैरलंचक्रे निजां तनूम्' इति । एतेन ये लोकानामुद्वेजकास्त एवास्य भूषणानीत्युक्त्या सर्वाभिभावकत्वमुक्तम् ॥ ६३ ॥

भर्ग इति । भर्ज्यन्ते पच्यन्ते दह्यन्ते पापान्यनेनेति भर्गः । भृज्जतेः पाकार्थात्करणे घञ् 'भ्रस्जो रोपधयोरमन्यतरस्याम्' इति रमागमे 'चजोः कुघिण्यतोः' इति कुत्वे च रूपम् । सर्वपापनिवर्तकत्वं च शिवस्य शिवधर्मोत्तरादिषु प्रसिद्धम्! 'छित्त्वा भित्त्वा च भूतानि हत्वा सर्वमिदं जगत् । यजेदेकं विरूपाक्षं न स पापेन लिप्यते'

इति । इदं च श्रुतिप्रसिद्धं नाम— 'भर्गो देवस्य धीमहि' इति । ननु नात्र भर्गशब्दोऽकारान्तः प्रयुक्तः; किं तु सकारान्तस्तेजोवाची, सवितुर्देवस्य वरेण्यं तद्भर्गः तेजः धीमहि ध्यायेम यः सविता नः अस्माकं धियः प्रचोदयादिति तदर्थात् । अत एव 'यो देवः सवितास्माकं धियो धर्मादिगोचराः । प्रेरयेत्तस्य यद्भर्गस्तद्वरेण्यमुपास्महे' इति स्मृतिकारैरन्वयक्रमोऽपि दर्शित इति चेत्, न; एवं सति 'धियो यो नः प्रचोदयात्' इति यच्छब्दे पुंलिङ्गानुपपत्तेः । तथाहि— सवितुर्वरेण्यं तद्भर्गो धीमहि धियो यो नः प्रचोदयात्— इति कोऽर्थः? यच्छब्देन किं सविता परामृश्यते, किं वा भर्गः; आद्ये सवितृपदं किं सूर्यपरम्, उत ब्रह्मपरम्; न तावदाद्ये आद्यः, सवितृमण्डलवर्तिनो ब्रह्मणः अन्तर्यामित्वेन सवितुर्धीप्रचोदकत्वाभावात्, तस्य भर्गोविशेषणस्य यच्छब्दपरामर्शनीयत्वकल्पने सर्वनाम्नां प्रकृतप्रधानपरामर्शकत्वव्युत्पत्तिभङ्गाच्च । नाप्याद्ये द्वितीयः, तस्य धीप्रचोदकत्वेऽपि प्रागुक्तव्युत्पत्तिभङ्गदोषस्यानिस्तारात्; किंच सवितृपदस्यैव ब्रह्मपरत्वे वरेण्यं भर्ग इत्यस्यानन्वयापत्तेः, ब्रह्मणोऽपि वरेण्यस्य तेजसोऽभावात् । वरेण्यं लोकश्रेष्ठं सवितुर्भर्ग इति 'राहोः शिरः' इतिवदभेदेऽपि भेदव्यपदेशादन्वयोपपत्तिरिति चेत्,

न; गायत्र्यर्थानुबन्धिषु 'तैत्तिरीयमैत्रायणीयश्वेताश्वतरीय-वाक्येषु 'तां सवितुर्वरेण्यस्य' 'तत्सवितुर्वरेण्यम्' 'तदक्षरं तत्सवितुर्वरेण्यम्' इत्येतेषु सवितृवरेण्यपदयोरन्वयस्य दर्शितत्वेन इहापि तथैव वक्तव्यत्वात् । नापि द्वितीयः, यच्छब्दस्य पुंलिङ्गत्वानुपपत्तेः; तस्मादकारान्त एव भर्गशब्दः । एवं सति यच्छब्दे पुंलिङ्गतोपपद्यते । सवितुः सूर्यस्य वरेण्यं तस्यापि तेजोधायकम् 'येन सूर्यस्तपति' इति श्रुतेः; तत् धीमहि ब्रह्म धीमहि 'ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः' इति गीतावचनात् । यद्वा तदिति सामान्ये नपुंसकम्, 'शक्यं क्षुदुपहन्तुम्' इत्यादिवत् । यो भर्गो धियः प्रचोदयात् इति 'उद्दिश्यमानप्रतिनिर्दिश्यमानयोरैक्यमापादयन्ति सर्वनामानि पर्यायेण तल्लिङ्गभाञ्जि' इति वैयाकरणोक्तरीत्या 'शैत्यं हि यत्सा प्रकृतिर्जलस्य' इतिवत् प्रतिनिर्दिश्यमानभर्गापेक्षया पुंलिङ्गत्वोपपत्तेः । अधुना तु किंचिद्व्यवहितान्वयः कर्तव्यः; वरं हि व्युत्पत्तिभङ्गाद्व्यवहितान्वयः । किंच मैत्रायणीयशाखायाम् 'एष रुद्रो भर्गात्मकः' इति गायत्र्यर्थनिरूपणावसरे अकारान्तपक्षस्यैवोद्घाटितत्वात् । योगयाज्ञवल्क्ये च 'देवस्य सवितुर्मध्ये यो भर्गो नो धियः क्रमात् । प्रचोदयात्तं वरेण्यं धीमहीत्यन्वयक्रमः' इत्यकारान्तपक्षस्यैवो-

द्भावितत्वात्। अत एवोक्तमादित्यपुराणेऽपि—'गायत्र्याः परमं तत्त्वं देवदेवो महेश्वरः। इति ध्यात्वा जपन्विद्वान्गायत्र्याः फलमश्नुते' इति। कौर्मेऽपि राजवंशानुकीर्तने वसुमनसो राज्ञो गायत्र्या सूर्यमण्डलस्थं शिवमुपासीनस्य सूर्यमण्डलान्निर्गतेन शिवेन प्रसादः कृत इत्युपवर्णितम्। यथा— 'राजा वसुमनास्तत्र रविमण्डलमध्यगम्। समुपासिष्ट गायत्र्या पुरुषं रुक्मविग्रहम्॥ अनुग्रहार्थं तस्याथ भगवान्परमः शिवः। आविर्भूय रवेर्बिम्बादस्मै रूपमदर्शयत्॥ शिवशक्तिमयं दिव्यं चन्द्रार्धकृतशेखरम्। त्रिलोचनं नीलकण्ठं ब्रह्मेन्द्रोपेन्द्रवन्दितम्॥ अनुगृह्य च तं कालं देहान्तेऽदान्निजं पदम्। तुष्टश्चिरतरं तस्य गायत्र्याराधनादिभिः' इति। यत्तु प्रागुदाहृतम्— 'यो देवः सवितास्माकम्—' इत्यादि, तत्पर्यवसितार्थाभिप्रायम्। सर्वथापि हि सकलधीप्रचोदकपरब्रह्माधिष्ठितमादित्यात्मकं तेज उपास्यमिति। अत एव माधवीयस्मृतिरत्ने 'यो देवः सविता' इत्युदाहृतश्लोकस्यास्मदुक्तरीत्यैवार्थो दर्शितः। यथा— 'तदित्येतत्परं ब्रह्म ध्येयं तत्सूर्यमण्डले' इति, 'भर्गः स्वसाक्षात्कारेणाविद्यातत्कार्यदाहकः' इति; 'य इत्यरूपमव्यक्तं सत्यानन्दादिलक्षणम्' इति च। भृज्जति पचति दहति स्वसाक्षात्कारेण

अविद्यां तत्कार्यभूतं संसारं चेति भर्गः इति व्युत्पत्त्या भर्ग इत्यकारान्तताया: स्पष्टमभिधानात् । प्रथमं तच्छब्दस्य ब्रह्मपरत्वोद्भावनात् य इत्यत्र यत्पदं प्रथमोपात्तसत्यानन्दादिलक्षणतत्पदार्थपरब्रह्मपरामर्शीत्यनेन 'यो देवः सवितास्माकम्' इति श्लोकदर्शितान्वयरीत्या सवितृपरामर्शकमिति न भ्रमितव्यमित्युपदर्शितत्वाच्च । तस्मात् पर्यवसितार्थपर एवायं श्लोक इति । विस्तरस्तु अस्मद्दीक्षितप्रणीते शिवतत्त्वविवेके द्रष्टव्यः ॥ ६४ ॥

गिरिधन्वेति । गिरिः मेरुः धनुर्यस्येति वा धन्व यस्येति वा गिरिधन्वा । प्रथमव्याख्याने 'धनुषोऽनङ्' इत्यनङ् समासान्तः । इदं च अर्थतः श्रुतिप्रसिद्धं नाम; 'रुद्राय स्थिरधन्वने गिरः' इति च्छन्दोगानाम्; देवव्रते च 'नमः स्थिराय स्थिरधन्वने' इति ॥ ६५ ॥

गिरिप्रिय इति । गिरयः कैलासमेरुमन्दरादयः प्रिया यस्य आवासत्वेनेति वा, धन्याश्चर्योपाख्यानोक्तरीत्या स्वत्वेन वा 'सर्वे शिलोच्चयाः पुण्याः सर्वा नद्यश्च भारत' इति भारतोक्तरीत्या पुण्यदेशत्वेनेति वा गिरिप्रियः ॥ ६६ ॥

कृत्तिवासाः पुरारातिर्भगवान्प्रमथाधिपः ।
मृत्युंजयः सूक्ष्मतनुर्जगद्व्यापी जगद्गुरुः ॥

कृत्तिवासा इति । कृत्तिः दारुकावनस्थमुनिकृताभिचारोत्पन्नव्याघ्रस्य चर्म वासः वस्त्रं यस्य स तथा । यथोक्तं स्कान्दे— 'ततो व्याघ्रो महान्क्रुद्ध आजगाम नखायुधः । तेषामृषीणां मर्मस्थः कोपोऽयं निर्गतो यथा ॥ तं चादाय त्वचं भित्त्वा तदा चर्माम्बरोऽभवत् । शुशुभे चर्मणा तेन नानावर्णयुतेन च' इति । अथवा काश्यां शिवभक्तजिघांसयागतस्य गजासुरस्य कृत्तिरत्र विवक्षिता । यथोक्तं स्कान्द एव— 'वाराणस्यां पुरायातो गजरूपो महासुरः । तापसाञ्शिवभक्तांश्च निहन्तुं कोपदीपितः' इत्युपक्रम्य 'हत्वा तं कुञ्जरं भीममधृष्यं दिग्गजैरपि । पादहस्तयुतं चर्म विशस्याच्छिद्य तेन वै । प्रावृत्यात्मानमात्मेशः स्तूयमानोऽखिलैः सुरैः' इति । अत्र द्वितीयव्याख्याने एकादशी महेश्वरमूर्तिरनुसंहिता, 'एकादशं गजारिः स्यात्' इति वातूलशुद्धवचनात् । इदं च श्रुतिप्रसिद्धं नाम; 'प्राणेश्वरः कृत्तिवासाः पिनाकी' इति ॥ ६७ ॥

पुरारातिरिति । पुराणां शरीराणां स्थूलसूक्ष्मकारणात्मनाम् अरातिः शत्रुरिति पुरारातिः । तदरातित्वं च शिवस्य स्वज्ञानस्य विदेहकैवल्यहेतुत्वात्; तच्च मन्त्रोपनिषदि प्रसिद्धम्— 'भावग्राह्यमनीशाख्यं भावाभावकरं शिवम् ।

कलासर्गकरं देवं ये विदुस्ते जहुस्तनुम् ' इति ॥ ६८ ॥

भगवानिति । 'ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा' इति विष्णुपुराणवचनात् ऐश्वर्यादिगुणषट्कं भगः तद्वान् भगवान् । तत्र समग्रमैश्वर्यं नाम सर्वविषयकमैश्वर्यम् । तच्च 'ध्येयः सर्वैश्वर्यसंपन्नः सर्वेश्वरः शंभुराकाशमध्ये' इति 'भूयः सृष्ट्वा पतयस्त्वथेशः सर्वाधिपत्यं कुरुते महात्मा । तमीश्वराणां परमं महेश्वरम्' इत्यादिश्रुतिसिद्धं वीर्यं पराक्रमः शरभभैरववीरभद्राद्यवतारप्रसिद्धः ; स च 'न वा ओजीयो रुद्र त्वदस्ति' इति 'क्षयद्वीराय प्रभरामहे मतिम्' इत्यादिश्रुतिसिद्धः । यशः सकलजनस्तुत्यत्वम् ; तच्च 'नमः श्लोक्याय चावसान्याय च' 'विदाम देवं भुवनेशमीड्यम्' 'तस्य नाम महद्यशः' इत्यादिश्रुतिभिः 'यं विष्णुरिन्द्रः शंभुश्च ब्रह्मा लोकपितामहः । स्तुवन्ति विविधैः स्तोत्रैर्देवदेवं महेश्वरम् । तमर्चयन्ति ये शश्वदुर्गाण्यतितरन्ति ते' इत्यादिभारतवचनैश्च प्रसिद्धम् । श्रीः अम्बिकैव, 'श्रियं लक्ष्मीमौपलामम्बिकां गाम्' इति श्रुतेः ; तद्वत्त्वं च 'उमासहायं परमेश्वरं प्रभुम्' इत्यादिश्रुतिसिद्धम् । ज्ञानं सर्वविषयकम् ; तच्च 'यः सर्वज्ञः सर्ववित्' 'स विश्वकृद्विश्व-

विदात्मयोनिः' इत्यादिश्रुतिसिद्धम् । वैराग्यं सर्वत्र निःस्पृहता; तच्च सर्वत्रौदासीन्यप्रतिपादिकाभिः 'न तस्य कार्यं करणं च विद्यते' इत्यादिश्रुतिभिः, 'ज्ञानं विरागतैश्वर्यं तपः सत्यं क्षमा धृतिः । स्रष्टृत्वमात्मसंबोधो ह्यधिष्ठातृत्वमेव च । अव्ययानि दशैतानि नित्यं तिष्ठन्ति शंकरे' इति स्मृतिभिश्च सिद्धम् ॥ ६९ ॥

प्रमथाधिप इति । प्रमथ्नन्ति अवैदिकानिति प्रमथाः पार्षदाः, तेषामधिपः प्रमथाधिपः । प्रमथानां च तथात्वं सौप्तिके दर्शितम्; यथा तान्प्रकृत्य 'मनोवाक्कर्मभिर्भक्तान्पान्ति पुत्रानिवौरसान् । पिबन्त्यसृग्रसांश्चान्ये क्रुद्धा ब्रह्मद्विषां सदा' इति ॥ ७० ॥

मृत्युंजय इति । मृत्युः मरणं स्वभक्तानां मृत्युं जयति स्वोपासनया परिहरतीति मृत्युंजयः । 'संज्ञायां भृतृवृजिधारिसहितपिदमः' इति खच् । 'त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्' इति मन्त्रलिङ्गात्, 'यस्मिन्युक्ता ऋषयो देवताश्च, तमेव ज्ञात्वा मृत्युपाशान्छिनत्ति' इति श्रुतेश्च ॥ ७१ ॥

सूक्ष्मतनुरिति । सूक्ष्मा दुर्ग्रहा तनुर्यस्य स तथा, 'सूक्ष्मातिसूक्ष्मं कलिलस्य मध्ये घृतात्परं मण्डमिवाति-

सूक्ष्मं ज्ञात्वा शिवं सर्वभूतेषु गूढम्' इत्यादिश्रुतेः । यद्वा सूक्ष्मादपि तनुः अतिसूक्ष्म इत्यर्थः, 'अणोरणीयान्' इति श्रुतेः ॥ ७२ ॥

जगद्व्यापीति । व्याप्तुं शीलमस्यास्तीति व्यापी । 'सुप्यजातौ णिनिस्ताच्छील्ये' इति णिनिः । यद्यपि काशिकायां वृत्तौ 'अनुवर्तमाने सुब्ग्रहणमुपसर्गव्यावृत्त्यर्थम्' इत्युक्ततया नात्र णिनिर्लभ्यः, तथापि तदेव वृत्तिकारवचनं भाष्यविरोधादुपेक्षणीयम् । उक्तं हि महाभाष्ये— 'अथ सुबिति वर्तमाने पुनः सुब्ग्रहणं किमर्थमनुपसर्ग इत्येवं तदभूत्; इदं तु सुब्मात्रे यथा स्यात्' इति । उदाहृतं च 'उदासारिण्यः प्रत्यासारिण्यः' इति । अत एव 'न्यषेधि शेषोऽप्यनुयायिवर्गः' 'स बभूवोपजीविनाम्' 'भ्रमरैः कुसुमानुसारिभिः' 'पतत्यधो धाम विसारि सर्वतः' 'न वञ्चनीयाः प्रभवोऽनुजीविभिः' इत्यादयो रघुवंशमाघभारविकाव्यप्रयोगा अप्युपपन्नाः । जगतो व्यापी जगद्व्यापी, 'सर्वव्यापी च भगवान् तस्मात्सर्वगतः शिवः' इति श्रुतेः । इदं चार्थतः श्रुतिप्रसिद्धं नाम । अथर्वशिरसि वाच्यवाचकयोरभेददृष्ट्या प्रणवे 'यः प्रणवः स व्यापी सोऽनन्तः' इत्यादिना सर्वव्यापीति नाम प्रयुज्य अथ 'कस्मादुच्यते

सर्वव्यापी' इति प्रश्नपूर्वकं तन्निर्वचनात् ॥ ७३ ॥

जगद्गुरुरिति । जगतो गुरुः आद्यविद्योपदेष्टा जगद्गुरुः, जगत्पितामहस्य ब्रह्मणोऽपि प्रथमं वेदोपदेष्टृत्वात् । तथा च श्रुतिः— 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै' इति । योगपातञ्जलेऽप्युक्तम्— 'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः । स पूर्वेषामपि गुरुः कालेनानवच्छेदात्' इति । एतेन सकलजनज्ञानोपदेष्ट्री दक्षिणामूर्तिरूपा 'दक्षिणामूर्तिरूपं तु चतुर्विंशत्प्रकीर्तितम्' इति वातूलशुद्धवचनावगता महेश्वरस्य चतुर्विंशतितमा मूर्तिरनुसंहिता ॥ ७४ ॥

व्योमकेशो महासेनजनकश्चारुविक्रमः ।
रुद्रो भूतपतिः स्थाणुरहिर्बुध्न्यो दिगम्बरः ॥

व्योमकेश इति । गङ्गाधारणसमये व्योमवद्विशालो जटावलयरूपः केशोऽस्येति व्योमकेशः । यद्वा व्योमैव केशो यस्य स व्योमकेशः, 'दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम्' इति भगवद्गीतास्वाहृत्य वचनेन 'नारायणोऽपि भगवान्देवकीतनयो हरिः । अर्जुनाय स्वयं साक्षाद्दत्तवानिदमुत्तमम्' इति कूर्मपुराणवचनात् तत्रत्येश्वरगीता-

भगवद्गीतयोरैकार्थ्यनिश्चयेन च शैवत्वेन निश्चिते अर्जुनाय कृष्णेन दर्शिते विश्वरूपे 'दिवं ते शिरसा व्याप्तम्' इति वचनेन दिवः शिरस्त्वेनावगमात् । यथा च भगवद्गीतोपवर्णितं विश्वरूपं शैवं तथा प्रपञ्चितमस्मद्दीक्षितैः शिवतत्त्वविवेकादिषु ॥ ७५ ॥

महासेनजनक इति । महती सेना यस्य स महासेनः स्कन्दः, देवसेनाधिपत्वात्, तस्य जनक इत्यर्थः । एतेन महासेनजननस्य उमासाहित्यसापेक्षतया सोमास्कन्दाख्या 'विन्नप्रसादं विंशच्च सोमास्कन्दमतः परम्' इति वातूलशुद्धवचनसिद्धा एकविंशतितमा महेश्वरमूर्तिरनुसंहिता ॥ ७६ ॥

चारुविक्रम इति । चारुः मनोहरः कटाक्षस्मितादिरूपतया विक्रमः कामदहनत्रिपुरशिक्षणादिरूपो यस्य स तथा । एतेन लीलारूपपराक्रमकीर्तनेन पादाङ्गुष्ठोल्लेखनजनितस्य सुदर्शनस्य स्वतः समुद्धरणमात्रसिद्धस्य जलन्धरवधस्यापि क्रोडीकारात् 'झलंधरवधं दश' इति वातूलशुद्धवचनावगता महेश्वरस्य दशमी मूर्तिरनुसंहिता ॥ ७७ ॥

रुद्र इति । रोदयत्यन्तकाले सर्वमिति रुद्रः । 'रोदेर्णिलुक् च' इत्युणादिसूत्रेण रुदेर्ण्यन्ताद्रकि णिलोपे च रूपम् । इयं च व्युत्पत्तिः छान्दोग्ये 'पुरुषो वाव यज्ञस्तस्य

यानि चतुर्विंशतिवर्षाणि' इति खण्डे प्राणेषु रुद्रपदं प्रयुज्य रुद्रपदप्रवृत्तिनिमित्ताभावात् कथं रुद्रपदवाच्यता प्राणानाम् इति शङ्कायां तत्समर्थयमानया श्रुत्या प्रदर्शिता— 'प्राणा वाव रुद्राः एते हीदं सर्वं रोदयन्तीति । यत्तु रुद्रो वा एष यदग्निः' इत्युक्त्वा 'सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वम्' इति व्युत्पादनं श्रुतौ तत्प्रसिद्धाग्निविषयं न शिव-विषयमिति न्यायसुधायाम् । वस्तुतस्तु सा श्रुतिर्यथा तथा वास्तु । रोदितीति रुद्र इत्यण्यन्तादपि रुदेः 'प्रत्ययतः प्रकृतेश्च तद्ग्राह्यम्' इत्यौणादिकरक्प्रत्ययेन रुद्रपदं साधयितुं शक्यम् । ब्रह्मणः प्रीत्यर्थं तस्य ललाटादाविर्भूतस्य परमेश्वरस्य शैशवाभिनयार्थं रोदनस्य भारते शान्तिपर्वणि दर्शितत्वात् । यथा— 'ततस्तां विपुलां नीतिं पूर्वं जग्राह शंकरः । बहुरूपो विशालाक्षः शिवः स्थाणुरुमापतिः ॥ अनादिनिधनो देवश्चैतन्यादिसमन्वितः । ज्ञानानि च वशे यस्य तारकादीन्यशेषतः ॥ अणिमादिगुणोपेतमैश्वर्यं न च कृत्रिमम् । तुष्ट्यर्थं ब्रह्मणः पुत्रो ललाटादुत्थितः स्वयम् ॥ अरुदत्सुस्वरं घोरं जगतः प्रभुरव्ययः । पिता पुत्रे जायमानः पुत्रः पितरि चैव हि' इति । अथवा रुत् दुःखं दुःखहेतुरज्ञानं वा तद्द्रावयतीति रुद्रः । पृषोदरादित्वात्सा-

धुः । यथोक्तं वायवीयसंहितायाम्— 'रुद्दुःखं दुःखहेतुर्वा तद्द्रावयति यः प्रभुः । रुद्र इत्युच्यते तस्माच्छिवः परमकारणम्' इति । हरिवंशे कैलासयात्रायामप्युक्तम् 'रुद्रो देवो रोदनाद्द्रावणाच्च' इति । यत्त्वानुशासनिके वचनम्— 'यन्निर्दहति यत्तीक्ष्णो यदुग्रो यत्प्रतापवान् । मांसशोणितमज्जादो यत्ततो रुद्र उच्यते' इति, तत् तावद्विधव्युत्पत्तिप्रदर्शनपरमिति न भ्रमितव्यम्, अनुशासनाभावात्; किं तु 'बहिरन्तर्जगद्विश्वं प्राप्य तेजोमयी शुभा । रौद्री रुद्राभिधा मूर्तिरास्थिता घोररूपिणी' इति शिवपुराणवचनेन अग्न्यधिष्ठात्र्या मूर्तेः रुद्रपदवाच्यतानिश्चयात्, तस्यां च रोदयितृत्वमेव प्रवृत्तिनिमित्तमुपवर्णयितुम्, तच्च क्लेशजनकत्वं विना न संभवतीति तादर्थ्येन तीक्ष्णत्वादिवह्निनिष्ठधर्मप्रदर्शनपरमिति बोद्धव्यम्, शरीरधर्मेण शरीरिणो व्यपदेशौचित्यात्; दाहकत्वादयो ह्यग्निधर्माः; मांसशोणितमज्जादत्वं च जाठराग्नेराहारदोषोभयाभावे वैद्यशास्त्रे प्रसिद्धम्; यथोक्तम्— 'आहारं पचति शिखी दोषानाहारवर्जितः पचति । दोषक्षये च धातून्पचति च धातुक्षये प्राणान्' इति । मतान्तरे तु सूर्याधिष्ठात्र्या मूर्तेः रुद्र इति नाम; यथोक्तं लैङ्गे उपरिभागे— 'सूर्यात्मा भगवान्देवः सर्वदेवविभूतिदः । रुद्र इत्युच्यते देवैर्भगवा-

न्मुक्तिभुक्तिदः' इति । अस्मिन्पक्षे रुजं द्रावयतीति व्युत्पत्तिः द्रष्टव्या, 'आरोग्यं भास्करात्' इति वचनेन आदित्यमूर्तेः रोगनिर्हारकत्वात् । इदं च बहुश्रुतिप्रसिद्धं नाम; 'नमस्ते रुद्र मन्यवे' 'रुद्र यत्ते दक्षिणं मुखम्' 'इमा रुद्राय' 'रुद्राय तीरसदे नमः' इति ॥ ७८ ॥

भूतपतिरिति । भूताः देवयोनिविशेषाः तेषां पतिरित्यर्थः । प्रतिसायं लोकपीडार्थं प्रवर्तमानानां तेषां नटनप्रदर्शनेन पारवश्यं संपाद्य शिवेनैव नियमनं क्रियत इति भारते उमामहेश्वरसंवादे देवीकृतश्मशानवासनिमित्तप्रश्नोत्तरे सूचितम् । यथा— 'मदन्येन न शक्यं तन्निहन्तुं भूतजं भयम् । तत्रस्थोऽहं प्रजाः सर्वाः पालयामि दिने दिने ॥ मन्नियोगाद्भूतसंघा न च घ्नन्तीह कंचन । तांस्तु लोकहितार्थाय श्मशाने रमयाम्यहम्' इति । यद्यप्यत्र सामान्यतो 'रमयामि' इत्युक्तम्, तथापि सायं नर्तनेनैव तदिति सकलशिवपुराणप्रसिद्धम् । ततश्च 'तृतीयं च वृषारूढं चतुर्थं नृत्तरूपकम्' इति वातूलशुद्धप्रसिद्धा चतुर्थी महेश्वरमूर्तिरनुसंहिता ॥ ७९ ॥

स्थाणुरिति । त्रिपुरविजयसमये सज्जीकृतचापः सन् पुराणां योगं प्रतीक्ष्य निश्चलतया स्थित इति स्थाणुः ।

'स्थो णुः' इत्युणादिसूत्रेण स्थाधातोर्णुर्भवतीत्यर्थकेन कर्तरि णुः । तथा चोक्तं द्रोणपर्वणि—'अतिष्ठत्स्थाणुभूतः सन्सहस्रं परिवत्सरान् । यदा त्रीणि समेतानि अन्तरिक्षे पुराणि वै ॥ त्रिपर्वणा त्रिशल्येन तदा तानि विभेद सः' । यद्वा स्थाणुः वृक्षः, तत्साम्यात् स्थाणुः । अत एवोदाहृतवचने 'स्थाणुभूतः सन्' इत्युक्तम्, पितृभूतः पुत्र इत्यादाविव भूतशब्दस्योपमार्थकत्वात् । अत एव श्रुतिरप्याह— 'वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम्' इति । यद्वा महालिङ्गप्रादुर्भावसमये ज्योतिर्लिङ्गरूपेण तिष्ठति निश्चलतया वर्तत इति स्थाणुः । अत एवागमेषु पठ्यते— 'नमोऽस्तु स्थाणुभूताय ज्योतिर्लिङ्गामृतात्मने । चतुर्मूर्तिवपुश्छायाभासिताङ्गाय शंभवे' इति । उक्तव्युत्पत्तित्रयं च द्रोणपर्वणि दर्शितम्— 'दहत्यूर्ध्वं स्थितो यच्च स्थाणुवत्तस्थितं च यत् । स्थिरलिङ्गं च यन्नित्यं तस्मात्स्थाणुरिति स्मृतः' इति । ऊर्ध्वं विद्यमानं पुरत्रयं स्थितः सन् यद्दहतीत्याद्या व्युत्पत्तिः । तस्थितं तात्कालिकावस्थानं च यत्स्थाणुवदिति द्वितीया । स्थिरलिङ्गं च यदिति तृतीया सूचिता । एतेन च तृतीयेन व्याख्यानेन सदाशिवव्यूहान्तर्गतेषु पञ्चसादाख्येषु यद्द्वितीयममूर्तं सादाख्यं तदनुसंहितम् । यथोक्तं वातूलशुद्धे—

'आदिशक्तेर्दशांशेन अमूर्तस्य समुद्भवः । आदिशक्तेरमूर्तत्वादमूर्तमिति कीर्तितम् ॥ अमूर्तत्वात्कलाहीनं तद्रूपं लिङ्गवद्भवेत् । सूर्यकोटिप्रतीकाशं ज्योतिस्तम्भाकृति स्मृतम् ॥ तस्या ह्यन्तर्गता मूर्तिर्मूर्तादिरिति चोच्यते । एतद्वै दिव्यलिङ्गं तु मूलस्तम्भमिहोच्यते' इति ॥ ८० ॥

अहिर्बुध्न्य इति । बुध्नः मूलम्, 'मूलं बुध्नोऽङ्घ्रि नाम च' इत्यमरः । तत्र बुध्ने ब्रह्माण्डमूलभूते पाताले साधुः बुध्न्यः पातालवर्तीति यावत्; तादृशोऽहिः सर्पः शेषः इति यावत् । शेषस्य च तामसमूर्तित्वं रुद्रात्मकसंकर्षणाविर्भावस्थानत्वं च विष्णुपुराणे द्वितीयेंशेऽभिहितम् । यथा 'पातालानामधश्चास्ते विष्णोर्या तामसी तनुः । शेषाख्या तद्गुणान्वक्तुं न शक्ता दैत्यदानवाः ॥ कल्पान्ते यस्य वक्त्रेभ्यो विषानलशिखोज्ज्वलः । संकर्षणात्मको रुद्रो निष्क्रम्यात्ति जगत्त्रयम्' इति । इदं च पदद्वयात्मकमेकं नाम ॥ ८१ ॥

दिगम्बर इति । दिश एव अम्बराणि यस्य स तथोक्तः । इदं च दारुकावने मुनिवधूपरीक्षार्थमुपात्ताया मूर्तेर्नाम । एतेन सर्वसंमोहकत्वमुक्तम् ॥ ८२ ॥

अष्टमूर्तिरनेकात्मा सात्त्विकः शुद्धविग्रहः ।
शाश्वतः खण्डपरशुरजः पाशविमोचकः ॥

अष्टमूर्तिरिति । पञ्चभूतानि चन्द्रार्कावात्मा चेत्यष्टौ मूर्तयः शरीराणि यस्येत्यष्टमूर्तिः । पृथिव्याद्यभिमानिन्यः शर्वादिमूर्तयः उक्ताः वक्ष्यमाणाश्च यद्यपि तथाप्यनेन समष्ट्यभिमानिनी विश्वंभराख्या मूर्तिरुच्यते । यथोक्तं लैङ्गे— 'अष्टमूर्तिर्जगद्व्याप्य स्थितोऽयं परमेश्वरः । चराचराणां भूतानां धाता विश्वंभरात्मकः । भवश्चेत्युच्यते देवैर्भगवान्वेदवादिभिः' इति । वायुसंहितायामपि— 'तस्य देवादिदेवस्य मूर्त्यष्टकमिदं जगत् । भूम्यम्भोऽग्निमरुद्व्योमक्षेत्रज्ञार्कनिशाकराः । अधिष्ठिता महेशस्य शर्वाद्याभिश्च मूर्तिभिः । चराचरात्मकं विश्वं धत्ते विश्वंभरात्मना' इति ॥ ८३ ॥

अनेकात्मेति । अनेक आत्मा यस्य स तथोक्तः; प्रपञ्चशरीरात्मक इत्यर्थः, 'सर्वो ह्येष रुद्रः' इत्यादिश्रुतेः । 'यस्य यस्य पदार्थस्य या या शक्तिरुदाहृता । सा सा गौरी महादेवी स स देवो महेश्वरः' इत्यादिशैवलैङ्गादिस्मृतेश्च ॥

सात्त्विक इति । सत्त्वे भवः सात्त्विकः । अध्यात्मादित्वाट्ठक् । त्रिगुणात्मकमायारूपोपाधौ विद्यमानस्य सत्त्वस्य

संहाररुद्रं प्रति शरीरतया शरीरिणो रुद्रस्य तत्रभवनरूपसत्तौचित्यात् । तमोगुणोपाधिको रुद्र इति प्रसिद्धिस्तु न तमोगुणशरीरतया किं तु संहारे तमोगुणस्योपकरणत्वेन गृहीततया । यथोक्तं स्कान्दे सूतसंहितायाम्— 'यस्य मायागतं सत्त्वं शरीरं स्यात्तमो गुणः । संहाराय त्रिमूर्तीनां स रुद्रः स्यान्न चापरः' इति । अत एव मार्कण्डेयपुराणे खिलरूपेषु रहस्याध्यायेषु प्राधानिकाख्ये प्रथमाध्याये 'सर्वस्याद्या महालक्ष्मीस्त्रिगुणा सकलेश्वरी' इति त्रिगुणात्मकमायाभिमानिन्यां देवतायां लक्ष्मीत्वमुपदिश्य 'बभार रूपमपरं तमसा केवलेन हि । सा भिन्नाञ्जनसंकाशा दंष्ट्राञ्चितवरानना' इत्यादिना तमःप्रधानाविद्याभिमानिनीमेकां मूर्तिम् 'सत्त्वाख्येन विशुद्धेन गुणेनेन्दुप्रभां दधौ । अक्षमालाङ्कुशधरां वीणापुस्तकधारिणीम्' इत्यादिना सत्त्वप्रधानाविद्याभिमानिनीं द्वितीयां मूर्तिमपि तस्या उपदिश्य 'अथोवाच महालक्ष्मीर्महाकालीं सरस्वतीम् । युवां जनयतं देव्यौ मिथुने स्वानुरूपतः' इति ते मूर्ती प्रति तामसत्वसात्त्विकत्वानुगुणस्त्रीपुंससंसर्गविषयकं मूलदेव्या आज्ञापनमुक्त्वा वर्णितम्— 'महाकाली भारती च मिथुनेऽसृजतां स्वयम् । एतयोरपि नामानि रूपाणि च वदामि ते । नीलकण्ठं रक्तबाहुं श्वेताङ्गं चन्द्रशेखरम् ।

जनयामास पुरुषं महाकाली सितां स्त्रियम् । स रुद्रः शंकरः स्थाणुः कपर्दी च त्रिलोचनः । त्रयीविद्या कामधेनुः सा स्त्री भाषाक्षरा स्वरा' इति । अत्र 'श्वेताङ्गम्' 'सिताम्' इति विशेषणाभ्यां रुद्रसरस्वत्योः सत्त्वविग्रहत्वं सूचितम् । ननु 'स्वानुरूपतः' इत्येतदुक्तार्थविरुद्धमिति चेत्, न; प्रत्युत तस्यैवानुकूलत्वात् । तथा हि— त्रिगुणात्मिका माया न कदाचिदेकेनापि गुणेन हीना भवति, किमुत द्वाभ्याम्; केवलतामसत्वादिव्यपदेशस्तु एकेनेतरयोरभिभूततया, गुणानां सर्वथा अन्योन्यसंसृष्टत्वस्वाभाव्यात् । यथोक्तं सांख्यसप्तत्याम्— 'प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः । अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः' इति । तथा सांख्याभियुक्तवचनमपि— 'अन्योन्यमिथुनाः सर्वे सर्वे सर्वत्र गामिनः । रजसो मिथुनं सत्त्वं सत्त्वस्य मिथुनं रजः । तमसश्चापि मिथुने ते सत्त्वरजसी उभे । उभयोः सत्त्वरजसोर्मिथुनं तम उच्यते । नैषामादिः संप्रयोगो वियोगो वोपलभ्यते' इति । तथा च या तामसी मूर्तिः स्थिता तया एकमात्रगुणावलम्बनेन कस्यचिदपि कार्यस्य जनयितुमशक्यतया अवश्यं गुणान्तरमिथुनतासंपत्तिरपेक्षणीया, तथा सात्त्विक्या अपि । एवं च यद्गुणमिथुनमादाय कार्यं

जनयितव्यं तदादाय जनयतमिति 'स्वानुरूपतः' इत्यस्यार्थः। 'तमसश्चापि मिथुने ते सत्त्वरजसी उभे' इति प्रागुदाहृतवचनेन सत्त्वस्य रजसो वा तमोमिथुनत्वयोग्यतया प्रकृते तामसी देवी सत्त्वमिथुनमादाय कार्यं सृष्टवती; तत्रापि 'श्वेताङ्गम्' इति विशेषणेन शरीरस्य सात्त्विकत्वे सिद्धे पारिशेष्यात् सूतसंहितावचनानुरोधाच्च तमस उपकरणत्वं सिद्धम्। यद्वा सत्त्वं प्रयोजनमस्य प्रवर्तकत्वेनेति सात्त्विकः। 'प्रयोजनम्' इति ठञ्। सत्त्वप्रवर्तक इत्यर्थः। तथा च श्रुतिः—'महान्प्रभुर्वै पुरुषः सत्त्वस्यैष प्रवर्तकः' इति। यद्वा सत्त्वानि तत्तज्जीवोपाधिभूताविद्यागतानि प्राचुर्येण प्रस्तुतानि अस्मिन्नेतदधीनानीत्यर्थः। राज्ञि राष्ट्रमितिवत् सप्तम्यर्थोपेतेऽस्मिन्नर्थे 'समूहवच्च बहुषु' इति समूहवद्भावातिदेशात् 'अचित्तहस्तिधेनोष्ठक्' इति ठक्, सर्वप्राणिनिष्ठसत्त्वोद्रेकस्य भगवदधीनत्वात्। अत एव शिवस्य 'सत्त्वात् सुखं च ज्ञानं च' इति सुखहेतुभूतसत्त्वोद्रेकप्रवर्तकत्वलक्षणम् शिवमृडशंभुशंकरादिनामप्रतिपन्नं सुखकरत्वमप्युपपन्नम् ॥ ८५ ॥

शुद्धविग्रह इति। सत्त्वगुण एव शरीरमीश्वरस्येति यत् पूर्वनाम्ना प्रतिपादितं तस्येदमुपपादकं शुद्धविग्रह इति, तमःशरीरत्वे हि नीलविग्रह एव स्यादित्यभिप्रायकम् ।

इदं च उपलक्षणम्, तमःशरीरत्वे निद्रापारवश्यानुचित-विषयक्रौर्यादयोऽपि स्युः; न स्युश्च सुखजनकत्वादय इति। यथोक्तमस्मद्दीक्षितैर्ब्रह्मतर्कस्तवे— 'निद्रालुता न तव शंकर शक्यशङ्का क्रौर्यं किमप्यनुचिते विषये न दृष्टम्। नान्योऽपि कश्चन गुणस्तमसो विकारः शङ्क्या कथं तव बुधैस्तमसाभिभूतिः ॥ संख्यातिशायिगुण सत्त्वनिधिस्त्व-मेव ज्ञानं सुखं च यदि सत्त्वगुणादवाप्यम्। जानी-महे तदुभयं त्वदधीनमीश जाबालसूनृतमुखैर्ननु जन्म-भाजाम्' इति। यद्वा शुद्धो निर्दोषो विग्रहो यस्य स तथा, 'विजरो विशोकः' इति श्रुतेः। 'अप्राकृतशरीरं तमतिमन्मथरूपिणम्। घृतरीतिघनीभूतसच्चिदानन्दविग्रहम्' इति स्मृतेश्च ॥ ८६ ॥

शाश्वत इति। शश्वत् सदा साधुः शाश्वतः। 'कालात्साधुपुष्प्यत्पच्यमानेषु' इति साध्वर्थे अण्प्रत्ययः। 'अव्ययानां भमात्रे' इति टिलोपस्तु न भवति। 'बहिषष्टिलोपो यञ्च' इति टिलोपविधानेन 'येषां च विरोधः शाश्वतिकः' इति निर्देशेन वा तस्य अनित्यत्वज्ञापनात् सदा वर्तमान इति यावत्। तथा चाथर्वशिखायां रुद्रस्य वचनम्— 'अहमेकः प्रथममासं वर्तामि च भविष्यामि च। नान्यः कश्चिन्मत्तो

व्यतिरिक्तः' इति ॥ ८७ ॥

खण्डपरशुरिति । परान् शृणातीति परशुः । 'आङ परयोः खनि शृभ्यां डिच्च' इत्यौणादिकः कुप्रत्ययः । गजासुरवधे खण्डाः परशवोऽस्येति खण्डपरशुरिति टीकासर्वस्वे ॥

अज इति । न जात इत्यजः । 'अन्येष्वपि दृश्यते' इति भूताधिकारे डप्रत्ययः । तथा च श्रुतिः— 'अजात इत्येवं कश्चिद्भीरुः प्रपद्यते रुद्र यत्ते दक्षिणं मुखं तेन मां पाहि नित्यम्' इति ॥ ८९ ॥

पाशविमोचक इति । पाशः संसारः । तथा हि त्रिपदार्थवादिनः शैवा आहुः— पशुः पाशः पतिरिति त्रयः पदार्थाः । तत्र पशुर्नाम जीवः पाशेन बन्धनीयत्वात् पाशो नाम तद्बन्धहेतुरविद्या तत्कार्याणि च । यथोक्तं शिवपुराणे वायवीयसंहितायाम् श्वेताश्वतरोपनिषदः कृत्स्नाया अप्यर्थापनपरे चतुर्थे अध्याये वायुवचने 'पशुपाशपतिज्ञानं यत्तल्लब्धं मया पुरा । तत्र निष्ठा परा कार्या पुरुषेण सुखार्थिना' इत्युपक्रम्य 'अजडं च जडं चैव नियन्तृ च तयोरपि । पशुः पाशः पतिश्चेति कथ्यते त्रितयं क्रमात् । अक्षरं च क्षरं चैव क्षराक्षरपरं तथा । तदेतत्त्रितयं भूयः कथ्यते तत्त्ववेदिभिः' इति । 'अक्षरं पशुरित्युक्तं क्षरं पाश उदाहृतः ।

क्षराक्षरपरं तत्त्वं पतिरित्यभिधीयते । प्रकृतिः क्षरमित्युक्ता पुरुषोऽक्षर उच्यते । तावुभौ प्रेरयत्यन्यः स पतिः परमेश्वरः । माया प्रकृतिरुद्दिष्टा पुरुषो मायया वृतः । संबन्धान्मलकर्मभ्यां शिवः प्रेरक ईश्वरः' इत्यादिना । लैङ्गेऽपि— 'ब्रह्माद्याः स्थावरान्ताश्च देवदेवस्य शूलिनः । पशवः परिकीर्त्यन्ते संसारवशवर्तिनः । चतुर्विंशतितत्त्वानि पाशाः स्युः परमेष्ठिनः । तैः पाशैर्मोचयत्येकः शिवो जीवानुपासितः' इति । अविद्याकार्याणि च बहुधा भवन्ति मनोबुद्ध्यहंकाराः पञ्चतन्मात्राणि भूतानि ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि चेति त्रयोविंशतिः, त एव पाशा इति केचित् । दशेन्द्रियाण्येव पाशा इत्यन्ये । अविद्यास्मितारागद्वेषाभिनिवेशाख्यपञ्चक्लेशात्मकाः तमोमोहमहामोहतामिस्रान्धतामिस्ररूपाविद्यापर्वभेदा इत्येके; त्रयो गुणा इतीतरे; कर्तृत्वभोक्तृत्वाभिमाना इत्यपरे । तथा च सर्वेष्वेतेषु पाशपदप्रयोगो लैङ्गे— 'चतुर्विंशतितत्त्वानि पाशाः स्युः परमेष्ठिनः । दशेन्द्रियमयैः पाशैरन्तःकरणसंभवैः । पञ्चक्लेशमयैः पाशैः पशून् बध्नाति शंकरः । अविद्यामस्मितां रागं द्वेषं च मुनिसत्तमाः । वदन्त्यभिनिवेशं च क्लेशान्पाशत्वमागतान् । तमो मोहो महामोहस्तामिस्रमिति पण्डिताः । अन्धतामिस्रमित्याहुरविद्यां पञ्च-

धा स्थिताम् । अविद्यां तम इत्याहुरस्मितां मोह इत्यपि । रागमाहुर्महामोहं द्वेषस्तामिस्रमुच्यते । अन्धतामिस्रमित्याहुस्तथैवाभिनिवेशनम्' इति । 'ब्रह्मादिस्तम्बपर्यन्तान्पशून्बध्वा महेश्वरः । त्रिभिर्गुणमयैः पाशैः कार्यं कारयति स्वयम्' इति । तादृशपाशानां मुक्तिश्च भक्तिलभ्यात् भगवत्प्रसादादेव, नान्यस्मात् । तथा चोक्तं लैङ्गे—'स एव मोचकस्तेषां भक्त्या सम्यगुपासितः । अविद्यापाशबद्धानां नान्यो मोचक इष्यते । तमृते परमात्मानं शंकरं परमेश्वरम्' इति । वायवीयसंहितायामपि—'भावातिशयलभ्येन प्रसादेन मलक्षयः' इति । मन्त्रोपनिषद्यपि अन्वयव्यतिरेकाभ्यां दर्शितम्— संयुक्तमेतत्क्षरमक्षरं च व्यक्ताव्यक्तं भरते विश्वमीशः । अनीशश्चात्मा बध्यते भोक्तृभावाज्ज्ञात्वा देवं मुच्यते सर्वपाशैः' इति । अस्यार्थः— क्षरं क्षरणशीलं प्रधानं पाशः; अक्षरम् अविनाशी पुरुषो जीवः पशुः 'अक्षरं पशुरित्युक्तं क्षरं पाश उदाहृतः' इति प्रागुदाहृताशिवपुराणवचनात्; एतद्द्वयं संयुक्तं तयोः संबन्धस्यानादित्वात्; नन्वनादिरपि प्रागभाववत् कुतो न नश्यति? अत आह— व्यक्तेति; व्यक्तं प्रधानकार्यभूतः प्रपञ्चः अव्यक्तं तत्कारणभूतं प्रधानम्,

'व्यक्तं कार्यदशापन्नं शरीरादि घटादि च । तत्कारणदशापन्नमव्यक्तमिति कथ्यते' इति शिवपुराणवचनात्; व्यक्तं चाव्यक्तं चेति समाहारद्वन्द्वः । एवंभूतं विश्वं समस्तम् ईशो भरते बिभर्ति; सत्यमयं नाशशील इति तथापि ईश्वरस्योपेक्षयानुवर्तत इति भावः। 'य एष बध्यते पाशैः सुखदुःखात्मकैः पशुः । लीलासाधनभूतोऽयमीश्वरस्येति सूरयः' इति शिवपुराणोक्तरीत्या लीलाविलयप्रतिसंधानमेव शिवस्योपेक्षाया मूलम्; दीक्षितकृते तु शिवस्तवे इदमेवान्यथोत्प्रेक्षितम्— 'आ पातालकमा विरिञ्चगृहमप्यव्याहतप्रक्रमान् पाशेन ग्रथयन्द्विधा च दशधा भिन्नेन सर्वान्पशून् । मुच्यन्तां स्वयमेव मोचयतु वा कश्चित्त्वमान्शक्तिमानित्युन्मत्त इव प्रतीक्षितुममून्पश्यन्नुदास्ते शिवः' इति; नन्वनादिरविद्यासंबन्धः ईश्वरस्याप्यस्ति; एवं सति स कथमीष्टे? जीवाः कथं नेशते? तत्राह— 'अनीशश्चात्मा बध्यते भोक्तृभावात्' इति भोक्तृत्वप्रतिसंधानरूपपाशबद्धत्वात् जीवो अनीश इत्यर्थः; तादृशपाशमोचने क उपायः; तत्राह— 'ज्ञात्वा देवं मुच्यते सर्वपाशैः' इति; प्रकारकात्स्न्यं सर्वशब्दार्थः, चतुर्विंशतितत्त्वात्मकत्वपञ्चक्लेशात्मकत्वादिनानाप्रकारावच्छिन्नैः पाशै-

र्मुच्यत इत्यर्थः । तथा 'घृतात्परं मण्डमिवातिसूक्ष्मं ज्ञात्वा शिवं सर्वभूतेषु गूढम् । विश्वस्यैकं परिवेष्टितारं ज्ञात्वा देवं मुच्यते सर्वपाशैः' इति । तथा 'यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः । तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यति' इति । ननु उदाहृतलैङ्गवचने भक्त्या पाशनिवृत्तिरुक्ता श्रुतिषु ज्ञानादित्युच्यत इति विरोधः इति चेत्, न; 'भज सेवायाम्' इति धातोः भक्तिशब्दः सेवावाची; सेवा च सेव्यप्रीतिकरव्यापारविशेषः । स च कायिकवाचिकमानसिकभेदात् त्रिविधः, तत्र प्रणामादिरूपात् कायिकात् प्रणवादिजपरूपाद्वाचिकादपि सत्यानन्दादिस्वरूपानुसंधानलक्षणं मानसिकं भजनं अभ्यर्हितोपाय इति लिङ्गपुराणतात्पर्यात् । तथैवाविष्कृतं तत्रैव— 'भज इत्येष वै धातुः सेवायां परिकीर्तितः । तस्मात्सेवा बुधैः प्रोक्ता भक्तिशब्देन भूयसी । भजनं भक्तिरित्युक्तं वाङ्मनःकायकर्मभिः । सत्यः सर्वगः इत्यादि शिवस्य गुणचिन्तनम् । रूपापदानचिन्तां वा मानसं भजनं विदुः' इत्यादिना । एवंभूतपाशमोचक इत्यर्थः । मुञ्चतेर्मोचयतेर्वा मोचक इति रूपम् । अण्यन्तपक्षे मुञ्चतेर्विस्रंसनार्थात् धातोः कर्तरि ण्वुलि शेषषष्ठ्या समासः । पाशानां मोचक इति । ण्यन्तपक्षे तु विश्लेषोपसर्जनकविश्लेषणा-

र्थाद्धातोः भागत्यागलक्षणया कर्मकर्तृभावोचितविश्लेषमात्रपर्यवसानात् पुनर्विश्लेषणार्थविवक्षायां 'निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे णिजुच्यते' इति णिचि ततो ण्वुलि पाशेभ्यो मोचक इति पञ्चमीयोगविभागात् समासः ॥ ९० ॥

मृडः पशुपतिर्देवो महादेवोऽव्ययो हरिः ।
पूषदन्तभिदव्यग्रो दक्षाध्वरहरो हरः ॥

मृड इति । मृडयति सुखयतीति मृडः । 'मृड सुखने' इति धातोः 'इगुपधज्ञाप्रीकिरः कः' इति कः । सुखजनक इत्यर्थः । इदं च श्रुतिप्रसिद्धं नाम; 'रुद्र मृडानार्भव मृढ धूर्त' इति ॥ ९१ ॥

पशुपतिरिति । पशूनां प्रागुक्तानां पतिः स्वामी । पातेरौणादिके डतिप्रत्यये रक्षको वा । तत्र रक्षकत्वं तत्पाशमोचकत्वम्; स्वामित्वं तु पशून् बद्धुं बन्धानमुक्त्वैव भ्रमयितुं तेषु स्वैकशरणान्मोक्तुं च स्वातन्त्र्यम् । तथा च श्रुतिः— 'स विश्वकृद्विश्वविदात्मयोनिर्ज्ञः कालकालो गुणी सर्वविद्यः । प्रधानक्षेत्रज्ञपतिर्गुणेशः संसारमोक्षस्थितिबन्धहेतुः' इति । तथा च हरिवंशे— 'पालयामि पशून्यस्मात्सृजामि च यदृच्छया । तेषां च पतिरेवाहं तस्मात्पशुपतिः स्मृतः' इति । द्रोणपर्वण्यपि— 'सर्वा-

न्यच्च पशून्पाति तैश्च यद्रमते पुनः । तेषामपि पतिर्यच्च तस्मात्पशुपतिः स्मृतः' इति । अत्र श्लोकद्वयेऽपि तत्पालकत्वं तत्स्वामित्वं चेति व्युत्पत्तिद्वयमेव विवक्षितम् ; पतिशब्दस्यैकत्र योगादितरत्र योगरूढेश्च । 'सृजामि च यदृच्छया' 'तैश्च यद्रमते पुनः' इति द्वयमपि क्रमेण पालनस्य स्वामित्वस्य चोपपादकम्, स्वेनैव सृष्टस्यावश्यपालनीयत्वात् स्वामिनः स्वे प्रीत्यौचित्यात् । न तु व्युत्पत्त्यन्तरपरम्, अनुशासनाभावात् । इदं च पाशुपत्यम् 'सोऽब्रवीद्वरं वृणा अहमेव पशूनामधिपतिरसानि' इति रुद्रकृतवरवरणप्रदर्शनव्याजेनानादिसिद्धतया शिवस्य श्रुतौ दर्शितम् । ननु वरणलब्धतयोक्तस्यागन्तुकतया कथमनादिसिद्धत्वमिति चेत्, शृणु—'सोऽब्रवीत्' इति भूतार्थलङ् प्रयोगात् पूर्वकल्पवृत्तान्तोऽनया श्रुत्या सर्गाद्यकालप्रवृत्तयानूद्यत इति वक्तव्यम् । पूर्वकल्पादावपि इयमेव श्रुतिरित्थमेव लङा बोधयन्ती वरवरणस्य तत्पूर्वकल्पसिद्धतां ब्रूते । एवं तत्पूर्वकल्पे तत्पूर्वकल्पेऽपीत्यनादित्वसिद्धेः । अन्यथा गृहपुरोडाशादिविषयकवरवरणार्थवादेषु नित्यानित्यसंयोगविरोधस्य परिहर्तुमशक्यत्वात् । यत्तु निर्वचनान्तरं हरिवंशे 'ग्राम्यारण्यानां यत्पतिस्त्वं पशूनां ख्यातो देवः पशुपतिः सर्वकामः' इति, तत्तु पशुभिः दत्तं ग्रा-

म्यारण्यपशुनिरूपितमाधिपत्यं यत् वृषाङ्क इति नामव्याख्यानावसरे भारतवचनप्रसिद्धमुदाहृतं तदभिप्रायेण प्रवृत्तम् । इदं च आत्माभिमानिन्याः 'यस्यात्मा शरीरं यमात्मा न वेद य आत्मानमन्तरो यमयति एष त आत्मान्तर्याम्यमृतः' इति ब्राह्मणे आत्मान्तर्यामित्वेन श्रुताया मूर्तेर्नाम । यथोक्तं शिवपुराणे वायवीयसंहितायाम्— 'सर्वात्मनामधिष्ठात्री सर्वक्षेत्रनिवासिनाम्। मूर्तिः पशुपतिर्ज्ञेया पशुपाशनिकृन्तनी' इति। 'यजमानोऽष्टमी मूर्तिः' इति व्यपदेशस्तु इतरात्मापेक्षया तदात्मन्यधिकसंनिधानाभिप्रायेण न यजमानातिरिक्तात्मनामूर्तित्वाभिप्रायेण, उदाहृतवचने 'सर्वात्मनाम्' इत्युक्तेः; तथा तत्रैव 'भूम्यम्भोग्निमरुद्व्योमक्षेत्रज्ञार्कनिशाकराः। अधिष्ठिता महेशस्य शर्वाद्याभिश्च मूर्तिभिः' इति सामान्यतः क्षेत्रज्ञपदप्रयोगात्। अत एव 'सर्वाभयप्रदानं च सर्वानुग्रहणं तथा। सर्वोपकारकरणं शिवस्याराधनं विदुः' इत्यप्युक्तम्, पशुपतिशब्दवाच्यपशुपाशविमोचनसामर्थ्यवतः परमात्मन एव सर्वात्मनियन्तृतौचित्यात् । तथा च लैङ्गेऽप्युक्तम्— 'आत्मा तस्याष्टमी मूर्तिः सर्वभूतशरीरगः' इति । अन्ये तु वह्न्यभिमानिनीं मूर्तिं पशुपतिरित्याचक्षते; यथोक्तं लैङ्गे— 'वह्न्यात्मा भगवान्देवः स्मृतः पशुपतिर्बुधैः' इति । इदं

च श्रुतिप्रसिद्धं नाम; 'अम्बिकापतय उमापतये पशुपतये नमो नमः' 'नमस्तेऽस्तु पशुपते त्रायस्वैनम्' इति ॥ ९२ ॥

देव इति । दीव्यतेर्देवः । पचादित्वादिगुपधलक्षणस्य कस्यापवादोऽच्प्रत्ययः । जगत्सृष्ट्यादिक्रीडाशालीत्यर्थः । तथा च ब्रह्मसूत्रम्– 'लोकवत्तु लीलाकैवल्यम्' इति । यद्वा स्वामिपर्यायो देवशब्दः, नरदेव इतिवत् । असंकुचितस्वामित्वं च शिवस्यैव, 'सर्वाधिपत्यं कुरुते महात्मा' इति श्रुतेः, 'यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षरः' इति अभियुक्तोक्तेश्च । इदं च श्रुतिसिद्धं नाम; 'सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम्' इति श्रुत्यन्तरसिद्धरुद्रप्रतिपादनपरे च्छन्दोगानां देवव्रते 'ये देवा देवा दिविषदः स्थ तेभ्यो वो देवा देवेभ्यो नमः, ये देवा देवा अन्तरिक्षसदः स्थ... पृथिवीसदः स्थ' इत्यादिषु प्रतिपर्यायं देवशब्दप्रयोगात् ॥ ९३ ॥

महादेव इति । महांश्चासौ देवश्च महादेवः । 'आन्महतः–' इति आत्वम् । तथा च श्रुतिः– 'तमीश्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतम्' इति । महत्त्वं च सकलपूज्यत्वाद्वा विभुत्वेन प्रमाणतो महत्त्वाद्वा । यथोक्तं सांम्बपुराणे–– 'पूज्यते यः सुरैः सर्वैर्महांश्चैव प्रमाणतः । धातुर्महेति पूजायां महादेवस्ततः स्मृतः' इति । हरिवंशे तु

महत्त्वं सर्वज्ञत्वात् सर्वरक्षकत्वाच्चेत्युक्तम्– 'सहस्राक्षोऽयुताक्षो वा सर्वतोऽक्ष इवेक्षते । यच्च विश्वं महत्पाति महादेवस्ततः स्मृतः' इति । इदं च चन्द्राभिमानिन्या मूर्तेर्नाम । यथोक्तं शिवपुराणे–– 'आप्याययति यो नित्यममृतांशुर्निशाकरः । महादेवस्य सा मूर्तिर्महादेवसमाह्वया' इति । अमृतप्रदानेन सर्वरक्षकचन्द्राभिमानिमूर्तेः रक्षकत्वप्रयुक्तमहत्त्वघटितमहादेवपदवाच्यतौचित्यात् । इदं च श्रुतिप्रसिद्धं नाम 'तत्पुरुषाय विद्महे महादेवाय धीमहि' इति ॥ ९४ ॥

अव्यय इति । व्येति विविधतया गच्छति जायतेऽस्ति वर्धते विपरिणमतेऽपक्षीयते नश्यतीति वार्ष्यायणिपरिगणिताः ये षट् भावविकारास्तान्प्रतिपद्यत इति व्ययः, स नेत्यव्ययः जननादिविकारशून्य इत्यर्थः । यद्वा अव्ययानि दश प्रागुक्तानि ज्ञानादीनि, तद्वानव्ययः । इदं च श्रुतिसिद्धं नाम 'महान्प्रभुर्वै पुरुषः सत्त्वस्यैष प्रवर्तकः । सुनिर्मलामिमां शान्तिमीशानो ज्योतिरव्ययः' इति ॥ ९५ ॥

हरिरिति । हरति पापानीति हरिः । 'इन् सर्वधातुभ्यः' इति हरतेरौणादिक इन्प्रत्ययः । अस्य विष्णुनामत्वात् पापहरणप्रवृत्तिनिमित्ततया उत्कृष्टनामत्वाच्च शिवनामत्वमुचितम् । यथोक्तं हरिवंशे कैलासयात्रायां शिववचनम्––

'नामानि तव गोविन्द यानि लोके महान्ति च । तान्येव मम नामानि नात्र कार्या विचारणा' इति । आश्वलायन-गृह्ये शूलगवेऽप्युक्तम्— 'यान्युच्छ्रितानि नामधेयानि तानि महादेवस्य' इति ॥ ९६ ॥

पूषदन्तभिदिति । दक्षाध्वरे वीरभद्रः पूष्णो दन्तानभिनदिति सर्वपुराणप्रसिद्धम् । यथोक्तं शिवपुराणे— 'पूष्णो दशनपङ्क्तिं च दीप्तां मुक्तावलीमिव । बिभेद धनुषः कोट्या ततः सोऽस्पष्टवागभूत्' इति । 'सत्सूद्विष—' इत्यादिना क्विप् ॥ ९७ ॥

अव्यग्र इति । व्यग्रः संभ्रान्तहृदयः, स नेत्यव्यग्रः । लोके हि महति युद्धे प्रवृत्तानां कोपादिनिमित्तं चित्तवैयग्र्यं दृष्टम्, तमोभिभूतत्वात् । नैवं परमेश्वरे वशीकृततमस्के । स हि शिवद्रोहिणो दक्षस्य उचितदण्डेन नैर्मल्यं संपाद्य अनुग्रहार्थं प्रवृत्तो न कोपान्धतयेति भावः । एतच्च पूषदन्तभिदित्यादिभिः भगनेत्रभिदित्यन्तैर्नामभिः प्रतिपाद्यमानानां निग्रहात्मककर्मणां तमोभिभवप्रयुक्तत्वशङ्कानिरासेनानुजिघृक्षाप्रयुक्तत्वज्ञापनार्थम् ॥ ९८ ॥

दक्षाध्वरहर इति । दक्षस्याध्वरो दक्षाध्वरः । दक्षाध्वरं हरतीति दक्षाध्वरहरः । 'हरतेरनुद्यमनेऽच्' इत्यच् प्रत्ययः ॥

र इति । हरति उपसंहरति सर्वमिति हरः । पचाद्यच् । इदं च श्रुतिप्रसिद्धं नाम 'क्षरं प्रधानममृताक्षरं हरः' इति । इदं च सृष्टिस्थितिसंहारनिर्वाहिकासु भवमृडहराख्यासु संहाररुद्रमूर्तिषु तृतीयमूर्तेर्नाम । अस्य च नाम्नो महती प्रशंसा शिवागमेषु । यथोक्तम्— 'अष्टवारं हर इति जले मग्नो जपेन्नरः । अघमर्षणमेवैतत्सर्वपापैः प्रमुच्यते' इति । 'आहर' 'प्रहर' इति वदन्नेव मृतः कश्चित् हरशब्दगन्धादपि शिवकिंकरैः कैलासं नीत इति महती चाख्यायिका पुराणेषु ॥ १०० ॥

भगनेत्रभिदव्यक्तः सहस्राक्षः सहस्रपात् ।
अपवर्गप्रदोऽनन्तस्तारकः परमेश्वरः ॥

भगनेत्रभिदिति । इदमपि दक्षाध्वरध्वंससमये कृतमिति शिवपुराणादिषु प्रसिद्धम् । यथोक्तं वायवीयसंहितायाम्— 'भगस्य विपुले नेत्रे शतपत्रसमप्रभे । प्रसह्योत्पाटयामास भद्रः परमवेगवान्' इति ॥ १०१ ॥

अव्यक्त इति । व्यक्तः स्पष्टो नेत्यव्यक्तः । 'न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम्' 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' 'सूक्ष्मातिसूक्ष्मं कलि-

लस्य मध्ये' 'अणोरणीयान्' इत्यादिश्रुतेः ॥ १०२ ॥

सहस्राक्ष इति । सहस्राणि अनन्तानि अक्षीणि अस्य सहस्राक्षः । 'शतं सहस्रमयुतमित्यनन्तस्य वाचकम्' इति निघण्टूक्तेः । यानि सर्वेषामक्षीणि तान्येव सर्वान्तर्यामिणो भगवतः प्रपञ्चशरीरकस्याक्षीणि कृत्वा सहस्राक्षत्वम् । तथा च श्रुतिः— 'सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः । सर्वव्यापी च भगवांस्तस्मात्सर्वगतः शिवः' 'विश्वतश्चक्षुरुत विश्वतोमुखः, विश्वतो बाहुरुत विश्वतस्पात्' 'सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्' इति । इदं च श्रुतिप्रसिद्धं नाम 'नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे' इति ॥ १०३ ॥

सहस्रपादिति । पूर्वेण व्याख्यातम् ॥ १०४ ॥

अपवर्गप्रद इति । मोक्षप्रदत्वं च 'यदा चर्मवदाकाशम्' इत्यादिप्रागुदाहृतश्रुतिप्रसिद्धम् ॥ १०५ ॥

अनन्त इति । अन्तो निश्चयः परिच्छेदः, तद्रहितोऽनन्तः । 'नित्यो नित्यानां चेतनश्चेतनानाम्' इति श्रुत्या कालपरिच्छेदेन, 'सर्वव्यापी च भगवांस्तस्मात्सर्वगतः शिवः' इति श्रुत्या देशपरिच्छेदेन, 'न स्त्री न षण्डो न पुमान्' इति

श्रुत्या वस्तुपरिच्छेदेन च रहित इत्यर्थः । तथा च श्रुतिः— 'अनन्तमव्ययं कविं समुद्रेऽन्तं विश्वशंभुवम्,' 'सत्यं ज्ञानमनन्तं ब्रह्म' इति ॥ १०६ ॥

तारक इति । तारयति संसारादिति तारकः । तारयतेः ण्वुल् । यद्वा तारयतेर्ण्यन्तात् पचाद्यचि स्वार्थे कः । अत एव श्रुताविदं नाम तार इत्येव श्रुतम् । 'नमस्ताराय नमः शंभवे च' इति; अथर्वशिरस्यपि 'अथ कस्मादुच्यते तारो यस्मादुच्चार्यमाण एव गर्भजन्मजरामरणसंसारमहाभयात्तारयति तस्मादुच्यते तारः' इति । यद्वा तारः प्रणवः तमाचष्टे अविमुक्तोपासकानामन्त्यकाले इति तारकः । यद्वा तारशब्दात् '—तदाचष्टे' इति ण्यन्तात् ण्वुलि रूपम् । तथा च जाबालश्रुतिः 'अत्र हि जन्तोः प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे येनासावमृती भूत्वा मोक्षी भवति' इति ॥१०७॥

परमेश्वर इति । परमः उत्कृष्टश्चासावीश्वर इति कर्मधारयः । 'सन्महत्—' इत्यादिना समासः । सर्वकर्मफलदानस्वातन्त्र्यं चात्र पारम्यम् । तथा च श्रुतिः— 'नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् । तत्कारणं सांख्ययोगाभिगम्यं ज्ञात्वा देवं मुच्यते सर्वपाशैः' 'येनावृतं नित्यमिदं हि सर्वं ज्ञः कालकालो गुणी सर्व-

विद्यः । तेनेशितं कर्म निवर्तते ह पृथ्व्याप्यतेजोनिलखानि चिन्त्यम्' 'कर्माध्यक्षः सर्वभूताधिवासः' इति च ।

अत्र तत्तदुपासकानां कामांस्ते ते देवा विदधति, एवं शिवोऽपि स्वोपासकानामेव कामान्विदधातीति शङ्कां व्यावर्तयितुम् 'एकः' इति पदं प्रथमोदाहृतश्रुतौ प्रयुक्तम् । तदभिप्रायश्च सम्यगुद्घाटितो वायवीयसंहितायाम्—'यथैव पुत्रपौत्रादेः प्रीत्या प्रीतो भवेत्पिता । तथा सर्वस्य संप्रीत्या प्रीतो भवति शंकरः' इति । एवं च सर्वेषां शिवप्रसूतत्वात् अस्वतन्त्रत्वाच्च यथा अस्वतन्त्रशिशूपलालनेन प्रीतः पितैव स्वतन्त्रः फलप्रदः एवमस्वतन्त्रेन्द्रादिदेवताराधनेन प्रीतः तत्पिता स्वतन्त्रः परमेश्वर एव फलप्रद इति पर्यवसानात् । 'येनावृतम्' इति श्रुतावपि सर्वकर्मफलप्रदत्वमेवोक्तम् । यद्यपि– तेनेशितं तेन ईश्वरेण स्वीकृतं तदर्पणबुद्ध्यानुष्ठितमिति यावत्; एवंभूतं कर्म निवर्तते फलमजनयित्वैव नश्यति, न केवलं तस्यैव कर्मणो नाशः, किं तु पृथ्व्याप्यतेजोनिलखान्यपि निवर्तन्ते भूतानि भौतिकानि शरीरादीन्यपि निवर्तन्ते कैवल्यमेव भवति इति चिन्त्यं बोध्यमित्यर्थः; 'येनावृतमिदं सर्वं कालः कालात्मनोऽपि यः । तेनेशितमिदं कर्म सह भूतैर्निवर्तते' इति वायुसंहितावचनात्; तथापि फल-

प्रतिसंधानेन कृतानां कर्मणां तत्तत्फलं ददाति, स्वार्पणबुद्ध्यानुष्ठितानां तु सर्वकर्मफलनाशनद्वारा कैवल्ये पर्यवसानं कारयतीति तदर्थात् । तथा चोक्तं कौर्मे ईश्वरगीतासु शिववचने—— 'गृणन्ति सततं वेदा मामेकं परमेश्वरम् । यजन्ति विविधैरग्निं ब्राह्मणा वैदिकैर्मखैः ॥ अहं हि सर्वयज्ञानां भोक्ता चैव फलप्रदः । सर्वदेवतनुर्भूत्वा सर्वात्मा सर्वसंस्थितः ॥ ये चान्यदेवताभक्ताः पूजयन्तीह देवताः । मद्भावनासमायुक्ता मुच्यन्ते तेऽपि भावतः ॥ तस्मादनीश्वरानन्यांस्त्यक्त्वा देवान्विशेषतः । मामेव संश्रयेदीशं स याति परमं पदम्' इति । अनेनैवाभिप्रायेणाथर्वशिखायामप्युक्तम्—— 'सर्वमन्यत्परित्यज्य शिव एको ध्येयः शिवंकरः समाप्ताथर्वशिखा' इति । सर्वमन्यत्परित्यज्य शिव एको ध्येयः इत्यत्र हेतुरुच्यते—— शिवंकर इति । यतोऽन्ये शिवं कर्तुमस्वतन्त्राः शिव एकः स्वतन्त्रः अतः सर्वमन्यत् देवतान्तरभजनादिकं परित्यज्य शिव एको ध्येयः शिवंकरत्वात् इति । यद्यपि शिवपदेनैव शिवयतीति शिव इति व्युत्पत्त्या शिवंकरत्वमपि शक्यं प्रत्येतुम्, तथापि परमकारुणिकी श्रुतिः पदान्तरेणैव तमर्थं स्पष्टमाह । न केवलमियदेव, पाठविरामादेवावगन्तव्यामपि स्वसमाप्तिं स्वयमे-

वोद्घाटयति-- समाम्नाथर्वशिखेति, इतः परं वक्तव्यं नास्ति परमरहस्यस्योपदिष्टत्वात् अत उपरम्यत इत्यभिप्रायमावेद्य मन्दाननुग्रहीतुम् । प्रकृते च ब्रह्मविद्याधिदेवता भगवत्यम्बिकैव स्तुतिव्याजेन शिवतत्त्वमुपदिशन्ती परमेश्वरनाम्नोपसंहृत्येदं द्योतयति-- यतोऽयं परमेश्वरः अतो मया स्तुतः अन्ये तु सापेक्षैश्वर्यशालिनो ब्रह्मादयः मत्कटाक्षोपजीविनः न मया स्तुत्याः । अहमेव स्वयमिदं वदामि-'जुष्टं देवेभिरुत मानुषेभिः यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम्' इति मद्वचनस्यैव श्रुतावाविष्कृतत्वादिति । एतन्नाम्ना स्तुतिपूरणेनान्यदपि सूचितम्-- यतः त्वं परमेश्वरः निरङ्कुशस्वातन्त्र्यशाल्यसि अतो मत्कृतस्तुतेरपि फलं तावकशरीरार्धप्राप्तिरूपमपि युक्तमयुक्तं वा दातुमर्हसि इति । रूढेन शिवनाम्ना उपक्रम्य तादृशेनैव परमेश्वरनाम्ना उपसंहारात्तन्मध्यपातिनामपि नाम्नामर्थास्तद्वदेव भगवत्यसाधारणा इति व्यञ्जितम् ॥ १०८ ॥

एतदष्टोत्तरं नाम्नां शतमाम्नायसंमितम् ।
शंकरस्य प्रिया गौरी जप्त्वा शंभुप्रसाददम्॥

एतदिति । एतत्पूर्वोक्तमाम्नायसंमितं वेदतुल्यं वेदवद-

वश्यपाठ्यम्; यद्वा आम्नायैः वेदैः संमितं संयक्प्रमितं बोधितम्, वेदोक्तमिति यावत्। अत्रत्यानां नाम्नां प्रायेण वेदेषु दर्शनात् अदृष्टानामपि नाम्नामर्थस्य वेदेषु दर्शनात् साक्षात्परम्परया वा सर्वेषां वेदगम्यतयैव अस्य स्तोत्रस्य इतरस्तोत्रापेक्षया अभ्यर्हितत्वमपि । जप्त्वेति आगमशासनस्यानित्यत्वात् इडभावः, जपित्वेत्यर्थः ॥

त्रैकाल्यमन्वहं देवी वर्षमेकं प्रयत्नतः ।
अवाप सा शरीरार्धं प्रसादाच्छूलपाणिनः ॥

त्रैकाल्यमिति । त्रय एव कालास्त्रैकाल्यम्; 'वर्तमानसामीप्ये वर्तमानवद्वा' इति निर्देशात् ज्ञापकात् चत्वारो वर्णाः चातुर्वर्ण्यमितिवत् स्वार्थे ष्वञ् 'स्वार्थिका अपि प्रत्ययाः क्वचित् प्रकृतिलिङ्गवचनान्यतिक्रामन्ति' इति चातुर्वर्ण्यं चातुर्वेद्यं द्वैतमित्यादिवत् प्रकृतिविरुद्धलिङ्गवचनोपपत्तिः । अन्वहमिति च वीप्सार्थकस्यानोर्यथार्थाव्ययत्वादव्ययीभावः । वर्षमेकमिति अत्यन्तसंयोगे द्वितीया । ननु वर्षस्यात्यन्तसंयोगो न भवति, एकस्मिन्वर्षे यावन्त्यहानि तावतामह्नां ये त्रयः कालाः प्रातर्मध्याह्नसायाह्नाख्याः तेष्वेव कालेषु जपः कृत इति वर्षेणात्यन्तसंयोगाभावस्य स्ववाचै-

वोद्घाटितत्वात्; न चायमेवात्यन्तसंयोगो वर्षस्य यत्तदेकदेशीभूतान्वहत्रैकाल्यसंबन्ध इति वाच्यम्, तथा सति अत्यन्तपदवैयर्थ्यापत्तेः— इति चेत्; न, वस्तुतो यत्किंचिदवयवावच्छेदेन संयोगस्य अत्यन्तसंयोगत्वाभावेऽपि दरिद्रस्य अपूपखण्डमप्यलभमानस्य अखण्डितैकापूपलाभे तत्रैव बहुत्वदृष्ट्या 'एकापूपी मया लब्धा' इत्यत्र समाहारविवक्षावत् लोके उपासका दिनविच्छेदराहित्येन नैकं वर्षमुपासितुं क्षमाः, अम्बया तु प्रतिदिनं त्रिषु कालेष्वपि जपः कृत इति अमुमेवात्यन्तसंयोगं विवक्षित्वा द्वितीया कृता । एवं च अवच्छेद्यावच्छेदकयोः त्रैकाल्यवर्षयोरपि एषैव द्वितीया । प्रयत्नत इति तपश्चरणौपयिकशमदमादिपरिग्रहप्रयासेनेत्यर्थः । शूलपाणिन इति । शूलेन पणितुं प्रहर्तुं शीलमस्यास्तीति शूलपाणिः । 'सुप्यजातौ' इति णिनिः । तस्य शूलपाणिनः शूलायुधस्येत्यर्थः ॥

यस्त्रिसंध्यं पठेन्नित्यं नाम्नामष्टोत्तरं शतम् ।
शतरुद्रत्रिरावृत्त्या यत्फलं लभते नरः ॥

यस्त्रिसंध्यमिति तिस्रः संध्याः प्रातर्मध्याह्नसायंसमयरूपाः । सम्यक् ध्यायन्त्यस्यामिति संध्या । 'आतश्चोपसर्गे'

इति अधिकरणे अङ्प्रत्ययः स्त्रीत्वं स्वाभाव्यात् । यद्वा संधौ भवा संध्या । दिगादित्वाद्यत् । सायंप्रातःकालयोरहोरात्रसंधिभवत्वात्संध्यात्वम् । मध्याह्नकालस्य तु ब्रह्माण्डस्य कपालद्वयात्मकतया ज्योतिःशास्त्रप्रसिद्धेः कपालद्वयसंधिसमसूत्रवर्तिसूर्यावच्छिन्नकालभवत्वात् संध्यात्वम् । 'प्राह्णापराह्णमध्याह्नास्त्रिसंध्यम्' इति निघण्टुः । तिसृणां संध्यानां समाहारस्त्रिसंध्यम् 'तद्धितार्थ–' इति द्विगौ 'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वत्वे वा टाबन्त इति नपुंसकत्वम् । शतरुद्रत्रिरावृत्त्येति । शतं रुद्राः प्रतिपाद्यत्वेनास्मिन्निति शतरुद्रः 'नमस्ते रुद्र मन्यवे' इत्याद्यनुवाकसमूहः । यद्यपि तत्र हिरण्यबाहुप्रमुखा रुद्राः शतादधिका एव प्रतिपाद्यन्त इति ब्रह्माण्डपुराणोत्तरे 'षोडशावरणं चक्रं किं तद्रुद्राधिदैवतम्' इत्यध्याये श्रूयते । तथापि साग्रे शते शतयोजनविस्तीर्णः सागर इतिवत् शतरुद्र इति व्यवहारो द्वितीयशताभावतात्पर्येणोपपन्नः । तस्य त्रिरावृत्त्या त्रित्वसंख्यासंपादकाभ्यासेनेत्यर्थः । एवं च द्वावेवाभ्यासौ अनभ्यासरूप आद्यः पाठः एकः इत्याहत्य त्रिभिः पाठैरिति पर्यवसितोऽर्थः । ननु नैवं युक्तम् 'संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्' इति क्रियाभ्यावृत्तिनिष्ठसंख्यायाः

कृत्वसुचं विधाय तदपवादतया 'द्वित्रिचतुर्भ्यः सुच्' इति त्रिशब्दादपि क्रियाभ्यावृत्तिनिष्ठसंख्यापरात्सुञ्विधानेन तिसृभिरेवावृत्तिभिर्भाव्यम्; अनभ्यासपाठेन त्वेकेनेति चत्वारः पाठाः स्युरिति चेत्; न, सर्वत्र सुजन्तप्रयोगेषु अनभ्यासदशामन्तर्भाव्यैव तत्तत्संख्याप्रतीतेः सर्वसंप्रतिपन्नत्वात् । अन्यथा 'त्रिः प्रथमामन्वाह त्रिरुत्तमाम्' इत्यादावपि चत्वार्यनुवचनानि स्युः । तथा च 'पञ्चदश सामिधेन्यो भवन्ति' इति श्रुतपञ्चदश्यविरोध इति । सत्यमिदमेवम्, व्याकरणानुशासनविरोधस्य कथं परिहार इति चेत्, उच्यते-क्रियाभ्यावृत्तिगणन इत्यस्य नैवमर्थः—क्रियाया अभ्यावृत्तिस्तन्निष्ठं यद्गणनम् इति; किं तु क्रियायां यदभ्यावृत्तिगणनं क्रियानिष्ठं यदभ्यावृत्तिप्रयुक्तं गणनमिति । तेनायं सूत्रार्थः—द्व्यादिभ्यः स्वार्थे सुच् भवति, सा चेत् द्व्यादिशब्दप्रतिपाद्या संख्या क्रियानिष्ठा अभ्यासजन्या च स्यात्तदेति । तेन त्रिः पठतीत्यादौ अभ्यासजन्यत्रित्वसंख्याविशिष्टपाठानुकूलकृतिमानिति शाब्दबोधः । प्रकृते च आवृत्तिपदस्य तदुपलक्षितपाठपरत्वात् अभ्यासजन्यत्रित्वसंख्याविशिष्टेन पाठेनेत्येव शाब्दबोध इति । वैयाकरणास्तु क्रियाया अभ्यावृत्तिः तन्निष्ठं यद्गणनमिति व्याख्यायैव उक्तमर्थं समर्थयन्ते ।

तथा हि— क्रियाया अभ्यावृत्तिः जन्मक्रियाजन्मगणनवृत्तेः कृत्वसुजिति । एवं च त्रिः पठतीत्यादौ क्रियाजन्मसु त्रित्वान्वयेन आवृत्तित्रित्वाभावात् त्रय एव पाठाः सिध्यन्ति । न चैवमपि त्रीन्पदार्थान्भुञ्जाने पुरुषे भोज्यभेदेन क्रियाभेदे क्रियाजन्मत्रित्वसंभवात् त्रिर्भुङ्क्ते इति प्रयोगापत्तिः, अभ्यावृत्तिपदस्य जन्ममात्रपरत्वाभावात् । तथा हि– अभिराभिमुख्ये, आङ् तु अनर्थकः, अनर्थका अपि हि निपाताः सन्ति, 'अधिपरी अनर्थकौ' इति सूत्रकारवचनात् । यथोक्तं महाभाष्ये— न पुनः पुनरावृत्तिरभ्यावृत्तिः किं तर्हि अभिमुखी वृत्तिरिति । विवृतं च कैयटेन अभिमुखी च प्रवृत्तिः जन्मक्रियालक्षणेति । तथा च अभिमुखजन्म अभ्यावृत्तिः, आभिमुख्यं च जन्मनामन्योन्यापेक्षत्वं तच्च सर्वेषामेकसाधनसाध्यत्वं यथोक्तम् । एवं च यत्र प्रथमो भुजिः यत्कर्तृको यत्कर्मकश्च तत्कर्तृकौ तत्कर्मकौ चेदपरावपि भुजी तत्रैव उक्ताभ्यावृत्तिपदवाच्यानां जन्मनां त्रित्वान्वयोऽस्तीति त्रिर्भुङ्क्ते इति प्रयोगः । यत्र तु कर्मरूपसाधनभेदभिन्नानां भुजीनां जन्म तत्राभ्यावृत्त्यभावात् न तादृशप्रयोगः । किं तु त्रीणि भोजनानीत्यादिरेवेति । नन्वत्र क्रियाया आख्यातानुपस्थापिततया सिद्धरूपेण प्रतीयमान-

त्वात् क्रियाभ्यावृत्तिगणने विहितस्य सुचो प्रसङ्ग एव; न च सिद्धरूपस्यापि क्रियात्वमव्याहतमेव अन्यथा भोक्तुं पाक इत्यादौ 'कृदभिहितो भावो द्रव्यवत्' इति सिद्धरूपपाककिर्योपपदत्वेन भुजेः 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' इति तुमुन्प्रत्ययाप्रसङ्गादिति वाच्यम्, अन्यत्र तथात्वेऽपि प्रकृते अभ्यावृत्तिग्रहणादेव क्रियाविषयत्वे सिद्धे पुनः क्रियाग्रहणं साध्यावस्थापन्नक्रियाभ्यावृत्तिगणन एव प्रत्ययो यथा स्यात्; एकसाधनत्वे द्वौ पाकौ त्रयः पाका इत्यादौ मा भूदित्येवमर्थमित्यङ्गीकृतत्वादिति चेत्; अत्र हरदत्तादयः कृदन्तस्थलेऽपि क्रिया धातुना साध्यावस्थापन्नैव प्रतिपाद्यते । कृता तु सिद्धावस्थापन्नेति धातुप्रतिपाद्यसाध्यावस्थामादाय द्विः पाकः इत्याद्युपपत्तिरित्याहुः । वस्तुतस्तु प्रत्ययार्थप्राधान्यात् ततः सिद्धावस्थामादाय प्रत्ययानुत्पाद एव न्याय्यः, अन्यथा प्रागुदाहृते द्वौ पाकावित्यादावतिप्रसङ्गात् । परं तु 'द्विर्वचनेऽचि' इति सूत्रकारप्रयोगात् क्वचित्कृदन्तयोगेऽपि प्रत्ययो भवतीति ज्ञापकात् द्विरावृत्तिः द्विः प्रयोग इत्यादयः समर्थनीया इति कैयटः ॥

तत्फलं प्राप्नुयान्नित्यमेकावृत्त्या न संशयः ।
सकृद्वा नामभिः पूज्य कुलकोटिं समुद्धरेत् ॥

एकावृत्त्येति । आवृत्तिशब्दोऽत्र द्वितीयादिपाठनिष्ठावृत्तिताप्रयोजकतया प्रथमपाठलक्षकः । पठेत् प्राप्नुयादिति हेतुलिङ् । सकृद्वेति । एभिर्नामभिरिति शेषः । एतन्नामकरणिकामेकां वा शिवपूजां कुर्यादित्यर्थः । 'एकस्य सकृच्च' इत्यत्र अभ्यावृत्तिग्रहणं निवृत्तं क्रियाग्रहणमात्रमनुवर्तते एको भुङ्क्ते इत्यादिव्यावृत्त्यर्थमिति भाष्यकारोक्तेः सकृच्छब्दस्य क्रियानिष्ठसंख्यामात्रपरत्वेन उक्तार्थे पर्यवसानात् ॥

बिल्वपत्रैः प्रशस्तैश्च पुष्पैश्च तुलसीदलैः ।
तिलाक्षतैर्यजेद्यस्तु जीवन्मुक्तो न संशयः ॥

बिल्वपत्रैरिति । अत्राप्येभिर्नामभिरिति शेषः । स चोभयत्र प्रकरणलभ्यः । यजेत् पूजयेत्, 'यज देवपूजादिषु' इति स्मरणात् । न संशय इति स्तुत्यर्थवादत्वादेतेषां स्तुतावेव तात्पर्येण वाच्यार्थे शतरुद्रफलप्राप्त्यादावभिनिवेशाभावात् यावत्प्रमाणान्तरदर्शनं प्रसक्तः संशयो न कर्तव्य इत्यर्थः । अर्थवादानां स्तुतावेव परमतात्पर्येऽपि मानान्तराविरुद्धे वाच्यार्थे संभवदौत्सर्गिकं प्रामाण्यं न हातव्यमिति स्वर्गार्थवादादिवदस्यैवार्थवादस्य उक्तार्थे प्रमाणत्वादिति भावः । न

चोक्तार्थेऽस्य प्रामाण्यं न संभवति तथा सति गुरुतरशत-रुद्रादिविधायकशास्त्रविरोधादिति वाच्यम्, अधिकारिभेद-व्यवस्थया अविरोधोपपत्तेः। यो ह्यस्मिन्नन्तरङ्गोपायेऽधिक्रियते स ज्ञानाधिकारी गुरुतरकृच्छ्रादिरूपप्रायश्चित्तकर्मस्विव गुरु-तरशतरुद्रादिपाठे नाधिक्रियते, यस्त्वेतद्रहस्यानभिज्ञः स परं कर्मनिष्ठो गुरुतरकर्मस्विव शतरुद्रादावधिक्रियते । संहाररुद्र-व्यूहान्तर्गतहिरण्यबाहुसेनानीप्रमुखानेकरुद्रप्रतिपादकतया हि 'रुद्रैकादशिनी श्रुतौ' इत्युक्तस्य रुद्राध्यायस्य कर्मकाण्डात् ज्ञानकाण्डस्यैव इतरश्रुतिभागापेक्षयाभ्यर्हितत्वम् । अस्य तु स्तोत्रस्य महेश्वरादिव्यूहान्तर्गतश्वेताश्वतरकैवल्याद्यनेकोपनिष-न्नानास्मृतिपुराणादिदिव्यागमप्रसिद्धशिवभवहराद्यनेकरहस्य नामालंकृततया ततोऽप्यभ्यर्हितत्वं युक्तमेव। एवंविधरहस्यार्थ निबन्धनादेवास्य पुराणभागस्य शिवरहस्यसमाख्योपपत्तिश्च । 'वाचिकादप्युपांशोश्च मानसः कोटिसंमितः । पूजाकोटिसमो न्यासो न्यासकोटिसमो जपः ॥ जपकोटिसमं ध्यानं ध्यान-कोटिसमो लयः' इत्यादिवचनैः गुरूपायापेक्षया लघूपायस्या-भ्यर्हितत्वेन संप्रतिपन्नतया इहापि तथैव संभवेन मानान्तर-विरोधशङ्काया अप्यभावादुक्तार्थे अस्यैवार्थवादस्य प्रमाण-तया संशयो न कर्तव्य इति साधूक्तम् ॥

निर्मिता शिवदासेन नीलकण्ठेन यज्वना ।
शिवतत्त्वरहस्याख्या शिवयोः प्रीतये कृतिः ॥

इदं समग्रं त्वरया स्वयमेव प्रसन्नधीः ।
अलिखत्प्रीतये शंभोरित्थं समरपुंगवः ॥

इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीकण्ठमतप्रतिष्ठापनाचार्य-
चतुरधिकशतप्रबन्धनिर्वाहकश्रीमन्महाव्रतयाजिश्रीमदप्प-
यदीक्षितसोदर्यश्रीमदाच्चान्दीक्षितपौत्रेण श्रीनारायण-
दीक्षितात्मजेन श्रीभूमिदेवीगर्भसंभवेन नील-
कण्ठदीक्षितेन विरचितं श्रीशिवनामाष्टो-
त्तरशतस्तोत्रव्याख्यानं
श्रीशिवतत्त्वरहस्याख्यं
संपूर्णम् ॥



॥ श्रीः ॥

॥ श्रीशिवाष्टोत्तरशतनामावलिः ॥

ओं शिवाय नमः ।
ओं महेश्वराय नमः ।
ओं शंभवे नमः ।
ओं पिनाकिने नमः ।
ओं शशिशेखराय नमः ।
ओं वामदेवाय नमः ।
ओं विरूपाक्षाय नमः ।
ओं कपर्दिने नमः ।
ओं नीललोहिताय नमः ।
ओं शंकराय नमः । १०
ओं शूलपाणये नमः ।
ओं खट्वाङ्गिने नमः ।
ओं विष्णुवल्लभाय नमः ।
ओं शिपिविष्टाय नमः ।
ओं अम्बिकानाथाय नमः ।

ओं श्रीकण्ठाय नमः ।
ओं भक्तवत्सलाय नमः ।
ओं भवाय नमः ।
ओं शर्वाय नमः ।
ओं त्रिलोकेशाय नमः । २०
ओं शितिकण्ठाय नमः ।
ओं शिवाप्रियाय नमः ।
ओं उग्राय नमः ।
ओं कपालिने नमः ।
ओं कामारये नमः ।
ओं अन्धकासुरसूदनाय नमः ।
ओं गङ्गाधराय नमः ।
ओं ललाटाक्षाय नमः ।
ओं कालकालाय नमः ।
ओं कृपानिधये नमः । ३०
ओं भीमाय नमः ।
ओं परशुहस्ताय नमः ।
ओं मृगपाणये नमः ।
आ जटाधराय नमः ।

ओं कैलासवासिने नमः ।
ओं कवचिने नमः ।
ओं कठोराय नमः ।
ओं त्रिपुरान्तकाय नमः ।
ओं वृषाङ्काय नमः ।
ओं वृषभारूढाय नमः । ४०
ओं भस्मोद्धूलितविग्रहाय नमः ।
ओं सामप्रियाय नमः ।
ओं स्वरमयाय नमः ।
ओं त्रयीमूर्तये नमः ।
ओं अनीश्वराय नमः ।
ओं सर्वज्ञाय नमः ।
ओं परमात्मने नमः ।
ओं सोमसूर्याग्निलोचनाय नमः ।
ओं हविषे नमः ।
ओं यज्ञमयाय नमः । ५०
ओं सोमाय नमः ।
ओं पञ्चवक्त्राय नमः ।
ओं सदाशिवाय नमः ।

ओं विश्वेश्वराय नमः ।
ओं वीरभद्राय नमः ।
ओं गणनाथाय नमः ।
ओं प्रजापतये नमः ।
ओं हिरण्यरेतसे नमः ।
ओं दुर्धर्षाय नमः ।
ओं गिरीशाय नमः । ६०
ओं गिरिशाय नमः ।
ओं अनघाय नमः ।
ओं भुजंगभूषणाय नमः ।
ओं भर्गाय नमः ।
ओं गिरिधन्वने नमः ।
ओं गिरिप्रियाय नमः ।
ओं कृत्तिवाससे नमः ।
ओं पुरारातये नमः ।
ओं भगवते नमः ।
ओं प्रमथाधिपाय नमः । ७०
ओं मृत्युंजयाय नमः ।
ओं सूक्ष्मतनवे नमः ।

ओं जगद्व्यापिने नमः ।
ओं जगद्गुरवे नमः ।
ओं व्योमकेशाय नमः ।
ओं महासेनजनकाय नमः ।
ओं चारुविक्रमाय नमः ।
ओं रुद्राय नमः ।
ओं भूतपतये नमः ।
ओं स्थाणवे नमः । ८०
ओं अहिर्बुध्न्याय नमः ।
ओं दिगम्बराय नमः ।
ओं अष्टमूर्तये नमः ।
ओं अनेकात्मने नमः ।
ओं सात्त्विकाय नमः ।
ओं शुद्धविग्रहाय नमः ।
ओं शाश्वताय नमः ।
ओं खण्डपरशवे नमः ।
ओं अजाय नमः ।
ओं पाशविमोचकाय नमः । ९०
ओं मृडाय नमः ।

ओं पशुपतये नमः ।
ओं देवाय नमः ।
ओं महादेवाय नमः ।
ओं अव्ययाय नमः ।
ओं हरये नमः ।
ओं पूषदन्तभिदे नमः ।
ओं अव्यग्राय नमः ।
ओं दक्षाध्वरहराय नमः ।
ओं हराय नमः । १००
ओं भगनेत्रभिदे नमः ।
ओं अव्यक्ताय नमः ।
ओं सहस्राक्षाय नमः ।
ओं सहस्रपादे नमः ।
ओं अपवर्गप्रदाय नमः ।
ओं अनन्ताय नमः ।
ओं तारकाय नमः ।
ओं परमेश्वराय नमः । १०८

